॥श्रीकाशीविश्वनाथपुरीमेंमहल्लाछोटकीपियरीपरबाबूकवलेश्वरसिंहकेमकानमेंबाबूकि
शुनदयालसिंहकेगणेशप्रभाकरछापेखानेमेंपरिभाषेन्दुशेखरव्याख्यात्रिपथगाछापागया।लि
खाविंध्येश्वरीमिश्रजिनकोलेनाहोयउनकोनईसडकपरबाबूकवलेश्वरसिंहकेदूकानपरमिलेगा

॥ श्रीगणेशाय नमः ॥ पुरांतकसुराधिपप्रमुखसेवितंदैवतंपुरातनगिरास्तुतंकमलयासमालिंगितं ॥ चराचरविधायितत्राणपना
पनाम्याद्दरादुरुःसरथराधरप्रवरनीलधाराधरं ॥ १ ॥ श्रीवेंकटेशपितरंसर्वतंत्रविशारदं ॥ सावित्रींमातरंनौमिगुरून्विद्यामदांस्त
था ॥ २ ॥ वितन्वतेत्रिपथगाविष्णुपादाब्जसंगिनी ॥ सागरस्यप्रियाचेंदुशेखराकविहारिणी ॥ ३ ॥ प्रारिप्सितग्रंथसमाप्तिप्रचयादिप्र
तिबंधकदुरितोपशमायकृतंमंगलं शिष्यशिक्षायैनिबध्नाति ॥ नत्वेति ॥ नागेशइति ॥ ननुआत्मनामेतिनिषेधादयुक्तमिदमिति
चेदत्रकेचित् ॥ आत्मनामेतिनिषेधोव्यावहारिकनाममात्रविषयः ॥ इदंतुयौगिकंनाम ॥ अतएवभगवान्पतंजलिरपिगोनर्दीय
आहेति तत्रतत्रयौगिकंनामजग्राहेति । तन्ननामांतरेणाव्यवहारात्व्यवहारेप्येतन्नाम्नप्रसिद्धेश्चअभिवादनादौव्यावहारिक
नामोक्तौतेनेनदोषायेतितत्त्वं ॥ कूपखानकन्यायेनसमाधानंकेचिदाहुः ॥ सुधीरिति ॥ इदंस्वस्यग्रंथकरणशक्त्याद्याविष्करणा
य ॥ सुखमनायासः ॥ आयासेनभाष्यादितोपिबोधसंभवात् ॥ प्राचीनेति ॥ पाणिनेः ॥ ज्ञापकन्यायसिद्धानीतिपृथक्कोटिः ॥ अ
नेनपरिभाषासूत्रव्युदासः ॥ केचित्तुप्राचीनेत्याद्येकैवकोटिः ॥ ज्ञापकन्यायेत्यत्रप्रायेणेतिशेषः ॥ तेनवाचनिकानांसंग्रहइत्या
हुः ॥ भाष्येति ॥ इदंद्वयोर्विशेषणं । अनेनक्लिपाशपेत्यादिव्युदासः ॥ प्राचीनवैयाकरणतंत्रेवाचनिकत्वेनपाणिनीयतंत्रेज्ञा
पकन्यायसिद्धत्वेनभाष्यवार्तिकयोर्निबद्धानीत्यर्थः ॥ परिभाषेति ॥ परितोव्यापृतांभाषांपरिभाषांप्रचक्षते ॥ इतिकारिकायां ॥ लिं
गवत्त्वेसतिफलवत्त्वंपरिभाषात्वमितिकेचित् ॥ संज्ञाशास्त्रान्यत्वेसतिविध्यपेक्षितार्थविधायकत्वंतत्त्वं ॥ संज्ञाचपरिभाषाचेत्य
भियुक्तोक्तावतिदेशस्यपृथगुपादानंगोबलीवर्दन्यायेनेतिपरे ॥ व्याख्यानतइति ॥ पदच्छेदःपदार्थोक्तिर्विग्रहोवाक्ययोजना ॥

आक्षेपोऽयम् समाधानं व्याख्यानं षड्विधं मतं ॥ एकवाक्यतयैव नियम इति ॥ यथोद्देशपक्षे इति शेषः ॥ ननु उभयत्राप्येकवाक्यतायां
अविशेषे कोऽनयोर्भेदः ॥ नच स्वदेशे एकवाक्यता एकत्र परत्र च विधिदेश इति भेदः ॥ फलभेदाभावे एतस्याकिंचित्करत्वात् इत्य
तः फलभेदमाह ॥ त्रिपाद्यामपीति ॥ त्रैपादिकेन विधिना स्वसंस्काराय परिभाषोपस्थापनात् ॥ अदृश्यपिशाचेन आकर्षणदर्श
नात् ॥ पक्षद्वयसाधारणमिति ॥ अविशेषेण प्रवृत्तेरिति भावः ॥ प्रदेशैकवाक्यतया इति ॥ सर्वशास्त्राभिज्वलनं च एकवाक्यत
या संस्कारकत्वमिति भावः ॥ इदं चिंत्यं ॥ संस्कारमात्रस्यैव ज्वलनशब्दार्थत्वे बाधकाभावेनैकवाक्यतयेति निवेशमानाभावात् स्व
देशे गृहीतवाक्यार्थबोधस्य तत्र विधौ स्मृतिमात्रेण तत्तत्संस्काराभिप्रायेणैव एकदेशस्य इत्युक्तेरुपपन्नत्वाच्च ॥ एकवाक्यतया संस्का
रकत्वे हि अधिकारस्यापि नयात्वेन ततो विशेषाभिधित्सया तथोक्त्यसंगतिः ॥ प्रदीपदृष्टांतस्तु एवमेतत्स्वबुद्धिजननद्वारेणैतेनाग्र
न्थेन एकवाक्यतामन्तरात्वयैव योजितः ॥ स्वबुद्धिजननद्वारेतित्वदुपपादनं च एकवाक्यतायां नानुकूलं ॥ कार्यकालप
क्षे तवाप्येवमेव वक्तव्यत्वात् ॥ नहि तवापि कार्यकालपक्षे परिभाषाणां स्वदेशे वाक्यार्थाभावः ॥ बाधकाभावात् ॥ संज्ञाशास्त्र
स्यापि त्विति वक्ष्यमाणविशेषोक्त्ययोगाच्च ॥ नहि स्वबुद्धिरेकवाक्यतया बोधः ॥ किंतु स्मृतिमात्रं ॥ संस्कार्यविधीनामनेकत्वेन युग
पच्छ्रोतृबुध्यनारोहेण तावतामुपस्थानासंभवाच्च ॥ प्रधानेन तु गुणाकर्षणेऽपि गुणेन प्रधानाकर्षणस्यायुक्तत्वाच्च ॥ नहि प्रया
जादिवाक्यैः पूर्णमासादिवाक्यमाकृष्यते ॥ क्विंतिचेति सूत्रस्य कैय्यटस्य एकदेशिपक्षाशयवर्णनाय प्रवृत्तः ॥ इत एवारुच्या
भाष्येऽयथवेति पक्षान्तरमुपन्यस्तं तन्मस्तु विधिप्रदेशे एकवाक्यता संज्ञाशास्त्रस्य त्विति वक्ष्यमाणविशेषोक्त्या कार्यकालपक्षे

त्रि० गा० २

परिभाषाणांस्वदेशेवाक्यार्थबोधकत्वस्यतदभिमतत्वसिद्धेः॥ननुअसिद्धत्वस्योभयत्राविशेषेकार्यकालपक्षेएवत्रिपाद्यां
प्रवृत्तिरितिनियमेकिंबीजं॥नचतत्रस्वदेशेवाक्यार्थाबोधोबीजंपदार्थोपस्थितौनद्वौधेबाधकाभावात्॥नदेतदभिप्रेत्योक्तंपू
र्वत्रासिद्धमितिसूत्रेभाष्येयद्यपीदंनत्रासिद्धमितिइतिचेन्न॥कार्यकालपक्षेसंस्कार्योकांक्षयैवपरिभाषाप्रवृत्तिः॥यथोद्दे
शपक्षेतुसंस्कारकाकांक्षयैवेतिनियमांगीकारात्॥एतच्चोत्तरत्रविशेषेणनिरूपयिष्यामः॥एतावानिति॥परिभाषादेशेइतित
त्रैवेत्यर्थः॥परिकल्प्येति॥एकवाक्यतानाभवतीत्यर्थेसमानकर्तृकत्वाभावात्॥क्त्वानयुक्तइतिकेचित्॥विधिप्रदेशइति॥तत्रै
वेत्यर्थः॥आद्येकार्येदेशेविधिशास्त्रस्यद्वितीयेपरिभाषायाःस्वदेशेपृथग्वाक्यार्थोबोध्यः॥वाक्यतेति॥स्वदेशेपृथग्वाक्या
र्थबोधकत्वमेकदेशस्थत्वेनेत्रमितिभावः॥उक्तपक्षद्वयस्यसंज्ञापरिभाषामात्रविषयत्वेक्ङितिचेतिनिषेधसूत्रेकार्यकालपक्षो
न्वयोगइत्यतआह॥निषेधवाक्यानामिति॥तत्रेति॥निषेधसूत्रेइत्यर्थः॥पर्युदासन्यायेनेति॥क्ङितिनेत्यस्यतद्भिन्नेइत्यर्थेइति
भावः॥ननुप्रथमानान्यस्समभिव्याहृतासमस्तनञोनपर्युदासार्थकत्वंभूतलेघटोनइत्यतःभूतलभिन्नेघटइतिबोधाभावा
त्इत्यरुचेराह॥प्रसज्येति॥सहयुगपत्॥विधिनिषेधयोरेकवाक्यत्वासंभवादितिभावः॥नत्वयमिति॥संज्ञाशास्त्रार्थबोधं
विनाविधिवाक्यार्थबोधमात्रस्याप्यसंभवेनित्याकांक्षितत्वात्स्वदेशेवाक्यार्थइत्यर्थः॥तथाचतद्देशेवाक्यार्थबोधजनक राम० २
त्वस्यतद्देशस्थत्वेनतत्त्वेनतदभावेतदभावइतिभावः॥स्वदेशेवाक्यार्थबोधाभावस्यस्वदेशस्थत्वाभावेप्रयोजकत्वमुपपा
दयति॥असिद्धत्वस्येति॥ननुशास्त्रासिद्धत्वपक्षेस्वदेशेवाक्यार्थबोधाभावेपिसंज्ञाशास्त्रस्यकृतोमुत्वंनासिद्धमतआह ॥

कार्यार्थतयेति ॥ कार्यज्ञानं चेति ॥ अनुनासिकरूपकार्यज्ञानं चेत्यर्थः ॥ परिभाषायास्तु स्वदेशेपि पृथग्वाक्यार्थबोधेन स्वदेशः स्व
कार्यज्ञाने ॥ तद्देशस्थत्वस्येति ॥ स्वदेशस्थत्वस्येत्यर्थः ॥ असिद्धत्वादभावात् ॥ तद्देशस्थस्येति पाठो न युक्तः ॥ असिद्धत्वोपपादनं वैय
र्थ्यात् ॥ ननु पदसंज्ञाविषये यथोद्देशपक्षस्यांगीकारे त्रिपाद्यामप्रवृत्तिः स्यादत आह ॥ पदादीति ॥ आकृष्येति ॥ अन्ये तु संज्ञाशा
स्त्रस्य कार्यकालपक्षे स्वदेशे वाक्यार्थबोधकत्वं न युक्तं ॥ पदपदार्थोपस्थित्या च सामग्र्याः सत्त्वात् ॥ अन्याकांक्षायाः तत्प्रतिबंधक
त्वत्प्रामाणिकसंज्ञापरिभाषयोः कार्यकालपक्षे स्वदेशस्थता विधिदेशस्थता च ॥ अत एव क्क्ङिति चेति सूत्रे भाष्ये कार्यकाल
पक्षे तस्यांगाधिकारस्थतोक्ता तत्र विधिप्रदेशस्थत्वेन पौर्वापर्यमुख्यविरोधप्रतिसंधानादत्रैव संभवात् । तदभावेपा
ठकत्वमपि तेनायादिभ्यः प्रागेव प्रगृह्यसंज्ञेत्यादिभाष्यस्य तस्मिन्निति सूत्रस्थवक्ष्यमाणभाष्यस्य च नासंगतिः ॥ भादिसंज्ञावि
षये यथोद्देशपक्ष एवेत्यपि न युक्तं ॥ भस्येत्युपस्थितमिदं भवति यच्चिभमिति भाष्यासंगतेः ॥ रामाविन्यादाविति वक्ष्यमाण
त्व तत्प्रत्यासंगतेश्च ॥ किंच यथोद्देशपक्षे संज्ञाशास्त्राणां परिभाषाणामिव स्वदेशे विधिभिरेकवाक्यतायां त्रिपादीस्थेन तद
भावात् तत्र संज्ञा न स्यात् ॥ जातशक्तिग्रहेणेत्याद्यपि न ॥ तुल्ययुक्त्या गृहीतपरिभाषार्थेन त्रिपादीस्थकार्यसंस्कारापत्तेः ॥ षष्ठी
स्थाने योगेति परिभाषाया अपि शक्तिग्राहकत्वेन संज्ञाशास्त्रसमशीलतया तद्रीत्या तस्याः त्रिपाद्यामप्रवृत्त्युपपत्तौ तदभावापाद
नपरेण पूर्वत्रासिद्धमिति सूत्रस्थभाष्येण सह विरोधापत्तेश्चेत्याहुः ॥ ननु कार्य्ये कालो यस्येत्यर्थेन कार्यदेशस्थत्वमेवार्थः सं
पद्यत इत्याशंक्याह ॥ कार्येणेति ॥ लिंगचिह्नितेति तदधीनप्रवृत्तिकेत्यर्थः ॥ अत एवेति ॥ कार्यत्वेन स्वस्ववृत्तिलिंगचिह्नितपरि

त्रि॰ भाषाणामाक्षेप इत्यर्थपर्यवसानादेव॥ एतस्य यत्र कार्यं तत्रोपस्थितं द्रष्टव्यमित्युक्तमित्यनेनान्वयः॥ तावताप्यसिद्धिरित्यभि-
गा॰ प्रायके इति॥ संस्कार्यदृष्ट्या संस्कारकस्यासिद्धत्वेपि संस्कारकदृष्ट्या संस्कार्यस्यासिद्धत्वेन संस्कारासंभव इति आशयः॥ यत्र कार्य
२ मिति॥ संस्कार्यदृष्ट्या संस्कारकस्य दर्शनमात्रेण पिशाचन्यायेन संस्कारसंभव इत्याशयः॥ यत्तु पूर्वत्रासिद्धमिति सूत्रे कैयटे
नोक्तं॥ यद्यपीदमिति॥ यथोद्देशपक्षे॥ नत्विह सिद्धमिति॥ कार्यकालं संज्ञापरिभाषमित्यस्मिन्दर्शने संज्ञापरिभाषाणामत्यन्त
पारार्थ्यात्स्वातन्त्र्येण कार्यावगमहेतुत्वं॥ केवलमाचार्येण लाघवायानेकप्रधानांगभावप्रतिपत्तये एष यथोद्देशः कृतः तत
श्च तस्मिन्निति निर्दिष्ट इत्यनेन केवलेन न किंचित्क्रियते नाप्यज्झलोज्झलीत्यनेन न किं तर्हि संहत्य कार्यं क्रियते॥ ततोऽज्झल्य
नन्तरे पूर्वस्य सकारस्य झलः परस्येति वाक्यार्थः॥ इत्येकवाक्यतायां पौर्वापर्याभावादसिद्धत्वाभाव इति तत्र॥ तथा सति पौ
र्वापर्याभावादिदं तत्र नासिद्धमिति वक्तव्यं नत्विह सिद्धमित्युक्त्यसंगतेः॥ किंच स्वस्वदेशे परिभाषाविध्योर्वाक्यार्थबोधे प
श्चात्परिभाषादृष्ट्या त्रिपाद्या असिद्धत्वे नैकवाक्यतैव दुर्लभा॥ तथा च तयोरेकवाक्यतायां पौर्वापर्याभावादसिद्धत्वा
भावः॥ तस्मिंश्च सति तयोरेकवाक्यता इत्यन्योन्याश्रयः॥ तस्माद्यथोक्तमेव साधु॥ नचेति॥ यद्यपि तत्तद्देशस्थत्वं वार
यतीत्युक्त्यानेन च्छेकोस्थितिः॥ तथाप्यधिकं वक्तुमियं शंकेति न दोषः॥ विधिवाक्ये नैकवाक्यत्वाद्वा स्वदेशं विहाय पसि राम॰
वदेशांतरगमनाद्वा प्रदेशे स्मारादिबुद्धिजननाद्वा स्वदेशत्यागः॥ नाद्य इत्याह॥ नहीति॥ प्रदेशेषु विधिवाक्यविषये॥ ३
स्वबुद्धिजननेन॥ एकवाक्यतया स्वार्थबोधेन॥ अविशेषात्॥ विधिवाक्यैकवाक्यतायाः पक्षद्वयेप्यविशेषात् इतिफ

त्वितोर्थः॥ नद्वितीयइत्याह॥ नहीति॥ नतृतीयइत्याह॥ नापीति॥ अस्मदादिबुद्धिजननेन प्रदेश एकवाक्यैकवाक्यतयेत्यर्थः॥
नदेश एकवाक्यार्थबोधः स्वदेशत्यागे हेतुः॥ ननु तद्देश एवैकवाक्यता॥ अप्रयोजकत्वादिति भावः॥ अत एवेति॥ प्रदेशै
कवाक्यतायाः स्वदेशत्यागे प्रयोजकत्वादित्यर्थः॥ अन्यथेति॥ तत्र स्वबुद्धिजननमात्रेण तद्देशस्थत्वे इत्यर्थः॥ वस्तुत
स्तु उक्तरीत्या संज्ञापरिभाषयोः कार्यकालपक्षे प्रदेशस्थत्वमपि॥ नयोस्तत्पक्षे केवलं कार्यपारतंत्र्यात्॥ एकदेशस्थस्वस
वेशास्त्राभिज्वालकत्वं तु यथोद्देशपक्षाभिप्रायेण॥ पाणिनिपाठाभिप्रायेण वा॥ यथोद्देशे च तयोः स्वदेशे — कार्यैकवाक्यत्वे
पि प्रधानानुगुण्येनैव गुणानां तद्देशस्थत्वकल्पना न तु गुणानुरोधेन प्रधानशास्त्रस्य तद्देशस्थत्वकल्पना॥ किंच गुणेन न प्रधा
नाकर्षणमित्युक्तं॥ तथा च तेषां परत्वं व्याहन्येतेत्याद्युक्तं॥ कार्यकालशब्दोप्यत्रैव स्वारसिक इति दिक्॥ अनुबंधा अनेकांताः
॥ अनुबंधाः विधेयानवयवाः॥ विधेये कदाप्यनुपलंभात्॥ इत्यनुमाने व्यतिरेकव्याप्तिमाह॥ यो हीति॥ यथा वृक्षावयवशाखाया
अवच्छेदनात्पूर्वं तत्रोपलब्धिः॥ विधेय इति॥ अनुबंधविनिर्मुक्तपदार्थोपस्थितेरिति भावः॥ यद्वा बोधकानवयवत्वमेव साध्यं॥
न च हेत्वसंगतिः॥ बोधकानवयवत्वे बोध्यत्वविधेयत्वयोरपि सानुबंधके स्वं रूपमिति शास्त्रेण प्राप्तेः॥ केचित्तु उक्तानुमानेन बो
धकानवयवत्वमेव साध्यं॥ बोध्यबोधकयोरभेदाभिप्रायेण चायं हेतुरिति वदंति॥ अवयवत्वारोपेणेति॥ सामीप्ये बहुव्रीह्यन
भिधानादिति भावः॥ शिदादिपदं इत्संज्ञकः शकारादिर्यस्य समीपे तद्बोध्यपरं॥ व्याख्यानत इति॥ इत्थं च शब्दकारेणान्त्यत्वप्रयु
क्ते त्संज्ञाभाजां पूर्वोपकारकत्वं आदित्वप्रयुक्ते त्संज्ञाभाजां परोपकारकत्वमिति व्यवस्था॥ अत्र चेत्संज्ञान्त्यत्वप्रयुक्ता तत्र चादित्व

प्रयुक्तेति तु व्याख्यानतो निर्णयः॥ एकांतत्वे पि पूर्वस्य परस्य वाऽवयवत्वमित्यत्र नवापि व्याख्यानमेव शरणं इति तात्पर्यं॥ परसमीपे
ति कर्मधारयः॥ एकांता इति॥ बोधकस्येति शेषः॥ तथा चानुबंधा बोधकावयवाः॥ बोधके येन संबंधेन नोपलभ्यंते तेन संबंधेनान्यत्रानुप
लभ्यमानत्वात्॥ णितीत्यादौ नानतद्बोध्य इत्यर्थः॥ उक्तानुमानेन विधेयानवयवत्वसाधने सिद्धसाधनं॥ कस्मांतरे तु इत्संज्ञालोपाभ्यामप
हारेण सानुबंधकस्याविधेयत्वोपपत्तेरप्रयोजको हेतुः॥ अत्र त्वन्यशब्दादौ लक्षणानाश्रयणमेव लाघवमनुकूलतर्कस्तदिदमुक्तं॥
एवं तर्हि इत्यादिना॥ बोध्यबोधकयोरभेदाभिप्रायेणोक्तो हेतुरिति मतेनु विधेयतादशायां तत्रानुपलंभेपि उच्चारणदशायां तत्रोप
लंभादवयवत्वोपपत्तेरुक्तहेतुरप्रयोजकः॥ एतेन सत्प्रतिपक्षे कस्याप्यसिद्धेरित्येव न्याय्यमित्यसंगतमित्यपास्तं॥ कादेरिति॥
ददातीति सूत्रे विभाषाग्रहणेन णशपोरित्संज्ञाज्ञापनेन तयोस्त्याग इति केचित्॥ इदं चिंत्यम्॥ अन्यशब्दवदादिशब्देपि लक्षणयैवोप
पत्तेः॥ किंच हलंत्यमित्येतत्सूत्राविषयेऽनुबंधविनिर्मुक्तोपस्थितेरप्रामाणिकत्वेन विधेये कदाप्यदर्शनात्‌ इत्यनेकांतत्वसा
धकहेतोस्तत्राभावेन णादेरेकांतत्वमेव॥ केचित्तु नानुबंधकृतमित्यादिपरिभाषा व्याकरणप्रयुक्तलाघवानुरोधेनानेकांतत्
त्वेवमुक्तमिति वदंति॥ नानुबंधकृतमनेकालत्वं॥ एकांतत्व इति॥ विधौ निर्दिष्टो योनेकाल् स सर्वस्येति सूत्रार्थः॥ तेनानुबंध
विनिर्मुक्तपदार्थोपस्थितावपि न दोषः॥ लोपोपीति प्रकृते पुनर्लोपग्रहणसामर्थ्यात् घसो रिति लोपस्य सर्वादेशत्वसिद्धेर्नेतदृश्ये
मपि शिद्ग्रहणं॥ असंजातविरोधन्यायेनोत्तरत्रैवालोंत्यपरिभाषाबाधसंभवात्॥ वस्तुतस्तु विधीयमानो योऽनेकाल् इत्यर्थे
पि अनुबंधानामनेकांतत्वेपि च शिद्ग्रहणं व्यर्थमेवेति शंकायुक्तैव॥ शकारोच्चारणसामर्थ्यादाद्यभूतपूर्वानेकालत्वमादायांत्ये

ऽनेकाल्परे गौणमुख्यसाधारणावयवत्ववतोऽन्यपदार्थत्वमाश्रित्य सर्वादेशत्वसिद्धेः॥ ज्ञापकमिति॥ ननु ज्ञापितेऽपि पुनर्व्यर्थं॥ श
कारोच्चारणसामर्थ्यादेवानुबंधकृतमप्यनेकाल्त्वमादाय सर्वादेशत्वसिद्धेः॥ नचोच्चारणसामर्थ्यादित्संज्ञालोपावपि बाध्येयाता
मिति वाच्यम्॥ ज्ञापनात्पूर्वमपि तयोरबाधाय शित्ग्रहणसार्थक्यमिति तस्य न वैयर्थ्यं॥ यदि भूतपूर्वानेकाल्त्वमादाय सर्वादेशत्वं संपा
द्यते नन्वकृतार्थस्य शकारस्यानेनेत्संज्ञालोपबाधकत्वं तर्हि ज्ञापितेऽपि न यत्यत्वेहि॥ पुरावादौ तु विज्ञानीयानेकवर्णोच्चारणसामर्थ्यान्नेत्
त्वं॥ नाप्यस्याः प्रयोजनं॥ अर्वणस्त्रसावित्यादौ ऋकारस्यानुमर्थत्वे न भूतपूर्वानेकाल्त्वमादाय सर्वादेशप्रवृत्तेः॥ विधौ योऽनेका
कालित्यर्थे तु न मानमिति चेन्न॥ उच्चारणसामर्थ्येन भूतपूर्वानुबंधकृतानेकाल्त्वमादायापि न सर्वादेशत्वमित्यर्थस्य शित्ग्रह
णेन ज्ञापनात्॥ तेन दिव औदित्यादौ नानकारोच्चारणसामर्थ्येन भूतपूर्वगत्यानेकाल्त्वमादाय न सर्वादेशत्वं॥ नत्रापि तपराकर
णेतु तपाव्यर्थेति नतं॥ डादिविषये त्विति। केचित्तु अत्रानुबंधपदं न योग्यपरं॥ अत एव काणो विषये नानुबंधकृतमसारूप्यमिति
विकल्पाभावः॥ अनेकाल्सूत्रे शित्पदं न योग्यपरं॥ अत एव डा आ इति प्रश्लेषेण सर्वादेशत्वमुक्तं॥ अकारे इति वदंति॥ अ
नेजंतत्वादिति॥ नन्वादेच इति सूत्रे धातोरित्यस्य निवृत्त्या यां तस्यानेजंतत्वेऽपि ततः पूर्वमेजंतमादायात्वं सुलभम्॥ न चैधाञ्
वात्ववारणाय शित्करत्वयोग्यस्यैवैजंतस्यात्वमिति एकारसत्तायां नात्वं अनेजंतत्वादिस्य स्शित्करत्वयोग्यैजंतत्वाभावादित्यर्थं इ
ति वाच्यं॥ यल्लोपोत्तरं तत्त्वंभवात्॥ कथं चात्र तदंतविधिः॥ विशेष्याभावात्॥ नचोपदेशादृतस्य विभक्तिविपरिणामेन विशेष्यतया
तदंतविधौ समुदायोपदेश एव ऋषीणां तात्पर्येण एकारसत्वे उपदिश्यमानैजंतत्वं नेत्यात्वेनेति वाच्यं॥ तथा सति यल्लोपोत्तरमिति

पूर्वोत्तरग्रंथासंगतिरिति चेन्न॥ पलोपोत्तरं तदेवेदमिति प्रत्यभिज्ञया एकाचइत्यादाविवोपदिश्यमानस्यैजंतत्वस्य च सत्वेनादो॥
षइत्याशयात्॥ ज्ञापकमिति॥ माङो व्यतीहारे नभिधानं॥ एतद्भाष्यप्रामाण्यादिति भावः॥ विस्तरइति॥ यद्यपि उत्रिचपरइत्यत्रप
दग्रहणात्॥ घिसंज्ञासूत्रे नदीतरेह्रस्वोपादानपरभाष्यप्रामाण्यात्तस्यानित्यत्वसूत्रे अनित्यत्वज्ञापयेत्यत्र दीर्घेकृतेपि अप्राप्तो भूतपूर्वइ
तिभाष्यात् चानुबंधसहितशब्दोपादाने इत्संज्ञकतदवयवस्येत्यर्थः॥ स्त्रीलिंगप्रकरणेप्येवंशब्दरत्ने॥ कार्येत्यत्र चेत्संज्ञक
कार्यावयवकस्येत्यर्थः इति नयक्तिदोषः॥ तथापि तदनाश्रित्येदमित्यदोषः॥ अभिधानियामकेति॥ तत्वं च शक्तिसंकोचकत्वं
॥ तत्वं च तात्पर्यज्ञानस्य शाब्दबोधकरणत्वेन तद्ग्राहकत्वं तदभावे प्रकरणसहकृतात्पदज्ञानादर्थविशेषस्यैवोपस्थितत्वादर्थ
विशेषे शाब्दबोधप्रयोजकपदजन्योपस्थितिविषयतानियामकत्वं बोध्यं॥ त्यतेति॥ अर्थवत्त्वमनेनेत्यर्थः॥ तेनकनीत्यस्य सत्वे
पि न दोषः॥ अकृत्रिमस्यैवेति॥ सूत्रभेदेन कृत्रिमस्य वाकृत्रिमस्यैव साश्रयणेपि उभयगतिरागतैवेति भावः॥ शब्दार्थेतिद्वंद्वः॥
न बोधोपयोगीति॥ यद्यपि सकलादिशब्दानां सामान्यरूपेण शक्तिग्रहादेव शाब्दबोधः विशिष्य सकलज्ञानस्यासंभवात्॥ तथापि
रथादिपदानामिव विशेषरूपेणानेकार्थबोधकस्य वृद्ध्यादिशब्दस्य विशेषरूपेणानेकेषु शक्तिग्रह एव तेषां तथा शाब्दबोधोपयोगी
॥ शक्तिग्रहशाब्दबोधयोः समानप्रकारकत्वेनैव कार्यकारणभावांगीकारादिति न कश्चिद्दोषः॥ श्रयितेति॥ तृजंतः पाठः॥ क्रोते
तु निष्ठा शीङ् इति निषेधादेव गुणसिद्धेः॥ कार्यमनुभवन् यत्कार्यं प्रति यः कार्यी स तत् प्रति निमित्तं नेत्यर्थो बोध्यः॥ यद्यपि श्रि
ता अशिश्रियत् इत्यादौ कार्य्यानुभवितृत्वं इकारादेर्निमित्तत्वं च समुदायस्य॥ तथापि घटकतयापि निमित्तत्वस्य निषेधान्नदोषः॥
अनुभवतृत्वं

समवायीति ॥ तत्त्वं चात्र कल्पितं बोध्यम् ॥ इदं चिंत्यं ॥ कालसंयोगं प्रति कालस्याहेतुत्वेन जगत्प्रति ब्रह्मणस्तदुभयदर्शनात् ॥ केचित्तु अदृष्टकार्यस्थले समवायिकारणस्य निमित्तकारणत्वं ननेनश्चायसावित्यादौ एकादेशस्याचः परस्मिन्निति स्थानिवत्त्वमित्याहुः ॥ ध्वनितेति ॥ अचीत्यस्य जेघ्रीयते देध्मीयते इति च प्रत्युदाहरणं अस्याप्रतिकूलमिति नात्रैषा ध्वनिता ॥ दापेरिति ॥ परिभाषासिद्धेः पूर्वप्रविष्टरूपस्य निरर्थकत्वमित्याशयः ॥ बोध्यत इति ॥ घटकतयेति शेषः ॥ नदादिरिति ॥ अवयवावयववदिति न्यायस्तु समुदायावयवत्वेन गृहीतस्यावयवविषयकः ॥ प्रकृते तु रेफस्याकारावयवत्वप्रतिपत्तिकाले नाकारस्य रशब्दावयवत्वप्रतिपत्तिरिति भावः ॥ स्युस्तु लोष्टित्वमत्र ज्ञापकं ॥ यद्वाशेरते सधिषीढ्वेत्यादौ रुट्सुट्विधौ उद्देश्यतया परं परया वा आत्मनेपदलिङोराश्रयणं ॥ दास्यतीत्यादौ तु नैवं ॥ न ह्यैयर्थ्यमिति ॥ ननु तातु नास्ति कौकारार्थं तत् ॥ किंत्वाम्शब्दस्य कण्ठोष्ठ्यतया सावर्ण्याभावः ॥ किंच निर्दिश्यमानपरिभाषया नात्र दीर्घसंभव इति चेन्न ॥ आनस्य ऊँ इत्यननुनासिकादेशं विधाय दीर्घविधौ अक इत्यस्य पंचम्यंततां चाश्रित्य यदागमन्यायेनैव सावर्ण्यमुपपाद्य वैयर्थ्योद्भावनसंभवात् ॥ वस्तुतः सुकि कदाचिदौकारस्याविदीर्घस्य आवृत्त्या उ इति न्यासेन तत्सिद्ध्या नैतत्ज्ञापकं किंतु स्यसिच्सूत्रस्योपदेशग्रहणमेवात्र ज्ञापकं ॥ चुस्युटाविति सिद्धवचनसामर्थ्यादेव यण् न इत्यरुचेराह ॥ जहारेति ॥ यत्तु भैरवेणोक्तं तक्रकौण्डिन्यन्यायेन युटा बाधितस्य यणोऽनेनेति तदसंगतं ॥ विषयभेदेन तक्रकौण्डिन्यन्यायाप्रवृत्तेर्वक्ष्यमाणत्वात् ॥ असिद्धविषये पुकन्यायाप्रवृत्तेर्वक्ष्यमाणत्वाच्च ॥ यदागमन्यायेन लब्धस्य तत्परत्वेन न व्यावृत्तिरिति कृदन्तशेखरे ॥ असंगात्येति ॥ नतु वक्ष्यमाणो भविष्यामीत्यादावर्थमकारान्तोपदिश्यमान इत्यर्थ आवश्यकः ॥ किंच हन इत्याद्यर्थं तदंतविधिरावश्यकः ॥ अन्यथाऽ

त्रि॰ ग॰ ६

दुपदेशात्परत्वे नानुदात्तत्वापत्तेः॥ तथा च नात्र वर्णग्रहणं तास्यनुदात्तन्इति सूत्रे शेखरेप्येवमेवोक्तं॥ एरनेकाचइत्यत्र प्रत्ययावयवे
ऽचीत्यर्थः॥ यद्वाप्यस्योपदेशेऽदंतत्वमेव परागमन्यायलभ्यमिति एरनेकाचइत्यनोऽस्य वैषम्यं॥ न च जहिशात्रुमित्याद्यर्थं प्रत्ययाप्रत्यययोर्म
ध्ये प्रत्ययस्यैव ग्रहणमिति परिभाषाऽनुसर्तव्या॥ तथा च तनस्वहनइत्यादौ न दोषः॥ भविष्यामीत्यादौ तु समुदायोपदेशेऽवयवस्याप्यु
पदेशात्तद्दोषइति वाच्यं॥ तदंतविध्यभावे उक्त परिभाषया प्रत्ययस्यैव कारस्य ग्रहणापत्त्या वक्ष्यमाणइत्यादौ दोष स्तदवस्थ ए
वेत्यत आह॥ किं चेति॥ बोध्यतइति॥ यद्यपीदं परिभाषांतरं तथापीदमपि तद्ग्रहणे न गृह्यतइति अत्र घटकतयेति अस्या
नध्याहारेणैव तन्मूलकमेवेति भावः॥ यद्वास्तुग्विधानेन पूर्वं स्याद्वा स्या अपि वर्णग्रहणेऽप्रवृत्तिरेव ज्ञाप्या॥ वर्णग्रहणे पूर्वो
प्रवृत्तिकल्पनामात्रेण नुग्वैयर्थ्यापरिहारात्॥ इदं चिंत्यं॥ आगमानामागमिधर्मवैशिष्ट्ये मानाभावात् फलाभावाच्च॥ प्रस्तुतमि
दं वीत्यादिति सूत्रे भाष्ये परादित्वे हि षत्वं न पदइत्यत्र मोऽनुस्वारइत्यस्याप्राप्त्यापादनं न विरुध्यते॥ रामाणामित्यादौ पदांतस्येति णत्वनि
षेधापत्त्या तदनित्यत्वाश्रयणे महान् क्लेशः॥ पदांतभक्तः पदांतग्रहणेन ग्राहिष्यतेइति ङमुट्सूत्रस्य भाष्यस्यायमर्थः॥ यद्याग
मा इति न्यायेनाट्कुप्वाङिति सूत्रे नस्येत्यनेन ङमुट्सहितस्यैव ग्रहणात्कुर्वन्नास्ते इत्यादौ द्वयोर्नकारयोर्णत्वं प्राप्तं पदांतस्येत्यनेन न
वार्यते॥ द्वयोर्नयोः पदांतत्वेऽङमोऽपि पदांतत्वेन तावन्मात्रस्य णत्वं॥ पदांतस्येत्यत्र पदांतपर्यायस्याधिकरणीभूतस्येत्यर्थे तु न मान
॥ फलाभावाच्च॥ नस्येत्यस्य पदांतविशेषणतया नकारपर्यायपदांतत्वाश्रयणत्वनिषेधान्नराणामित्यादौ दोषः॥ तत्र च वर्णग्रह
णेऽपि स एव पदागमन्यायो भाष्याभिप्रेतइति दिक्॥ अस्याज्ञापकमाह॥ अतएव नेटिइति॥ अयमर्थइति॥ टिनइत्यत्र बहुव्री

राम॰ ६

हि:॥ आर्द्धधातुकइत्यस्यस्थानषष्ठ्यंतत्वाश्रयणपरमादृतनाविति सूत्रस्थभाष्यंत्वेकदेशपरमितिभावः॥ तत्त्वागइति॥ आवृत्याए
हरित्यादौ हिविधोपिस्थान्यादेशभावोविवक्षितइतिभावः॥ षष्ठ्यंतइति॥ अंतःशब्दः समीपवर्तीप्रकृतिवचनः सूत्रेषष्ठीशब्दः
तत्प्रकृतौलाक्षणिकः निर्दिश्यमानइतिवाध्याहारइतिभावः॥ तत्तुच्चारणंशब्दभेदात्तल्लक्ष्यस्यस्यतनिर्दिश्यमानत्वमतआह॥ स
जातीयमिति॥ अवयवरूपमिति॥ ननुनदोरित्यादौनद्यादीनामित्यादेर्नस्थानषष्ठीत्वमितिकथंतत्रैतत्प्रवृत्तिः इतिचेदत्रनव्याः॥ न
दोरितिस्थानषष्ठीबलेनोपस्थितैषांतत्रापिफलाभावाद्विशेषणेपर्यवस्यति॥ इतिवदंति॥ परेतुसर्वादिसूत्रस्थभाष्यतः यो
ग्येनतदान्वितेस्वार्थेपदानांशक्तिलाभेनस्वरूपमिति॥ शास्त्रातिरिक्तशक्तिग्राहकशास्त्राननुसंधानकालीनोपस्थितिविषयत्वस्ये
वनिर्दिश्यमानत्वेनतदोरित्यत्रश्चतदंतविधितः पूर्वंन्यदाद्यवयवनदोरेवोपस्थित्यातयोरेवनिर्दिश्यमानत्वान्नात्यदित्या
दौदोषइतिप्राहुः॥ नप्रतीयमानमित्येवपाठः॥ इत्यर्थइतिपाठेयुज्यते इत्यस्यपूर्वेणान्वयः॥ अयमर्थइत्यस्यचशाब्दोर्थ
इत्यर्थः॥ इत्यर्थइत्यस्यचार्थिकोर्थइत्यर्थः॥ धात्वादीनामिति॥ येनरूपेणप्रयोगघटकतातेनरूपेणपदोपस्थाप्यत्वंनिर्दिश्य
मानत्वं॥ धातुपदात्त्वम्वादीनांतेनैवरूपेणोपस्थितिरितिभावः॥ स्पष्टार्थमिति॥ अत्रद्वयोर्विरोधेनपरयाऽनेकाल्इत्यनयाऽस्य
बाधःस्यात्तेनोङित्वंसफलमितिकेचित्॥ विरोधादिति॥ यद्यपिविसर्गस्यनोच्चार्यमाणत्वं तथापिपूर्वोक्तरीत्यानिर्दिश्यमा
नत्वंनिर्वचनीयं॥ केचित्तुसंबोध्याघटितत्वेसतिसंबोध्यत्वंतत्वंइत्याहुस्तन्न॥ नचासंचाविन्यादिपूर्वग्रंथविरोधात्॥
भिंदकीत्यादौसाकच्कस्यहिशब्दाघटितत्वेनतत्वापत्त्यातदभावप्रतिपादकेनदुष्टत्वमित्यइति सूत्रस्थभाष्येणविरोधाच्च॥

त्रि॰ गा॰ ७

॥ इदं चिंत्यं ॥ वर्णग्रहणे इत्यस्याल्ग्रहणे इत्यर्थात् ॥ नापीति ॥ विधिप्रदेशे द्वयोरंगांगीभावे पि स्थानेऽन्येण द्वयोर्नेसः ॥ तेन परस्परनैर
पेक्ष्येण द्वयोः प्रवृत्तिसिद्धिः ॥ तत्रालोऽन्त्यस्येत्यनेनास्याः क्वचित्सामानाधिकरण्यं ॥ यथा णेरनिटीत्यादौ ण्यंतांगसंत्यस्यालो णेरित्य
र्थात् ॥ क्वचित् वैयधिकरण्यं ॥ यथा त्यदादीनामइत्यादौ ॥ तेन तानीत्यादौ न तु मः त्यदाद्यत्वं ॥ उदः स्थादितीति ॥ अस्मिन्नल
स्य इत्यर्थः ॥ सूत्रविषये इति ॥ उदः स्थेति सूत्रविषये इत्यर्थः ॥ उदः स्थेति सूत्रविषये इति पाठः सुगमः ॥ संचारितत्वादिति ॥ एतत
बाधकयोरपि एततत् बाध्ययदागमन्यायोपजीवनेनोदस्थादित्यादौ नयोः प्रवृत्त्या एततत् बाध्यत्वमिति केचिदाशय इति परे ॥ अकच्
विषये इति ॥ साकच्कानपहारकादेशविधावित्यर्थः ॥ अत्र मानमनाप्यक इति प्रतिषेधः ॥ फलं तु युवकाभ्यामित्यादौ आत्वसिद्धिः
॥ तदपहारके तु प्रतिष्ठत एवायं न्यायः ॥ यथाहुर्झल्य इति सूत्रे भाष्ये मिदं किमित्यादावकचिह्नित्वाभावान्न धित्वमित्याशंकितं ॥
कादेशत्वात्तस्या पुनः विधानसामर्थ्यात् साकच्कस्यापि प्रवर्तते ॥ अत्रेदं विचार्यते ॥ एषा ऽर्थवद्ग्रहणपरिभाषायाः बाधिकाउ
तत ॥ नांत्यः ॥ लावस्थायामडिति पक्षे अपिबत् इत्यादौ पिबादेशानापत्तेः ॥ स्यसिच्सूत्रे भाष्ये आगमसन्निधाने तद्ग्रहितस्यार्थ
वत्वाभावोक्तेः ॥ नाद्यः ॥ राजेः पृथक्भ्राजिग्रहणवैयर्थ्यात् वानरशब्दे नृनरयोरिति वृद्ध्यापत्तेश्च ॥ एवं धातुत्वप्रत्ययत्वाद्यपि
आगमसन्निधाने तद्ग्रहितेंगीक्रियते न वा ॥ नतावदाद्यः ॥ स्यसिच्सूत्रस्थभाष्यविरोधात् ॥ किंच ग्रहोलिटि इत्यत्र एकाच इत्य
स्य संबंधे अग्रहीष्टामित्यत्र शेखरोक्तदीर्घाभावापादनासंगतिः ॥ अटा रहितस्यैकाच्त्वात् ॥ नांत्यः ॥ धातोर्वृद्धिमटः स्मरेदिति
वार्तिकविरोधात् ॥ लावस्थायामडिति सिद्धांते ऽस्वादीत् इत्यादौ अतो हलादेरिति वृद्ध्यनापत्तेः ॥ न तु सूत्रं तु माङ्योगे चरितार्थं

राम॰ ७

॥ किंचाज्झसे इत्यादौ पूर्वो सदृत्यात्रासुकि जसः शीभावः स्यादित्याशंक्य निर्दिश्यमानपरिभाषया परिहृत्य यस्तर्हि निर्दिश्यते इ
ति पुनराशंकितं ॥ तत्रोक्तपक्षे ऽसंगतं निर्दिश्यमान जसोऽर्थवत्त्वाभावात् ॥ एवं यदागमन्यायस्य वर्णग्रहणे ऽप्रवृत्तौ मूलोक्तानि
दूषणानि प्रवृत्तौ लण्सूत्रस्य भाष्यविरोधः ॥ तत्र हि परेणाण्ग्रहणे चिकीर्षतीत्यादौ दीर्घे रपरत्वे इत्वाप्राप्तिमाशंक्य उपधा
याश्चेत्येवं भविष्यतीत्युक्तं ॥ त्वद्रीत्या तूक्तन्यायेन रपरत्वे ऋदंतत्वान्निर्दिश्यमानऋकारस्यैवेत्वे रूपसिद्धेः शंकाया असंगतिः
॥ अत्वत्वावर्णत्वयोरपि आगमसहिते एव सत्वेन समाधानासंगतिश्च ॥ अनित्यत्वादुक्तन्यायाप्रवृत्तौ इष्टस्थले प्रवृत्ते रावश्य
कतया तत एव मातॄणामित्यादौ उपधायाश्चेति इत्ववारणे नद्यर्थे धातुग्रहणावश्यकत्वोक्त्यसंगतिः ॥ किंच जहर्थेत्यादौ गुणे
प्यजंतसन्निपातेनाचः स्तात्त्वदिति सूत्रस्थस्य सिच्सूत्रस्थभाष्यं च विरुध्यते ॥ एवं निर्दिश्यमानपरिभाषया वर्णग्रहणे ऽप्र
वृत्तौ मूलोक्तं दूषणम् ॥ प्रवृत्तौ देवदत्ता तैत्यादावविपचमान इत्यत्रापि निर्दिश्यमानपरिभाषयासुकोदीर्घाभावेपि विशिष्ट
स्य सवर्णदीर्घे तद्वैयर्थ्यमिति पूर्वग्रंथाऽसंगतिरिति ॥ अत्र ब्रूमः ॥ निर्दिश्यमानपरिभाषया अर्थवत्परिभाषाबाधकत्वं नामा
गमप्रवृत्तेः पूर्वं मागामिनो यथाऽर्थवत्त्वं न तत्तमर्दवोध्यत्वादिति तदागमे जातेपि तथैवेति वार्त्तिके धातुग्रहणंसामर्थ्यात् तत्त्वेन इ
ष्टपरं ॥ हलादेरिति चातो विशेषणं यदागमन्यायस्तु वर्णग्रहणे न प्रवर्त्तते ॥ सस्सिच्सूत्रे उपदेशग्रहणात् ॥ पदांतत्वस्य वर्णमा
त्रवृत्तित्वाभावादेव न दोषः ॥ गुणादिसंज्ञा रेफरहिते एव ॥ वर्णग्रहणे उक्तन्यायाप्रवृत्त्या सरेफस्य गुणत्वाभावे ऽपि रेफस्यावच
नबोधितावयवत्यागेमानाभावेनावयवद्वारकानर्थमादायारारावेवेति नियमोपपत्तेः ॥ एतेन रदाभ्यामिति सूत्रस्थभाष्यमपि

त्रि॰
ना॰
८

व्याख्यातं॥ उत्सर्गसमानादेशा अपवादा इति न्यायेन निर्दिश्यमानपरिभाषापि नालग्रहणे॥ अत एवानुमानिकस्यान्यादेशभा
वेऽवर्णान्तस्य तुक् विधीयमानो नेकारमात्रस्येति दिक्॥ पदस्येति॥ अर्थतआन्तर्यवत एवादेशत्वे निर्णीते पदादिभिः आदेशैः स्थानु
रूपस्यान्याक्षेपसिद्धिर्नान्यथेति भावः॥ समानवर्ण इति॥ तत्फलं तु चरणस्य न पदादेशः॥ तस्य नस्मिन्नपुंसकत्वापत्तिः॥ कुत्सि
तान्वयेति॥ अन्वयव्यतिरेकौ यत्सत्त्वे यत्सत्त्वं यदभावे यदभावः तौ च प्रकृतिप्रत्ययादिति कल्पितावेवेति भावः॥ वर्णग्रहणेषु
नेति॥ अत्र मानं नेदमदसोरकोरिति सूत्रेऽकोरिति प्रतिषेधः॥ मुखमिवेति॥ शाखादिभ्यो यः॥ निपातनपदमिति॥ ननु चादी
नानयोपस्थित्या उपतिष्ठतां नाम तदाऽस्पषा॥ छन्दस्तु न तथेति कथं तत्र विशिष्टरूपोपादानं॥ किंच प्रकृतावारोपेण वर्तमाना
देवच्छिविधानेन तस्य न मुख्यगौणार्थौ संभवतः॥ किंचैवं निपातोद्देश्यककार्यमात्रे छन्दस्याग्रहणापत्तिरिति चेदत्र केचित्॥ चा
दिशेषविशिष्टरूपोपादानमात्रेण प्रवृत्तो परिभाषांऽशान्तरमनुगृह्णाति प्रकार्यान्तरेऽत्वनित्यत्वादस्याप्रवृत्तिरिति भावः॥ देवताद्व
न्द्व इति॥ अन्यतस्सहचरिते लोकविज्ञाने द्वन्द्वमित्युपसंख्यानं इति वार्तिकनिष्पन्नस्यात्र ग्रहणं॥ आन्सूत्रस्थकौस्तुभोक्तं दूषणं परिहर
ति॥ गोपाठयेति॥ अस्य पदकार्यविषयत्वे शूद्राचेति सूत्रे जातिग्रहणमपि लिंगं॥ ननु किमिदं पदकार्यत्वं॥ न तावत्तत्पदोद्देश्य
कत्वं॥ तद्धितविधावनुपस्थानापत्तेः॥ तेषां वस्तुतः सुबन्तात्प्रवृत्तावपि तदनुद्देश्यकत्वात्॥ नापि वस्तुतः पदसंबंधित्वं स्त्रीत्व
स्यापि तथात्वात्॥ त्वङ्गलत्यादौ त्वाद्यादेशानापत्तिश्च॥ नापि प्रत्ययानिमित्तकत्वं तत्॥ हरिताद्विभ्योऽञ इत्यस्यापि तथात्वेन
तत्रैव तस्याप्रवृत्तौ गोणीभ्योपि तेभ्यः फगापत्तिरिति चेन्न॥ अंगसंज्ञाऽनिमित्तकत्वे सति वस्तुतः पदसंबंधिकार्यत्वं तत्त्वमिति न

राम॰
८

कश्चिद्दोषः॥ अंगग्रहणादिति॥ इण इत्यस्य षीध्वमादिविशेषणत्वेन लुङ्धिध्वे इत्यादौ न दोष इति भावः॥ परस्परेणेति॥ एकेन यो
गेन संबंधेन निर्दिष्टानामिति विग्रहः॥ अत्र च ज्ञापकं सुबामंत्रित इत्यतः सुबित्यनुवर्तमाने सुप्प्रतिनेत्यत्र पुनः सुब्ग्रहणं॥ अ
संबंधार्थमिति॥ संबंधशंकावारणार्थमित्यर्थः॥ तावन्मात्राश इति॥ वस्तुतः संख्यापदे स्वरितत्वं प्रतिज्ञाय पुनरादिपदे न तत्प्र
तिज्ञानमेतन्मूलकं॥ क्वचिदादिमपरित्यज्यापि मेन प्रतिज्ञानं॥ सामर्थ्यादिति॥ योगविभागसामर्थ्यादित्यर्थः॥ ज्ञापयतीति॥
स्थालीपुलाकन्यायेन सूचयतीत्यर्थः॥ ज्ञापकमिति॥ ननु ज्ञापितेपित्यर्थलोपेन सिद्धेः अकारविधानसामर्थ्याद्दीर्घे रूपसि
द्धिरिति चेन्न॥ लोपस्यत्यकृतत्वात्वेति दीर्घापत्तेः॥ दिव उदिति॥ च्छ्वोः शूडित्यत्र क्किद्ग्रहणानुवृत्तिपक्षमाश्रित्येदं तदनुवृत्तिप
क्षे आह॥ ऋत उदिति॥ नन्वेवं ऊदुपधाया इत्येव सिद्धे दीर्घोच्चारणं व्यर्थमिति चेन्न॥ गुहेर्ण्यन्तात्त्वङि उपधाकार्यस्य हित्वात्
प्राबल्येन गुणे उत्वे णौ चङीति ह्रस्वाप्रवृत्त्यर्थत्वात्॥ कुरुत इत्यत्र उदिति तपरत्वेन गुणाप्रवृत्तिवत्॥ अत एव ऊदुपधाया
गोह इति सूत्रे उ ऊदिति प्रश्लेषेण गोह इति विकृतनिर्देशो भाष्यकृता प्रत्याख्यातः॥ अस्तु गूहदित्यर्थं प्रश्लेषस्यावश्यकत्वा
त्॥ न चोत्वे कृते णौ चङीति ह्रस्वस्य बहिरंगतयाऽसिद्धत्वेन बाधासंभव इति वाच्यं॥ उदिति दीर्घोच्चारणसामर्थ्येन उक्तभाष्यबले
न च बहिरंगस्याप्युपधात्वनिमित्तकह्रस्वस्य बाधकल्पनात्॥ प्रत्ययस्येतरविशेषणत्वेनेति। वर्णविशेषणत्वे इत्यर्थः॥ सकृदेवेत
दिति॥ पाणिनेत्स्वित्यादि॥ देवादेरिति॥ ततश्च रूपोपधात्विति लुगापत्तिरिति भावः॥ शब्दस्वरूपमिति॥ केचित्तु तदादेरित्यंशस्य वि
शेष्यतया तदंतविधिरित्याहुः॥ अंशमात्रेति॥ तदंतांशस्तु नोपतिष्ठते॥ लेखग्रहणेन सामान्यत एव समर्थ्यं तत्तयोपात्ते प्रत्यये त

त्रि॰
गा॰
९

दंत विद्धभावकल्पनात्॥ तेनक्रपि चेत्यादौ न तदंतविधिः॥ तत्र तदाद्यंशोपस्थितिफलं तु सुष्मद्देवदत्ताभ्यां इत्यादौ साम्प्रदायो
रितिनिषेधाभावः॥ कथंचित्फलं बोध्यं॥ एवमिति॥ प्रत्ययग्रहणे चेति निषेधस्तु तदंतांशमात्रस्येति भावः॥ एङ्ः नादिति॥ नन्वेवमपि
कतरदित्यादौ अतिप्रसंगस्तदवस्थः॥ तदादित्वस्य प्रत्ययावयवाकारांतेपि सत्वादिति चेन्न॥ तत्र तदादीत्यंशोपस्थितिसामर्थ्येन
समुदायावयवाघटितस्यैव तदादेर्ग्रहणात्॥ अंगसंज्ञायां प्रत्ययावयवाघटितस्यैव तदादेर्ग्रहणेनात्रापि तादृशस्यैव ग्रहीतुमुचि
तत्वात्॥ न विशिष्टादिति॥ विशिष्टस्य तु अर्थवत्सूत्रेण प्रातिपदिकत्वं॥ समासग्रहणं कृतनियमस्त्वेन। राजपुरुषावित्यादौ पु
रुषावित्यादेरिव गार्ग्यायणस्यानर्थकत्वेनार्थवदंतभावाभावात्॥ नियमस्य सजातीयापेक्षत्वेन परस्परसमानाधिकरणवृ
त्तिद्वयाघटित एव प्रवृत्तेः राज्ञः कुमारीं श्रित इति युगपत् वृत्तिद्वयकल्पनया प्रातिपदिकत्वं समुदायस्य स्फलभं अत्र स
मासत्वं प्रत्युक्तत्वमवयवस्य यद्यपि प्रातिपदिकत्वं कृत्तद्धितेति सूत्रेणास्ति॥ तथापि सुबुत्पत्तिः समुदायादेव॥ एकाच्च द्विर्व
चनन्यायात्॥ प्रत्ययमात्र इति॥ तत्फलं तु उगितश्चेत्यस्य प्राचीत्यादौ प्रवृत्तिः॥ अन्यथा उगितः यस्माद्विहितः तदादेरेवाभा
वात्॥ तत्र तदन्तापत्तिः॥ ननु प्रतीषि पतीत्यत्राभ्यासांतस्याङ्गत्वेनेतिदीर्घवारणायोत्तरखंडे प्रत्ययत्वाभावस्य शब्देन्दुशेख
रे उक्तत्वेन सन्त्वस्य प्रत्ययाप्रत्ययसाधारण्येन सनाद्यंता इत्यत्र कथमेतदुपस्थितिरिति चेन्न॥ प्रत्ययमात्रग्रहणे इत्यस्य
प्रत्यय धातूभयसाधारणरूपग्रहणात् इत्यर्थेनादोषात्॥ यद्वा सन्त्वस्य प्रत्ययाप्रत्ययसाधारण्येपि सनाद्यंता इत्यत्र प्रत्ययाधिका
रस्थस्यैव ग्रहणेनादोषात्॥ वस्तुतः द्विर्वचने सन् प्रत्ययत्वादि समुदाय एव नोत्तरखंडे इति सन्त्वं प्रत्ययमात्रवृत्ति॥ अत एव

राम॰
९

सुविनिर्दुर्भ्यइति सूत्रे कैय्यटेन विषुषुप्तुः इत्यत्र समुदायस्यैव रूपत्वमुक्तं॥ दयतेरिति सूत्रस्थं भाष्यंतु सागमकस्यैवसा
भ्यासस्य निर्दिश्यमानत्वाभावेन उत्तरखंडस्यैव नत्वेनोपपन्नं॥ अतएव भ्रस्जोरिति सूत्रे भाष्ये वरीभृज्ज्ञ्नेइत्यत्र रीकोरेफस्यलो
पमाशंक्योपदेशइत्यनुवृत्त्या समाहितं॥ अतएवोर्णुनुवत्तुरित्यादौ द्वित्वेउवङ्॥ अनुषस्यंदइत्यत्रानुविपर्यभिनिभ्यइति षत्वं घत्तेइ
त्यत्र दधस्तथोरिति भष्भावः॥ प्रतीषिषतीत्यत्राभ्यासस्य दीर्घाभावश्च सिद्धः॥ स्यादिष्विति सूत्रेन व्योक्तसुनोत्याद्यवयवस्ये
वनतु संबंध्यवयवस्यापि षष्ठ्यर्थत्वं॥ यद्वात्र प्रकरणेन नद्दानोरिव ——— नतदानुपूर्वीकस्यापिग्रहणमित्यादितु स्वरूपव्या
ख्यैवपराहृतं॥ प्रतीषिषतीति इत्यत्रोत्तरखंडस्य प्रत्ययाधिकारस्थत्वाभावेच उत्तरखंडस्य तनादिशेषस्योक्तं धातुत्वमपिनस्या
त्॥ भ्वादित्वाभावात्॥ ननु उत्तरखंडस्य प्रत्ययत्वाद्यनंगीकारे प्रतीषिषति इत्यत्र कथं सन्यत इति इत्वमिति चेन्न॥ सन्यत इत्य
त्र सनीत्यस्य निमित्तसप्तमीत्वेन सन्निमित्ताभ्यासस्येत्यर्थे नादोषात्॥ प्रत्ययाद्यसमभिव्याहारेतु अह्ह्यनेति दीर्घेण ईषिषतीत्य
त्रसाधु॥ आटिटदित्यादौ णिलोपस्तुण्यंतागस्यांत्यस्यालइत्यर्थे न स्फलभः॥ एवं च पूर्वं धातुः साधनेनेति सिद्धांते द्वित्वोत्तरं ने
विशरद्भ्यादीनां प्रवृत्तिः साधुसंगच्छत इति दिक्॥ यत्रेति॥ अपंचम्या इति प्रसज्यप्रतिषेध इति भावः॥ कार्यांतरविधानाये
ति स्वरूपकथनं॥ धातुनकारस्येति॥ स्वरूपइतिशास्त्रातिरिक्तसंज्ञाशास्त्रविनोपस्थाप्यत्वं निर्दिश्यमानत्वमिति नात्रसोप
तिष्ठते॥ अतएव रदाभ्यामिति सूत्रे भाष्ये रदाभ्यामिति किमर्थंचरितंमुदितं॥ ननु रदाभ्यामिति सूच्यमानेप्यत्र प्राप्नोति॥
नरदाभ्यां निष्ठा विशेष्यते किंतर्हि नकारो विशेष्यते इत्युक्तं॥ अन्यथा निर्दिश्यमाननिष्ठायाः रेफदाभ्यां परत्वाभावेनानिष्ठ

त्रि॰ गा॰ १०

संगवारणेनतदंसंगतिः सूत्रेतग्रहमप्युक्तार्थे एवसफलंनान्यथेतिदिक्॥ एकविषयत्वमिति॥ तदादिनदंतांशयोःसामा
नाधिकरण्येनान्वयेइत्यर्थः॥ ननुस्यतासीइत्यत्रधातोरित्यस्यस्यतासीभ्यामेवान्वयेनतयोश्चकार्यांतरविधानायानाश्रयणात्
तदंतविधिर्दुर्वारअतआह॥ स्यतासीति॥ यद्वात्र धातोरित्यस्यस्यतासिभ्यामेवान्वयेनलृलुटोः पंचम्यंतान्यत्वेनाऽनाश्रयणा
त् तदंतविधिर्दुर्वारोतआह॥ स्यतासीतिङ्याब्भ्यइत्यादाविति॥ ड्याब्वंशेनतदंतविद्धनापत्तिरूपोदोषइत्यर्थः॥ विशेषणत्वाभावा
दितिशेषः॥ उत्तमैकाभ्यामिति॥ सुपिचेत्यस्यसुबंतइत्यर्थेएतन्निर्देशासंगतिरितिभावः॥ परेत्वेवंसतिघरूपेत्यत्रापितदंतविद्ध्य
भावोपपत्तौउत्तरपदाधिकारेप्रत्ययग्रहणमित्युत्तरपरिभाषावैयर्थ्यंतस्मादयुक्तमेतदित्याहुः॥ कुमारीब्राह्मणीरूपेति॥ स्थितिप्रद
र्शनमेतत्॥ अन्यथापुंवद्भावेनोक्तरूपस्यदुर्लभत्वात्॥ उत्तरपदेति॥ परेतुलेखग्रहणेनसमभ्यंततयाप्रत्ययग्रहणेनतदंतग्रहणं
इत्येवज्ञाप्यते॥ उत्तरपदाधिकारइति विशेषणप्रयोजनाभावात्॥ तेनसुपिचेत्यादौनदोषःरात्रेःकृतिउपसर्गस्यघञीत्यादौतुसा
मर्थ्यात्तदंतविधिरित्याहुः॥ इत्यत्रैवेति॥ पुस्तकांतरेएतदग्रेइत्याशयइतिपाठस्तत्सिद्ध्यर्थंतदंतविधिद्वयस्वीकारइतिशेषः॥ के
चित्तुस्त्रीप्रत्ययेतदादिनियमोन॥ उपसर्जनेनतुसोस्तिइत्यंशद्वयवतीपरिभाषा॥ तत्रोत्तरांशस्येदमवतरणमित्याहुः॥ पदाम
त्वाभावेनचेति॥ पदादित्यस्यकुत्सनेचसुपीत्यतःप्रागनिवृत्तेरयुक्तमेतत्॥ कृत्स्वरेणेति॥ नन्वनेनतरग्रहणस्योदोःपूर्वपदत्वेपि
स्वरार्थत्वेउक्तपरिभाषाज्ञापकत्वासंभवेनतस्यासत्त्वाभावेकथमेतत्॥ उद्धतशब्दस्याकृदंतत्वात्॥ नचवनोरचेत्यादाविवतदंत
विधिद्वयांगीकारादेतदुपपत्तिरितिवाच्यं॥ एवमेवोपपत्तौउक्तपरिभाषावैयर्थ्यापत्तेः॥ गतिकारकेतरपूर्वस्यापिस्वरापत्तेश्चेति

राम १०

चेन्न॥ गतिरित्यस्यैवानुवृत्त्या पुनर्विधाने नोदात्तपूर्वपदत्वेपि स्वरसिध्यानंतरग्रहणस्य व्यवहितव्यावृत्त्यर्थत्वे निश्चिते तेनोक्तपरिभाषा
यां ज्ञापितायां नामंगीकृत्यैव कृत्स्वरेणोदात्तत्वस्य साधनात्॥ यद्वानंतरग्रहणस्य प्राचीनपरिभाषाज्ञापनपूर्वकं कारकादेव परमि
त्युक्तनियमेनाभ्युद्धृतमित्यादौ उदः स्वरप्रयोजनकत्वे अनेकप्रयोजनकत्वसिद्ध्या तत्परित्यागेनापूर्वपदस्वरमात्रप्रयोजकत्व
स्यान्याय्यत्वेन पूर्वकल्पितस्यैवाश्रयणमित्याशयः॥ अथवानंतरग्रहणेन परिभाषायां ज्ञापितायामभ्युद्धृतमित्यत्रोदः स्वरश्र
वणसिद्धेः। कारकादिति योगविभागेनापि संभव इत्याशयः॥ अपूर्वपदत्वेपि स्वरप्रवृत्तिरूपफलस्य परिभाषाज्ञापनोत्तरकालिके
न कारकादिति योगविभागेन सिध्यानन्तरग्रहणफलत्वाभावनिश्चयात्॥ ज्ञापनोत्तरं स्वस्मिन् चारितार्थ्यमात्रेण ज्ञापकत्वसंभ
वात्॥ तदेतदभिप्रेत्य वक्ष्यति व्यवहितनिवृत्त्यर्थमेवेति॥ परत्वादिति॥ उत्कृष्टत्वादपवादत्वादिति यावत्॥ यद्वा कृद्ग्रहण
परिभाषायाः अवकाशो व्यावलेखी व्यावचर्ची इति णच्स्त्रियामिति गतिपूर्वस्यापि णजंतत्वात् अत्र सति वृद्धिस्वरौ भवतः॥ अ
त्र हि प्रत्ययग्रहणपरिभाषा स्त्रीप्रत्यये चानुपसर्जनेनेति निषेधान्नोपतिष्ठते। न चात्र कृद्ग्रहणपरिभाषायाः फलाभावः अधिक
व्यवच्छेदार्थत्वात् स्पष्टं चेदं समासेन नञ्पूर्वे इति सूत्रे भाष्यकैयटयोः॥ अत एवेति॥ उक्तार्थकरणादेवेत्यर्थः॥ परिभाषाभ्यामि
ति। ननु गतिकारकोपपदानां इत्यस्य किमत्र कृत्यमिति चेन्न। संपूर्वात्कुटेरभिविधौ भाव इनुणित्यनेन इनुणि कुटिन्नित्यस्मात्प्रा
प्तसमासाप्यविभक्तिं बाधित्वा स्वार्थिकत्वेनांतरंगत्वात् अणिनुण इत्यनेन अण्प्रत्यये उकारस्य वृद्ध्यापत्तिः प्राक्सुबुत्पत्तेः
समासे अंतरंगत्वात् पूर्वं समासः॥ अण्प्रत्ययो हि प्रातिपदिकविशेषापेक्षत्वाद्बहिरंगः॥ अत्र संकुटिन्नित्यस्मात्समासप्रा

त्रि॰ गा॰ २२ तिपदिकारणप्रत्ययेसतीष्टंसिध्यति॥अन्यथेति॥उक्तार्थमनंगीकृत्यगत्यादिसमवधानेपिकेवलस्यग्रहणे॥केवलस्यक्तांतत्वेने
ति॥ननुगतिरनंतरइत्यत्रउक्तपरिभाषयागत्यादिपूर्वकस्यैवग्रहणेसूत्रस्योक्तिसंभवाभावः॥गतेःक्तांतपरत्वासंभवात्सामर्थ्यादुक्तपरि
भाषायाःअप्रवृत्तौअभ्युद्धृतमित्यादौअभेःकेवलक्तांतपरत्वाभावादेवस्वराप्रवृत्तौज्ञापितेप्यनंतरग्रहणवैयर्थ्यमितिचेन्न॥य
स्यगतेःप्रकृतिस्वरःकार्यस्तस्यैवसामर्थ्येनक्तांताप्रवेशकल्पनात्॥ननुकृद्ग्रहणेगतिपूर्वस्यग्रहणंज्ञाप्यतांकारकपूर्वस्यकथंज्ञा
प्यते॰उच्यते॰एकदेशानुमत्याप्राचीनपठितपरिभाषाज्ञापनात्॥यद्वाकारकांशेहीनेतिसूत्रेउपसर्गग्रहणंज्ञापकम्-इयंगतिरनं
तरइतिसूत्रेभाष्येस्पष्टः॥२७॥अतएवेति॥परमातिमहानित्यादौदीर्घस्येष्टत्वादेवेत्यर्थः॥२८॥अस्मापत्यमिति॥तदंतस्यचेतिपाठ
मनाश्रित्येदं॰तदाश्रयणेतुकुरुतइत्यादिबोध्यं॥तेनतुल्यमिति॥आर्थिकार्थकथनमेतत्॥वतिस्तुसप्तम्यतात्॥उपमेयेसप्तमीद
र्शनात्॥हरिष्विति॥ननुहरीएतावित्यादौईदंतत्वव्यपदेशभावःस्वसमुदायस्यसत्वेनसत्सहायत्वात्कथमत्रसः॥द्विवचनत्वसमा
नाधिकरणमीदंतत्वंनमुख्यमन्यत्रेतिचेन्न॥हरिष्वित्यत्रापिसुप्त्वसमानाधिकरणंसुबंतत्वमपिमुख्यंनान्यत्रेतितुल्यम्॥अथद्वि
वचनत्वंतुप्रविशेष्यतयानोपात्तइतिचेन्न॥तथापिभवतीत्यादौभूइत्यस्यकथमंगत्वं॥अंगसंज्ञायांसामान्यतःप्रत्ययइत्युक्तत्वे
नतिपोपिग्रहणासंभवेनतमादायमुख्यतदादिसंभवेनससहायत्वात्॥अथप्रत्ययपदेनशपोग्रहणेऽसहायत्वमितिचेदत्रा राम॰
पिशब्दस्वरूपविशेष्येणसुपएवग्रहणेऽसहायत्वमितिचेन्न॥शब्दस्वरूपस्यसमुदायावयवसाधारण्येनतद्विशिष्टस्यसुबंतस्यस २२
त्वेनससहायत्वात्॥प्रत्ययत्वस्यतुप्रत्येकंपर्याप्ततयातत्तद्व्यक्तेरेवग्राह्यतयाशपोग्रहणेऽसहायत्वमितिवैषम्यात्॥कार्यकाल

कै५

पस इति॥ यथोद्देशोनुस्यानिवर्त्यत्वेनैवप्रातिपदिकत्वसिद्धिरितिभावः॥ इदन्तूपलक्षणं इशब्दान्तयन्त्रिणोश्चेतिफक्सिद्धिश्चेतिबो
ध्यम्॰॥ शिलापुत्रकस्येति॰ वर्तुलादृषदः॰ अनेनचातिदेशेनाधाराधेयभावअवयवत्वतद्व्याप्याएवधर्मातिदिश्यन्तेनान्येति॥ ने
नप्रसक्तनयेत्यादाववस्त्रोपस्यासिद्धत्वात्स्यपिलघुपूर्वादित्यस्य नस्यात् इत्यर्थेकेनासिद्धवत्सूत्रस्थभाष्येणनविरोधः॥ लोके॰
दर्शनेननपूर्वोच्चारितत्वस्यानतिदेशात्॥ अपर्यालोच्यैनयेति॥ परेतुधात्ववयवस्यैकाचः प्रथमस्य द्वेस्तइतिद्वित्वविधावु
पात्ते॰ तत्रनिर्जीनेननतत्रितयोपेतंकिंचिदित्यसहायत्वैव॥ यथाहरी इत्यादौईइंतत्वद्विवचनाभावेनसा॰ तथाचनिजितिसमु
दायस्यैकाच्त्वेपिनधात्ववयवत्वंइकारस्यधात्ववयवत्वेपिनैकाच्त्वं॰ निशब्देइज्शब्देनयोः सतोरपिनप्रथमत्वमित्यस
हायतासुस्थैवेत्याहुः॥३०॥ अनस्येति॰ प्रत्ययांशानुवादत्वादेवेत्यर्थः॥ तद्रूपेणेति॥ उगिदृर्णान्यरूपेणेत्यर्थः॥ तेनावृद्धा
भ्यः नृप्यधकेत्यादौनतदंतविधिः॥ चरितार्थमिति॥ मटः प्रत्ययत्वमाश्रित्येदं॥ पतितेषुद्विजातीषुप्रविशत्यंतरोधरः॥ संप्र
विष्टेषुतत्रानुजायतेवर्णसंकरः॥१॥ तेनाहन्निति॥ वस्तुतः सूत्रोपात्तानादिशब्दस्यैवैषा॰ अन्यथारोणीत्यादीनांवनोरचेत्यादी
नांचकेवलेअप्रवृत्त्यापत्तेः॥ एतदर्थंतदंतविधौतस्यचेतिपाठेगौरवंनिष्कृष्यैकार्याभावाद्यभावेपिनद्धितस्त्रीप्रत्यययोः प्रवृ
त्त्याआजकरोणेनयापाठेअवयवादपिनद्धितापत्तिश्चेतिदिक्॥ अपवादोयमिति॥ तेनसामानाधिकरण्येनविशेषणविशेष्यभा
वस्यैवैषा॰ तेनेष्टुगमीत्यत्रस्तदप्रवृत्त्याइषाणेत्यत्रनकृत्वं॥ वाचनिकेति॥ यत्तुनस्यपीतिज्ञापकसिद्धेयंतिपाठकेनोक्तम्।
तन्न॰ प्रदायच्छत्रमित्यत्रतुकिइत्ववारणार्थत्वात्॥ नचबहिरंगत्वेनतुकोसिद्धत्वं॥ नाजानन्तर्येबहिष्ट्वप्रक्लृप्तिरितिनिषेधात्

त्रि॰ ॥स्वरूपेसतीति॥ननुतदर्थोपीत्यर्थः॥निरूपितमिति॥तत्रहिएवमुक्तं॥वलादेरित्यनुवृत्तविशेषणवत्समुदायस्यनकारेणविशे
गा॰ षणात्॥नकाररूपवलादेरित्यर्थइति॥परेतुआदिग्रहणाभावेवलिपरेआर्धधातुकस्येडित्यर्थापत्तिः॥विज्ञानीयइविभक्त्युच्चारणेवैय
२२ धिकरण्येनान्वयस्यौत्सर्गिकत्वात्॥नीषसहेत्यादौरुषरिषइतिपञ्चम्यानीतिसप्तम्याषष्ठ्यर्थनिर्णयेनरावणतृणायमन्येश्रीराम
इत्यादाविवसामानाधिकरण्येनान्वयः॥नीत्यस्यवलिविशेषणत्वंत्वयुक्तमितिस्पष्टमेव॥इडः सीत्यादौतुसीत्यस्यपदस्येत्यनेन
सामानाधिकरण्येनान्वयेत्वदुक्तरीत्यातदादिविधिभावेपितदंतविध्यापत्त्यानिष्टप्रसंगेनतद्वारणायतल्लोपसूत्रेभाष्योक्तस्यौत्सर्गि
कस्यपदस्येत्यस्यवैयधिकरण्येनान्वयस्वीकारेनतएवतदादिविधेरभावेनादोषादित्याहुः॥तद्धि इति॥द्वंद्वश्चेत्यत्रेषामेवसमाहारइ
तिनियमेएकवचनस्यदौर्लभ्यात्द्वैयर्थ्यमितिभावः॥तदेतद्ध्वनयति॥अतएवद्वंद्वश्चेति॥द्विवचनव्याहत्यर्थेतुनततिष्यएकानाराधु
नर्वसूद्वेतारेइत्याकरात्।नहैकस्मिकइति।केचित्तुसीरोदकेइतिभाष्यप्रयोगात्जातिप्राधान्यएवेदमित्याहुः॥नन्वेकशेषेणबहुव
चनसंभवात्जातिरप्राणिनामित्यस्यानुवादकतयातन्निवर्त्तनासामर्थ्यादितिचेन्न॥तिष्यपुनर्वस्वसमुदायस्यानेकत्वाभावात्॥युग
भेदेनतद्भेदकल्पनयातयाप्रयोगेतुनदृढतरमानंइत्याशयात्॥कार्यकालपक्षेइति॥आकडारीयसंज्ञासुयथोद्देशपक्षएवेति॥
पूर्वग्रंथेनेदंविरुद्धंइतिकेचित्॥एतदुदाहरणंचकारेति॥अत्रहिउरदित्यत्वेहलादिःशेषेसिद्धिः॥आनुमानिकस्यान्यादेशाभा राम॰
वमाश्रित्यतुननिर्वाहः॥अभ्यासस्यनिरर्थकत्वात्।नचस्थानिवत्सूत्रेशेखरेआरेत्यादाविवपुनरभ्याससंज्ञा।तयास्मरणसू २२
त्रे।नवमवत्वेवत्रेत्यत्रभाष्योक्तस्यसेनापितयानुदितस्यासंगत्यापत्त्याद्विरुच्चारणविषयस्यपूर्वस्यैवग्रहणात्॥ अधिकंशब्देन्दु

शेखरव्याख्यायां बोध्यं ॥ नन्वनन्यशब्दावृत्तिनातिदेशोऽयमिति प्रतीयते न तु न पुंक्तं ॥ भेद एवातिदेशांगीकारात् इति अत आह ॥ अन
न्यवदिति ॥ आदेशग्रहणमूलकोऽयमिति दीक्षितोक्तं खंडयति ॥ लोकेति ॥ अत एवेति ॥ लोकन्यायसिद्धत्वादेवेत्यर्थः ॥ शब्दैकदे
श इति ॥ अत्र हि अर्थस्यैवावधित्वं एष्टव्यं ॥ अर्थानामेवावधित्वस्येष्टत्वे सजातीयानामेवावध्यवधिमद्भावस्य प्रसिद्धत्वात् ॥ तेन प्राक्री
ताच्छ इत्यस्य सना समासइत्यादौ संबंधः ॥ अनुकरणत्वं च न शब्दस्वरूपार्थकत्वं ॥ शब्दस्यैवावधित्वमित्यापत्तेः ॥ किंतु तत्वेन प्रत्य
भिज्ञेयपरं॰ अत एव प्राग्दीव्यतीत्यत्र भाष्ये दीव्यतिशब्दे दीव्य तृ शब्दोऽस्ति तस्माद्दे पांचमीत्युक्तं ॥ तथा चैकदेशविकृतस्यानन्यत्वा
द्दीव्यतिशब्दो दीव्यत्यर्थ इत्यर्थस्यावधित्वमित्युक्तेन्यतःस्य तात्पर्यं किमर्थमिति ॥ दीव्यतेरित्यनुक्त्वा कृत इयं वक्रगतिरिति प्रश्नार्थः ॥
ज्ञापयतीति बोधयतीत्यर्थोऽत्र विवक्षितः नार्थापत्तिः ॥ अकृपरिमाणेति ॥ परिच्छिन्नपरिमाणेत्यर्थः ॥ यथा जराया इत्यादौ ॥ नन्वने
नन्यायेनैव सिद्धे स्थानिवत्सूत्रं व्यर्थमित्याशंक्याह ॥ यत्रेति ॥ यथा रामम् इत्यादौ मकारस्यानेन सुत्वाभावात् सुपि चेति दीर्घो न ॥ वि
कृतेति॰ यथा पंचव्रः नः इत्यादौ सुवंतत्वेन पदत्वम् ॥ तेनिष्ठेत्यादौ तिङ्‌ तिङ् इति निघातः ॥ अग्रुरित्यादौ सिजभ्यस्तेति जुस्भावश्च
सिध्यति ॥ नन्वेवं मघवत इत्यत्र स्थानिवद्भावेनान्नंततत्वात् श्वयुवेति संप्रसारणापत्तिरिति चेन्न ॥ अत इत्यस्यानुवृत्त्या श्रूयमाणा
वंतं एव नत्प्रवृत्तेः ॥ अत एव वरुश्चेत्यत्र न संप्रसारणं ॥ नन्वेवं गुडोदकमित्यादौ एकदेशविकृतन्यायेन दकशब्दे उदकशब्दत्वेन
स्थान ॥ अकृपरिमाणे एतत्प्रवृत्तेः ॥ किं च प्राग्दीव्यतीत्यत्राप्यकृपरिमाणसत्वेन तत्प्रवृत्तौ उक्तभाष्यासंगतिः ॥ किंच चकारेत्या
दौ अर्थे विकारसत्वेनाऽभ्यासत्वानापत्तिः ॥ अतः सिद्धांतनिष्कर्षमाह ॥ क्वचिदिति ॥ तथा च स्थानिवत्सूत्रे आदेशग्रहणात् ॥

सि· गा· १३ कृविद्देनतदनाश्रयणं इत्येवसारं ननत्वक्तपरिमाणइत्यादिप्रयुक्तमितिभावः॥भिंधकीति॥क्वचित्पुस्तकेभिंधीत्यत्रपरत्वान्नतङि·धि
भावोनस्यात् इतिपाठोदृश्यतेसतुनयुक्तः॥नानङः॥वैकल्पिकत्वेनतदभावविधिभावप्रसङ्गेप्येकरूपसिद्धेः॥अत्रवदंति॥विकल्पशा
स्त्राणामभावपर्यंतमपितात्पर्यं॥तथाचयस्यहलइत्यत्रभाष्यंसंघातग्रहणंचेत्तयस्यविभाषायांदोषोभवति॥समिधिता॥स
मिध्यिता॥यदालोपस्तदासर्वस्यलोपः॥यदाऽलोपस्तदासर्वस्यालोपःप्राप्नोतीति॥तथाचभिंधीतिपाठोपिसुयोजः॥शब्देंदु
शेखरेविप्रतिषेधसूत्रस्थोप्येवमेवयोजनीयइति॥अत्रोच्यते॥अभावपर्यंततात्पर्येपिविधिभावस्याभावेनाविरोधात्॥वि
प्रतिषेधासंगतिः॥किंचप्राप्तविभाषाणामेवाभावपर्यंततात्पर्यंनाप्राप्तविभाषाणां॥तथाचस्वरतीतिसूत्रेभाष्यम्॥यदिस्व
रतिरुदात्तःपठिष्यतेविप्रतिषेधःस्व रतेर्वेट्त्वादृतस्येतिविप्रतिषेधेनेतितन्नोपपद्यते॥किंकारणम्॥सविधिरयंविप्रतिषेधः
विधिप्रतिषेधयोश्चायुक्तोविप्रतिषेधः॥यदातुस्वरतिरनुदात्तःतदाविध्योर्विप्रतिषेधोपपत्तिरिति॥कथस्वविभाषेत्यस्यापिप्रा
प्तविभाषात्वात्तत्पर्यंततात्पर्यं॥अतएवमुमुक्षतेवत्सइत्यत्रनाभ्यासलोपः॥अन्यथामुचोऽकर्मकस्येत्यनेनाभावस्यापि
विधानात्॥तस्यचात्रलोपइत्यत्रात्रग्रहणेनग्रहणेतदापत्तिः॥ममतुहलन्ताच्चेतिकित्त्वेनाप्राप्तगुणविधानेनप्राप्तविभाषात्वा
भावात्॥नाभावपर्यंततात्पर्यमितिनदोषः॥एवंचप्रकृतेनानङोप्राप्तविभाषात्वेननाभावपर्यंततात्पर्यमिति॥नन्वेवंप्राप्तवि राम· १३
भाषायाअभावतात्पर्यकत्वेउभयथर्क्षुइत्यस्यापितथात्वापत्त्यारुत्वाभावेप्यत्रानुनासिकेत्यनुनासिकापत्तिः॥किंचद्वितीयतृती
येत्यस्यापितथात्वेनैतत्बाधितसमासाभावेनापवादेनबाधितस्यषष्ठीसमासस्यपक्षेनापत्तिरितिचेन्न॥अत्रानुनासिकइत्यत्र

पूर्वत्वस्य सावधिकत्वेनैतत्प्रकरणविहितकार्यापेक्षस्यैव तस्य संनिधानात् ग्रहणेनावध्यवधिमतोः साजात्यनियमेनाभावस्य तद्वधि
त्वासंभवादेव रूढत्वाग्रहणेनैतत्समीपे विहितत्वे लोपस्य तु वैजात्येप्यत्र प्रकरणे विधानसामर्थ्यादेवावधित्वात् रूढत्वं। षष्ठीसमासस्त्वन्यतर
स्याग्रहणसामर्थ्यात्सप्तसुलभः॥ यद्वा द्वितीयादीनि मध्यमां तेन निर्दिश्यन्त केनापि समासो विहित इत्यप्राप्तविभाषेषा॥ किंच भिंधीति
पाठे नानङा बाधितस्य धेः पुनः प्रसंगविज्ञाने भिंतादित्यस्य दन्तितलाजलिना भावांशे सकृद्गतिन्यायाश्रयणे भावांशे पुनःप्रसंगाश्रय
णे चार्धजरतीयमेतेति दिक्॥ सकृद्गतहृद्बाधितं तत्स्वेथा बाधितमेवेत्यर्थः॥ पर्यायेणेति॥ अत्र दृष्टान्तस्तृजादिवदिति॥ हेतुस्तु बाधकाभावा
दिति॥ यथेन्वारभ्यकार्यं करोतीत्यतो ग्रन्थः॥ दृष्टान्तेन हेतुप्रतिपादक इति न भ्रमितव्यं॥ तत्र लक्ष्यानुसारात्क्वचित्स्त्रीयदृष्टान्ताश्र
यणं॥ क्वचित्तौ क्रिकदृष्टान्ताश्रयणमिति तु तत्र ग्रन्थानुरोधात्॥ किंतु यथेन्वारभ्यतयेत्यंतस्यैको दृष्टान्तः॥ उक्तस्तत्र हि द्वयोस्तत्र्योरभा
वात्॥ एवमेव च भाष्यस्वरसाच्चतयोः पर्यायेणेत्यंतोक्तिस्तु उत्तरत्र युगपदित्यस्य नादिष्ठु चेत्यस्य व्यावर्त्यप्रदर्शनाय॥ अत्र च प्रेष्य
स्थानीयता संस्कार्यस्य लक्ष्यस्य तु तुल्यबलविरुद्धद्वयस्थानीयता तुल्यबलयोर्लक्षणयोरिति निबोध्यं॥ युगपदुभयोः संभवांशे चायं दृ
ष्टान्तः॥ नानादिष्ठु चेत्येतत्तु युगपदुभयासंभवे हेतुकथनाय न तु दार्ष्टान्तिकानुगमाय॥ अत एव चैतत्स्य विवरणं साकल्येने
ति॥ अनुबंध्य इति सानुस्वारः पाठः॥ अन्यथा र ध्यापनेः॥ प्रतिबध्यनिनेयायिकानां पाठः प्रामादिक एव॥ भाष्यसंमत मार्ग
एवेति॥ परं तु दृष्टान्तस्य संभावकत्वेपि नार्थनिश्चायकत्वं॥ अर्थनिश्चयस्तु हेतुत एव॥ तथा च विप्रतिषेधसूत्रस्य भाष्यस्य
हेतुविशेषपुरस्कृत्य न दृष्टान्तमात्रेणोक्तन्यायद्वयसाधनाय प्रवृत्तिः॥ किंतु तत्पुरस्कारेणैव तत्र प्रतिपत्तौ हेतुस्तुल्यबलत्वा

त्रि· दिति॥ अत्र शास्त्रीयदृष्टान्ताभावात्॥ यद्यागमनुभाविनि लौकिक एव दृष्टान्तो भगवता भाष्यकृता उपन्यस्तः पर्यायेण प्राप्तौ हेतुस्तु अ
गा· नवयवप्रसंगात् प्रतिपदविधेश्चेति॥ दृष्टान्ते हेतूपपादनमुखेन दार्ष्टान्तिके तत्संगमनमेव तात्पर्यात्॥ अत्र च दृष्टान्तस्तृजादिः तत्र च प्रति
१४ पदविधिरूपो हेतुर्व्यक्तिपदार्थपक्ष एवोपपद्यते॥ तथाहि व्यक्तिपक्षे पाणिनिपठितं शास्त्रं न साक्षाल्लक्ष्यसंस्कारकं॥ अनेकविषय
कत्वानापत्तेः किंतु यणो मय इति वह्निगमनाविरहात्॥ तत्तल्लक्ष्यविषयकानेकवाक्यकल्पकं॥ कल्पितैश्च तैर्लक्ष्यसंस्कार इति
क्रमः॥ एवं चात्र शास्त्राणां अनवकाशत्वलक्षणं प्रतिपदविधित्वं स्पष्टमेव॥ अत एव विप्रतिषेधसूत्रे भाष्ये ऽप्रतिपत्तिर्वोभयोस्तुल्य
बलत्वात्॥ तत्र प्रतिपत्त्यर्थं वचनमित्युक्त्वा तव्यदादीनां त्वप्रसिद्धिर्नेहि किंचित्तव्यदादिषु नियमकारि शास्त्रमारभ्यते॥ येन त
व्यदादयः स्युः॥ यश्च भवता हेतुर्व्यपदिष्टः॥ अप्रतिपत्तिर्वोभयोः तुल्यबलत्वादिति॥ स तुल्यस्तव्यदादिषु नैष दोषः॥ अनवा-
काशास्तव्यदादयः॥ उच्यन्ते च तव्यदादयः॥ उच्यन्ते च ते वचनाद्भविष्यन्ति यश्च भवता हेतुर्व्यपदिष्टस्तृजादिभ्यस्तुल्यपर्यायः प्राप्नो
तीति स तुल्यस्तव्यदादिष्विप्युक्तं न तु तृजादिभिरिति प्रतीकमुपादाय कैयटेनोक्तं आदिशब्दस्य प्रकारार्थत्वात् तृजादिभ्यस्तव्य-
दादयो न भिन्ना इत्यर्थ इति जातिपक्षे च शास्त्रस्य सर्वविषयकत्वात्तेनैव लक्ष्यसंस्कारात्तस्य चान्यत्र चारितार्थ्यात्त्वप्रतिपदविधि
त्वमित्याहुः॥ असंभवस्य वेति॥ न त्वेककार्यित्वमित्यर्थः॥ तत्फलमाह॥ यथेति॰ शाभावो नाशिषि चरितार्थः संज्ञानां त्वेकविष- राम·
याणामेव बाध्यबाधकभावः॥ आकडारादित्यनेन तादृशीनामेव परस्परमसमावेशबोधनात्॥ ह्रस्वान्ता गेति॥ यदागमन्या १४
यस्य तुम् प्रवृत्तस्तु नरं प्रवृत्तावपि अंगसंज्ञाविधौ तदादिग्रहणात्तां तस्यैवागत्वमिति भावः॥ परत्वादिति॰ ननु सार्वधातुके शप्

विधानात्· कृत एव नियमे विकरण इति तयोर्विप्रतिषेधानुपपत्तिरिति चेन्न॥ अविशेषात्सामान्यशास्त्रेण लस्याष्टादशसु तिबा
दिषु कृतेषु पश्चात् नियमेन लुगादिनेव जातनिवृत्तिरित्याशयात्॥ तिङ्·विधानमिति॥ तिङ्·विधानमित्यपपाठः परस्मैपदविधाना
त्॥ स्येपीति॥ परत्वादिति भावः॥ शबादिभ्यस्त्विति॥ शबादीनां सार्वधातुकनिमित्तत्वादिति भावः॥ यद्वेति इदं चिन्त्यम्॥ एकवाक्य
तया विधिरिति पक्षे लादेशानामपि प्रकृतिविशेषापेक्षत्वेन साम्यात्॥ अत्र पक्षे इति॥ दिग्योगलक्षणपञ्चम्यामित्यर्थः॥ भाविसंज्ञे
ति॥ तङानावित्यत्र चानशादिव्यावृत्तये लइत्यस्यानुवृत्त्या एकवाक्यतया विधिरिति पक्षे लस्यानेषाद्यनिवृत्तेरिति भावः॥ एक
वाक्यतया विधिरिति सिद्धान्तपक्षं परिष्कृत्य विकरणेभ्य इति प्रकृतपरिभाषाश्रयणपक्षं गौरवेण निराकरोति॥ भिन्नेति॥ वैय
र्थ्यापादनेष्टापत्तिं परिहरति॥ शास्त्रानर्थक्यमिति॥ इति गौरवमिति। एतस्य विहितानां नियम इत्यनेनान्वयः॥ यद्यपि पूर्व
स्मात्परं बलवदित्युत्तरं परान्नित्यं बलवदित्येवं पठितुं युक्तं॥ तथापि परं बलवदित्येतदपवादत्वादेतन्मध्ये पठितं॥ बीजमि
ति· ननु न्यायादपि प्रत्यक्षशास्त्रस्य बलवत्त्वेन कथं परान्नित्यादेर्बलवत्त्वमिति चेन्न॥ तुल्यबलयोर्विरोधस्यैव प्रतिषेधश
ब्दार्थत्वात्॥ नित्यानित्ययोरतुल्यबलत्वात्॥ यत्तु तत्र नित्यस्यावश्यकतयान्तरंगस्य ज्ञापनादिनापवादस्य वचनसाम
र्थ्यात् बाधकत्वे स्थिते तद्भिन्नोस्य विषय इत्याह॥ तुल्यबलेतीति॥ शब्देन्दुशेखरोक्तं तन्त्वयुक्तमेव॥ शब्दान्तरादित्यादीनां
फलानि मृग्याणि॥ एतन्मूलकमिति॥ कृताकृतप्रसंगीत्यत्र विशेषनिवेशमूलकमित्यर्थः॥ निमित्तमिति॥ प्रसंग इत्यर्थः
णौ चङीति॥ अत एवेति शेषः॥ तस्य चेच्छयान्यतरस्योभयस्य वानियाकत्वेनोल्लेख्यत्वादेवेत्यर्थः॥ तदसंगतिरिति॥ नन्वेन
म

त्रि॰ रंगत्वात्त्रयादेशेऽपि पुनस्त्रिस्त्रादेशेन न तत्संगतिरिति चेन्न। त्रयादेशवदंतरंगत्वात्त्रामीति दीर्घे पश्चात्त्रिस्त्रादेशेन स्यात् सिद्धत्वान्नदी
गा॰ र्घः स्यादिति तु व्याख्यानं भवति॥ लक्ष्ये लक्षणस्येति न्यायेन पुनर्दीर्घाप्रवृत्तेः॥ एतेनेति॥ अंगशब्देन शब्दरूपनिमित्तस्यैव ग्रहणेनेत्यर्थः
२५ अपरनिमित्तकत्वेनेति॥ इदं परनिमित्तत्वेन सादीनां बहिरंगत्वमिति वक्ष्यमाणं चायुक्तं प्रमाणाभावात् भाष्यविरोधाच्च। तथा हि।
नामीति सूत्रे आमीति न्यासे नित्यत्वाद्दीर्घत्वमापादितं॥ तद्रीत्या बहिरंगत्वात्तदसंगतिः॥ तथा ऋतो भारद्वाजस्येति सूत्रेऽवद्
त्वत्रोपदेशग्रहणानपकर्षे जहर्थ इत्यत्र परत्वाद्गुणे नजंतत्वाभावान्निषेधो न प्राप्नोतीत्युक्तं॥ तद्रीत्या गुणस्य बहिरंगत्वात्तदसं
गतिरिति दिक्॥ पचेरिति पाठः॥ पचेरन्निति पाठे तु अंगस्य संज्ञेति षष्ठीतत्पुरुषेण धातुसंज्ञा ग्राह्या। यणा बाधितत्वादिति॥ न
नु तदंतविधिपक्षे यणो बहिरंगस्य गुणेनैव बाधनात् कथमेतदिति चेन्न॥ तदंतविध्यभावपक्ष एवैतस्य प्रवृत्तेः॥ तदुक्तं॥
सिद्धांतेति॥ सप्तम्याद्यंततयेति॥ नन्विदं कथं प्रकृतभाष्याल्लब्धमिति चेन्न॥ यणो निमित्तांशे अधिकप्रवेशो गुणस्याप्युद्देश्यांशे
अधिकप्रवेशेन साम्यापत्त्यांतरंगत्वोपपादनासंभवात्॥ इति न युक्तमिति॥ वस्तुत इदमेव युक्तं॥ ज्ञापकं चात्र स्वरदीर्घयलो
पेष्वित्यत्र यलोपग्रहणम्॥ तद्धि वाय्वोरित्यत्र वलि लोपे स्थानिवत्त्वाय॥ वलि लोपेन त्वप्रवृत्तौ तु तयैव सिद्धे तद्वैयर्थ्यं॥ फलपचेरित्य
त्र तदप्रवृत्तेः॥ अन्यथा इयादेशस्य प्रकृतिप्रत्ययापेक्षत्वेन बहिरंगत्वाद्वलोपानापत्तिः॥ एवमस्मृतिरित्यत्र ऊठोऽसिद्धत्वाद्वलोपो
न॥ नाजानंतर्ये इत्यस्यांतरंगे कृते इत्यर्थे मानाभावो गौरवं च॥ वलि लोपे जातन बहिरंगसिद्धत्वाभावस्यैव कल्पनान्न तत्सूत्रस्यैत राम॰
ज्ज्ञाप्यविरोधः॥ किं चात्र संप्रसारणस्य वलोपापवादकत्वेन ततक्रन्यायेन पुनर्वलोपाप्रवृत्तौ नत्र वकारोच्चारणस्य चारितार्थ्यान २५

वचेत्यादौ लोपो दुर्वारः भाष्यमपि तन्मते असंगतं ॥ ननु पंचेत्यत्र षट्संज्ञायां नलोपासिद्धत्वस्य न फलमिति नलोपः सुविति सू
त्रस्थभाष्यासंगतिः ॥ बहिरंगासिद्धत्वाभावेन पंचेत्यत्र टाप्वारणाय तदावश्यकत्वात् इत्यत आह ॥ पंचेत्यत्रेति । सामर्थ्येने
ति ॥ इदं चिंत्यं ॥ प्रियपंचा द्रौ पदौ इत्यत्र डाप्डीपोर्निषेधायोक्तव्याख्यानस्यावश्यकत्वात् ॥ व्याख्यानसामर्थ्येनार्थविशेषकल्पन
स्य कुत्राप्यदृष्टत्वाच्च ॥ इत्यत्र हृद्यामिति ॥ ननु त्रिपाद्यां बहिरंगपरिभाषाया अप्रवृत्त्या कथमेतदिति चेन्न ॥ नलोपः सुविति सू
त्रे कृतितुक्ग्रहणाभावेन लोपस्य तुक्यसिद्धत्वाभावे त्रिपाद्यामप्रवृत्तिबीजस्यासिद्धत्वस्याभावात् ॥ ननु तत्कालप्राप्तिकमि
तिवत्प्राप्स्यमानमित्यपि निवेशनीयं वलिलोपसूत्रे भाष्येऽनया परिभाषया वलिलोपे प्राप्स्यमानसंप्रसारणासिद्धत्वोक्तेरित्यत
आह ॥ व्रश्चादिष्विति ॥ तदुद्देश्यमिति ॥ ननु परंपरया बहिरंगत्वानाश्रयणात्ताप्तिनेपि न चारितार्थ्यं संप्रसारणस्य भसंज्ञाद्वारैव
बहिरंगत्वात् इति चेन्न ॥ वहेर्णिजंतात्क्विपि ऊठ्भावाय भसंज्ञासिद्धप्रत्ययेन वाहो विशेषणेन साक्षादेव बहिरंगत्वात् ॥ न
तु ताप्तिनेपि पुनर्व्यर्थैव बहिरंगासिद्धत्वेपि अंतरंगस्य पूर्वरूपस्य सिद्धत्वेन तस्य गुणस्यासिद्धेः ॥ न च संप्रसारणाच्चेत्यस्य पू
र्वपरयोः पूर्वः शिष्यते इत्यर्थात् दोष इति वाच्यं ॥ अमि पूर्व इत्यत्रापि तथापत्तेः रामम् इत्यादौ सुपि चेति दीर्घापत्तेरिति चेन्न ॥ ऊ
ठ्ग्रहणेनैव कादेशस्य स्थानिसमाननिमित्तकत्वस्यापि कल्पनात् ॥ अत एव क्ङिति चेति सूत्रे भाष्ये औयत इत्यत्र वृद्धेर्बहिरंगत्वमु
क्तं असिद्धवत्सूत्रे भाष्ये पपुष इत्यादौ संप्रसारणशब्देन पूर्वरूपमुपादाय तस्य बहिरंगासिद्धत्वमापादितं ॥ ऊत्येजेत इति सूत्रे भा
ष्ये त्यदाद्यकारपदेन पररूपमादाय सन्निपातपरिभाषया तस्य टाप् निमित्तत्वमापादितं ॥ ननु कथमूठ्ग्रहणं ज्ञापकं प्रष्ठौह

बहिरंगासिद्धत्वमापादितमिति पुस्तकांतरे १

इत्यादौ उडिदमिति स्वरार्थं तस्यावश्यकत्वात् इति चेन्न॥ स्वरविधायके उहेरपि पाठ्यत्वात्॥ ह्रस्वपाठे नैकमात्रालाघवात्॥ वहेः क्वि
पोऽनभिधानमेतद्भाष्यप्रामाण्यात्। यद्वा ह्रस्व उठ् विधेयः॥ स्वरविधायके चठिदिति पाठेऽस्तु तस्मादूठ्विधानं अनन्यार्थमिति भाष्योक्त
ज्ञापकं सम्यगेवेति स्थिते॥ वाहेर्वेति॥ अत्र मानं चिंत्यं॥ णिलोपस्य स्थानिवत्त्वेन उठोऽत्राप्रवृत्तेः॥ विसर्जनीयसूत्रस्थकैयटमनु
वदति॥ येपीति॥ नादरणीया इति॥ परे तु कार्यकालपक्षे त्रिपाद्यामप्रवृत्तौ मानाभावः॥ न च पूर्वं प्रति परस्यासिद्धत्वादित्युक्त
युक्तिर्मूलं॥ पूर्वत्र कर्त्तव्ये परस्यासिद्धत्वेऽपि तत्र कृते परस्यासिद्धत्वे मानाभावात्॥ त्वयाप्येवमेव शब्दरत्ने उपपादितत्वाच्च॥ कर्त्त
शिवर्षिर्देवतयोरित्यादिनिर्देशाच्च कार्यकालपक्षे स्यास्त्रिपाद्यामप्रवृत्तौ गमकाः॥ अन्यथा विसर्गेतरदसंगतिः॥ न चात्र गुणविस
र्गयोस्तुल्यनिमित्तत्वेन नांतरंगबहिरंगभावः॥ विसर्गविधौ रेफस्य स्थानितयोपादानेनोत्तरपदसंबंध्येकवर्णनिमित्तकत्वं॥ गु
णस्य तु पदद्वयसंबंधिवर्णद्वयनिमित्तकत्वमिति तत्संभवात्॥ किंच सर्वथा सास्त्रिपाद्यामप्रवृत्तौ दध्यत्रेत्यत्र संयोगांतलोपाप्र
वृत्तये कार्जिरित्यत्र निष्ठानत्वाप्रवृत्तये नाकुटइत्यत्र विसर्जनीयप्रवृत्तये चानेकवचनारंभे गौरवं॥ एतेषूक्तकार्याप्रवृत्तये भा
ष्यवार्त्तिककाराभ्यां बहिरंगपरिभाषयैवोक्तत्वेन तदसंगतिश्च॥ विसर्जनीयसूत्रस्थमनोऽयुक्तोऽयं परिहारो न वा बहिरंगलक्षा
णत्वात् इति भाष्यं तु तस्य दोषः इत्यत्र लत्वग्रहणं कुर्वता वार्त्तिककृता पूर्वत्र कृतेऽपि परस्यासिद्धत्वांगीकारात् तद्दोषत्वं प्रति तत्परिहा
रस्यायुक्तत्वाभिप्रायकमिति न तद्विरोधः॥ अत एव प्रत्याहाराह्निके नानेमनिरित्यत्र णत्वं प्रति वृद्धिरसिद्धेत्युक्तं भाष्ये॥ किंच वा
र्त्तिके लत्वग्रहणं ज्ञापयते इत्यत्र लत्वे स्थानिवद्भावार्थं॥ अत्रैकादेशापेक्षया विशिष्टसमुदायनिमित्तकत्वमेव बहिरंगमिति न ब

समाधानात्५॥

हिरंगपरिभाषयासिद्धिः॥विसर्जनीयसूत्रस्थंतु एवमेषापरिभाषासिद्धाभवतीत्यंतमेवभाष्यंसिद्धांतयुक्तिः॥कुतोनुखल्वित्या
दित्येकदेशिनः॥पूर्वत्रकृतेपरस्यासिद्धत्वेमानाभावात् फलाभावात्पूर्वोक्तानेकभाष्यविरोधाच्चेतिप्राहुः॥अंतरंगेकर्तव्येजातबहिरं
गमसिद्धं इत्यंशेज्ञापकमुक्त्वातत्कालप्राप्तिकमसिद्धमित्यंशेज्ञापकमाह॥अतएवेति॥परमपीति॥अपवादोयद्यन्यत्रचरितार्थस्त
तिन्यायादितिभावः॥संबंधोत्तरमेवेति॥ननुसाधनसंभवात्पूर्वंक्रियाबोधकत्वाभावेनकथंधातुत्वमितिचेन्न॥धातोःसाधनयोग
स्यभाविनःप्रक्रमाद्यथा॥धातुत्वंकर्मभावश्चतथान्यदपिदृश्यताम्इतिहरिणैव॥समानाधिकरणात्॥अस्यार्थः॥यथाभाविसाधनसंबं
धाश्रयेणक्रियावाचित्वमाश्रित्यधातुसंज्ञोच्यते॥तथाचभावीषिकर्मत्वमाश्रित्यैषिकर्मत्वमुक्तं॥तथाभाव्युपसर्गसंबंधादुपक्रमप्येव
विशिष्टक्रियावाचनत्वंदृश्यतामिति॥कर्मणिलकारासिद्धिंपरिहरति॥उपसर्गद्योत्येति॥पूर्वंधातुरुपसर्गेणयुज्यते इत्यस्यैतदर्थेन
युज्यतइत्यर्थकस्यनप्रतिषेधइतिभावः॥एवंचेति॥साधनसंबंधात्पूर्वमुपसर्गद्योत्यार्थांतर्भावेणधातुनैवार्थाभिधानेउपसर्गा
र्थस्यपूर्वमुपस्थित्यापूर्वोपस्थितार्थनिमित्तकत्वरूपमंतरंगत्वंसुपठइतिभावः॥णत्वमिति॥इदंचिंत्यं॥त्रिपाद्यामंतरंगपरिभा
षायाअप्रवृत्तेः॥अंतरंगत्वात्सवर्णदीर्घइति॥वार्णादांगमितितुसमकालप्राप्तिकएवेतिभावः॥किंचेति॥पूर्वंतिङ्न्तविशिष्टेनैव
सामर्थ्यस्यात्॥विभक्तिसमवधानेतदंतरेणैकार्थीभावस्यकल्पनात्॥नत्वातिङ्ङितिनिषेधान्नदोषः॥गतिकारकोपपदानामितितु
एतत्सूत्रव्याख्यैकथनं॥नचलकारमात्रात्यन्यापिसंबंधोजातएवेतितदासमासोद्दुर्वीरः॥तिङ्पदेनतिङ्भाविनोपिग्रहणात्॥प्रति
पिपठिषतीत्यादौसमानकर्तृकादित्युक्तेः॥सनर्थसाधनेनैवप्रकृतेरपिनदाकांक्षाशांतेःसनेकार्थीभावात्तद्विशेषणत्वाच्चप्रकृ

त्रि· न्यर्थस्यनदुत्तरंप्रादियोगइतिनसमासः॥ नेर्विशइत्यादेस्तत्परत्वयोग्यत्वादित्यर्थः॥ अलंबहुनेति॥ परेतुसंबंधात्पूर्वंउपसर्गद्योत्यार्थत
गा· भावेणधातोर्वृत्तौउपसर्गाप्रयोगेहेत्वाभावात्॥ तदर्थेतिमतःप्रयोगेएवतदर्थप्रतीतिनियमात्॥ अन्यथाटावाद्यभावेपिखट्वादितःस्त्री
१७ त्वादिप्रत्ययप्रसंगात्॥ किंचैवंसतिसंचस्कारेत्यादौद्वित्वादितःपूर्वंसुडनापत्तिः॥ एवंचपूर्वंउपसर्गेणयोगोनामतदर्थसंबंधः॥ ततउपसर्ग
योगात्पूर्वंसाधनकार्ययोगः॥ ततउपसर्गयोगइतिमंजूषायांत्वयोक्तंतनउपसर्गार्थस्यक्रमादितएवप्रतीतावपिसाधनकार्यंहित्वादितःपूर्वं
सुपसर्गयोगाभावेनसंपरिभ्यांकृञःपरत्वाभावात्॥ तत्परत्वयोग्यस्यकृञइत्यर्थत्वेतुयदुपसर्गनिमित्तकंकार्यंइत्यादित्वदीयप्रयासवैय
र्थ्यंसंपरिभ्यामुपरस्यापिअभ्यासकृञःतद्योग्यत्वेनतस्यसुडापत्तिश्च॰ यदिसंपरिभ्यामितितृतीयातदाव्यवहितस्यापिसुट्प्रसंगः॥ एते
ननेर्विशःसंपृचेत्यादौनव्योकोपपत्तिःपरास्ता॥ अतएवगोसंदायइतिआदिसिद्धिः॥ अतएवचातोनुपसर्गेकइत्यत्रानुपसर्गइतिचरितार्थ
॥ तदेतदभिप्रेत्यसुट्कात्पूर्वःगतिर्गतिनावितिसूत्रयोःभाष्यकैयटयोःपूर्वंधातुःसाधनेनयुज्यतेइत्युपमृद्यपूर्वंधातुरुपसर्गेणयुज्यतेइति
सिद्धांतितं॥ हरिणाप्युक्तं॥ क्रियाविशेषाःसंघातैःप्रक्रम्यंतेतथाविधाः॥ कार्याणामंतरंगत्वमेवंधातूपसर्गयोः॥ साधनैर्यातिसंबंधंतथा
भूतैवसाक्रियेति॥ कथंतर्हिप्रत्ययःअध्येतेत्यादिसिद्धिरितिचेत्॥ पूर्वंधातुःसाधनेनयुज्यतइतिसिद्धांतादरेणेत्यवेहि॥ अयंचसिद्धांतोन
धातुलोपसूत्रेउपपदमतिङितिसूत्रेचभाष्यकैयटयोःस्पष्टः॥ अत्रप्रत्ययःणेरध्ययनेवृत्तमित्यादिनिर्देशागमकाः॥ अत्रचसाधनप राम·
दघातुप्रकृतिकप्रत्ययार्थपरंनत्वप्रकृतिकप्रत्ययपरंवा। तेनाभिषावयतीत्यादौण्यंतेनाभेर्धातुनासमासः॥ नाप्युपसर्गस्यभावनिष्ठा १७
समासः॥ नन्वेवंनेर्विशइत्यादौपूर्वंधातुरुपसर्गेणत्यस्यावश्यकतयातत्रोपपदमतिङितिसमासोदुर्वारइतिचेन्ननवापिसंचस्कारे

न्यादौसमासोऽदुर्वारइतितुल्यं॥ यदितुउपसंजनिष्यमाणनिमित्तोप्यपवादइतिन्यायात्पूर्वंधातुःसाधनेनेतिन्यायाश्रयणमपितुउपसंजनि
ष्यमाणन्यायानुग्रहायैव॥ नधातुलोपसूत्रेभाष्येप्रेद्धइत्यादौपूर्वंधातुःसाधनेनेतिन्यायाश्रयणमपिउक्तन्यायानुग्रहायैव॥ पूर्वंधातुरुप
सर्गेणेत्यादेरंतरंगत्वाद्गुणेउपसंजनिष्यमाणन्यायानुग्रहःस्फुटएवेत्युच्यतेनेनहिममाप्येतत्तुल्यमेव॥ ननुपरावनुपात्ययइत्यादि
विषयेपूर्वंधातुरुपसर्गेणेत्यस्यावश्यकतयापूर्वंसवर्णदीर्घपरायइत्याद्यापत्तिरितिचेन्न॥ विभिन्नकालिकयोरपिवार्णादांगंव।
लीयइतिन्यायांगीकारात् सुपथीःशेतेःपर्यायेइतिनिर्देशोप्यत्रगमकः॥ अतिप्रसंगस्त्वनित्यत्वाद्वारणीयः॥ ननुप्रत्ययइत्यादिरूपा
णामप्येवंसिद्धौपूर्वंधातुःसाधनेनेतिकिमर्थमितिचेत्तन्न॥ अध्यगीष्टेत्यादौअडागमस्यगाङादेर्दीर्घादितःपूर्वंप्रवृत्त्यर्थमित्यवेहीत्याहुः॥
यासुडंतरंगइति॥ अत्रपाठद्वयं॥ यासुडंतरंगइत्युत्तरं॥ एतेनेत्यारभ्यस्यादीनांबहिरंगत्वाच्चेत्येकः॥ काप्यनुल्लेखाच्चेत्युत्तरमतेनेत्या
दिरित्यपरः॥ तत्रद्वितीयःसुगमः॥ आद्येएतेनेत्यस्यविशेषापेक्षस्ययत्रसामान्यधर्मनिमित्तकत्वमपितत्रैवतस्यबहिरंगत्वांगीकारेणे
त्यर्थः॥ सिद्धांतिनेति॥ अन्तरंगत्वात्बहुव्रीहिरितिवदंतमपेक्ष्येषसिद्धांती॥ परमसिद्धांतीतुनैषद्विगुःकस्तर्हिबहुव्रीहिरितिवदन्नेवे
तिबोध्यम्॥ अन्यथेति॥ सामान्यापेक्षांतरंगोत्सर्गेणविशेषापेक्षबहिरंगापवादबाधइत्यर्थः॥ सूचितइति॥ तत्रहिअकृदितिअकृदि
तेत्यत्रेडपेक्षायांतरंगास्तांतंनामइत्युक्तं॥ परेतुविशेषापेक्षस्यबहिरंगत्वंपुंयोगादितिसूत्रस्थभाष्यप्रामाण्यात् तत्रहिसांकृटिनमि
त्यत्रविशेषापेक्षत्वेनबहिरंगमपिणित्तुणइत्यणंबाधित्वांतरंगत्वाद्भवतीतिसमासइत्युक्तं॥ तामादीनांप्रत्ययविशेषापेक्षत्वेपिद्रष्टःप्र
कृतिविशेषापेक्षत्वेननैत्यान्त्यपादःपदितिसूत्रस्थभाष्यविरोधः॥ यत्रतुविशेषापेक्षोपवादस्तत्रतेनैवसामान्यापेक्षस्यबाधइ

त्याहुः॥ पूर्वोपस्थितेति॥ पूर्वोपानेत्यर्थः॥ तेनचङ्·निमित्तत्वात्तिपएवपूर्वमुपस्थितिरितिनिरस्तम् वाप्योरित्यादाविति॥ वस्तुतस्तुवलिलो
 पेऽन्तरँपरिभाषायाअसत्त्वात्स्थानिवत्त्वेनात्रलोपनिवारणंभाष्यकृता॥ ननुजातस्यबहिरंगस्येत्यादितुनयुक्तं। नन्वेवमस्तुचूरित्युत्तरग्रंथ
 विरोधाद्ध्यत्रेत्यत्रसंयोगांतलोपस्यबहिरंगपरिभाषयावारणपरभाष्यासंगतेः॥ पपुषइत्यादौबहिरंगपरिभाषयासंप्रसारणस्यासिद्ध
 त्वेनातोलोपानापत्तिप्रतिपादकासिद्धवत्सूत्रस्थभाष्यासंगतेश्च॥ लोकन्यायसिद्धमंतरंगत्वमादायज्ञापकसिद्धपरिभाषयातदाश्रये
जातबहिरंगासिद्धत्वबोधनेबाधकाभावाच्च॥ नव्यमतेपि·दीक्षितमतेपि॥ एकादेशेति॥ अंतरंगानपिविधीन्वहिरंगोल्यप्बाधतइ
तितुअंतरंगनिमित्तविनाशकल्पनायएवप्राबल्यबोधकमितिभावः॥ नन्विणःपूर्वपदसंबंधित्वेअसिचदित्यस्यउत्तरपदत्वेनसाम्यदाद्यो
रितिअनेनैवषत्वाभावेसिद्धेषत्वग्रहणवैयर्थ्यमतआह॥ एकादेशस्येति॥ तेनेइति॥ अंतरंगइत्यस्यअनुवर्तनेनेत्यर्थः॥ अतएवेति॥
जातस्येतिनिवेशादेवेत्यर्थः॥ अतएवेति॥ अज्निरूपितमानंतर्यमनिवेश्याज्निष्ठानंतर्यस्यनिवेशादेवेत्यर्थः॥ अतएवअचःपरस्मि
न्नितिसूत्रेइति॥ नाजानंतर्येइतिपरिभाषामाश्रित्यतत्रजातस्येतिनिवेशापेक्षयैतत् भाष्येणैतदभावकल्पनमेवलघ्वितिभावः॥ इत्य
लमिति॥ परेतुननावत्तुग्रहणमस्यालिंगंत्वद्रीत्यैकादेशस्यपूर्वपदसंबंधित्वेनतुकोपिपरद्वयसंबंधिवर्णद्वयनिमित्तकत्वात्॥ प
त्ववत्। किंचधातूपसर्गयोःकार्यस्यसाधनयोगनिमित्तकार्यातिरिक्तकार्यापेक्षयांतरंगत्वस्यत्वयापूर्वमुपपादितत्वेनक्त्वाप्रत्ययस्यचा
साधनबोधकत्वेनतुगपेक्षयैकादेशस्यैवांतरंगत्वं॥ किंचसाधनकार्यस्यांतरंगत्वेउपसर्गयोगात्पूर्वंसाधनयोगेनपूर्वोपस्थिति
निमित्तकत्वंबीजं॥ प्रकृतेचतुकःउपसर्गयोगात्तरोत्पत्तिकल्यप्निमित्तकत्वेनतद्बीजाभावेनवहिरंगतयाततोप्येकादेशस्यैवांतरंग

त्वेपदद्वयसंबंधिवर्णद्वयनिमित्तकत्वेन बहिरंगत्वं तु न युक्तं। स च स्कारेत्यादौ हित्वादिनः सुट् इव अन्यथा तत्रापि हित्वादिनः सुटो बहिरंगत्वा
पत्तिः॥ मेद्वइत्यादौ तु पूर्वोपस्थितनिमित्तत्वेन निषेधस्यांतरंगत्वं॥ गुणस्यानंतरोपस्थितिनिमित्तकत्वेन बहिरंगत्वं॥ ननु पदद्वयसंबंधिवर्ण-
द्वयनिमित्तत्वात्॥ पदद्वयसंबंधिवर्णद्वयनिमित्तकत्वेन बहिरंगत्वं तु धातूपसर्गकार्यभिन्न एव॥ यत्र तु धातूपसर्गोन्यतरमात्रनिमित्तकमुभ
यनिमित्तकं च न तत्राद्यमेवांतरंगं यथा प्रत्यगित्यादौ संयोगांतलोपः॥ प्रकृते तु न तथा तुकोल्पनिमित्तकस्यासत्वात्॥ किंच षत्वतुको
रित्यत्र तुग्ग्रहणस्य फलं वृक्षस्य इः वृक्षेस्तस्य छत्रं वृक्षेछत्रमित्यादौ दीर्घात्पदांताद्वेति तुगभावः॥ न हि तत्रांतरंगत्वं तुकः॥ किंचा
धीत्येत्यादावप्यंतरंगनिमित्तविनाशकेनिनिवेशे मानाभावेनांतरंगानपि विधीन् बहिरंगो ल्यब्बाधत इति परिभाषयैकादेशं बाधि
त्वा ल्यपि दीर्घे तुकोः माममयोर्नित्यत्वात्परत्वादंतरंगत्वाच्च तुकः पूर्वं दीर्घे तुगप्राप्तेस्तदर्थं षत्वतुकोरित्यत्र तुग्ग्रहणम्॥ अत एव पराज
ग्ध्येति सिद्धं॥ अन्यथात्राप्येकादेशे जग्धिं बाधित्वा ल्यपि पश्चाज्जग्ध्यादेशे एकादेशस्यापि तेनापहारापत्तिः मम त्वेकादेशात्पूर्वं ल्य
पि अंतरंगमप्येकादेशं बाधित्वा प्रतिपदविधित्वेन जग्ध्यादेशेन त्सिद्धिः॥ यद्वात्र जग्ध्यादेशस्य पूर्वोपस्थितिनिमित्तकत्वेनैकादेशतो
ऽतरंगत्वं नित्यत्वं चेत्युक्तपरिभाषया ल्यपि एकादेशं बाधित्वा जग्धिसिद्धिः॥ तुकस्तु स्वत्रुत्तरमेव प्रवृत्त्यानंतरोपस्थितनिमित्तकत्वेन
बहिरंगत्वात्तः पूर्वमंतरंगत्वान्नित्यत्वाच्चैकादेशे षत्वतुकोरिति तस्यासिद्धत्वात्तुकः सिद्धिः॥ षत्वग्रहणं तु ज्ञापकमत्रैपादिकेऽ
तरंगेप्यनतत्प्रवृत्तेरुपपादितत्वात्॥ द्रुणः पूर्वपदसंबंधित्वेनेत्याद्ययुक्तं॥ अंतर्वज्ञावस्य कार्यार्थतयाऽतरंगपरिभाषाप्रवृत्तिविघट
नात्तदप्रवृत्तेः॥ न चावांतरसंभ इत्यत्रावाच्चालंबनाविदूर्ययोरिति षत्वेऽवाटोरेकादेशस्यासिद्धत्वार्थं षत्वग्रहणस्यावश्यकतयाक

शि. गा. १८ र्थवैय्यर्थ्यमेकादेशाषत्वस्यैवात्रबहिरंगत्वात्॥किंचपरासेधनत्वाद्दौषत्वाभावापत्तेत्॥अत्रोपसर्गादौरेकादेशस्यासिद्धत्वेनोपसर्गे
स्थेणःपरत्वाभावात्नषत्वं॥अतएवसहेःसाडःसइतिसूत्रेसहिग्रहणस्यसहअडेनसहितःसाडस्तस्यापत्यंसाडिरितिफलमुपन्य
स्यषत्वंतुकौण्डिन्यनेनखंडितंभाष्यकृतेनिवाच्यं॥ज्ञापकपरभाष्यप्रामाण्येनैषामनभिधानात्॥सहेःसाडःसइतिसूत्रस्थंभाष्यंतुपूर्वप
क्षयुक्तित्वान्नार्थसाधकं॥सहेरितिसूत्रस्थभाष्यानुरोधेनविप्रतिषेधसूत्रस्थज्ञापनवर्णनेनैवैकदेशयुक्तिः॥किंतुवाचनिकोषेतिवाक
ल्पनीयं॥अतएवांतरंगइत्यस्यात्रानुवृत्तिः॥अन्यथास्याःषत्वंतुकोरसिद्धइतिसूत्रस्ययातदसंभवः॥अजानंतर्यपदेनचाजनिरूपि
तमेवानंतर्येनत्वजनिष्ठमन्यनिरूपितंहूस्वस्यपितिइतिसूत्रस्थभाष्यानुरोधात्धर्मिग्राहकमानाच्च॥नलोपःसुपितिसूत्रेकृतितु
ग्ग्रहणंतुपरंपरयानिमित्तत्वमाश्रित्यबहिरंगत्वाश्रयणेतुनमानमितित्वयेवपूर्वमुक्तत्वेनबहिरंगपरिभाषायाअप्राप्त्याऽवश्यकं
नलोपःसुपितिसूत्रेभाष्यकृतासन्निपातपरिभाषयासिद्धिमाश्रित्यनत्वंडुनेनप्रदीपकृतोक्तभाष्यपरिहारस्योपायांतरोपलक्षण
तयाबहिरंगपरिभाषयाचतस्यखंडितत्वेनताभ्यांखंडितेनचार्थांतरोपेक्षायाकर्तुमनुचितत्वाच्च॥अक्षद्यूरित्यादावूठोसिद्धत्वाद्धु
लिलोपापत्तिरितितुवलिलोपेंतरंगपरिभाषायाःप्रवृत्त्यासमाहितंपूर्वत्रेतिप्राहुः॥५२॥बहिरंगमिति॥ननुअंतरंगपरिभाषायां
अंगशब्देनसमस्यंतपंचम्यंतान्यपरोपात्तस्यैवयेनविधिरितिसूत्रस्थभाष्यप्रामाण्येनग्रहणात्कथमेतदितिचेत्सत्यं॥अतएव राम.
प्रागुक्तमयुक्तमित्यवोचाम॥इकोयणचीत्यत्रतदंतविधिपक्षेस्योनइत्यत्रगुणापादनभाष्यंतुकैय्यटरीत्यापरत्वाभिप्रायकंत १९
त्रोनशब्दमाश्रित्येत्यादियुक्तिस्तुयणउद्देश्यांशेगुणापेक्षयाउनापेक्षत्वेनप्रतीतांतरंगत्वनिवारणाय॥गुणस्ययणपेक्षयानिमि

नांशेन्यूनापेक्षत्वेन समीकरणाभिप्रायेणेति नयेन विधिरिति सूत्रस्थभाष्यविरोधः॥ व्यर्थो सेति॥ इति पूर्वे सिद्धे इत्युत्तरं॥ नवममादिना
धनार्था॥ तत्र चोत्सर्गसमानदेशाद्यन्येव सिद्धेः इति शेषः॥ ननु ज्ञापितेपि संपूर्णसूत्रमेव पुनर्व्यर्थं॥ त्वमावित्यत्र विभक्तिपदानन्नुवृ
त्यानेनैव सिद्धेरिति चेन्न॥ त्वडिन्त्थः पुत्रो यस्येति विग्रहे युष्मड्डित्यपुत्र इत्यत्रन्त्वादेशाभावाय तत्र विभक्तावित्यस्यावश्यकत्वात्॥
तदाशय इति॥ मपर्यंतानुवृत्तिर्ज्ञापिकेति वदतो भाष्यकृत इत्यर्थः॥ वाचनिक एवेति॥ ननु प्रत्ययोत्तरपदयोरिति सूत्रे उत्तरपदग्र
हणमत्र ज्ञापकमस्त्विति चेन्न॥ आतो लोप इटि चेत्यत्र कैय्यटरीत्यास्वविरुद्धधर्माक्रांतस्यैव समुच्चयोगीकारेण प्रत्ययपदस्य
विभक्तिभिन्नप्रत्ययपरत्वात्॥ अत एव प्रत्ययोत्तरपदयोरिति सूत्रे भाष्यकृतानवादिवाधनार्थत्वेन शंकितं। त्वद्रीत्यानुत्तवाद्यादेशा
नामेव तदपवादत्वेन तदसंगतिः॥ परे तु उत्सर्गसमानदेशा अपवादा इति निर्मूलं भाष्ये क्वाप्यनुल्लेखात्॥ असिद्धवत्सूत्रस्थभा
ष्यं तु तत्रैव कैय्यटेन प्रकारांतरेण योजितमिति न तन्मूलं॥ युष्माकाद्यादेशविधानं तु न तद्ज्ञापकं॥ साकच्कफलभेदात्॥ प्रत्य
योत्तरपदयोरिति सूत्रस्थभाष्यस्यायं भावः॥ प्रत्ययपदमुक्तरीत्या विभक्तिभिन्नप्रत्ययपरं॥ तत्र च तवाद्यपवादत्वं न तत्र कौ
ड्डिन्यन्यायेन तत्तदुद्देश्यतावच्छेदकस्य तदुद्देश्यतावच्छेदकाव्याप्यत्वात्॥ किंतु उत्के दिन्यादावेव सिद्धस्य पुनरनुवादसाम
र्थ्येन बाधमात्रं॥ एवं च लाघवात् त्वमाविति विहितस्यानुवादेन निमित्तमात्रसमर्पकं विधानं तु नेनैव यथा वनोर चेत्यादौ॥
न हि तेनैवमपर्यंतस्यादेशसिद्धेस्तदनुवृत्तिर्वैयर्थ्यं॥ न च मपर्यंतानुवृत्तिरनुवादकत्वार्थो॥ अन्यथा सर्वादेशार्थतया विधाय
कत्वापत्तिरिति वाच्यं॥ द्विगुरेकवचनमित्यस्यापि तद्द्वितार्थद्विगोर्विधायकत्वापत्तेः॥ यदि च लाघवात्तत्र तथा॥ प्रकृतेपि त

त्रि॰ गा॰ २०

हि तथाप्यन्वेहि॥ यदि तत्सार्थक्यायापूर्वविधायकत्वं तर्हि न तद्बाधनार्थत्वं तद्बीजस्यानुवादकत्वस्याभावात्॥ तत्र कौण्डिन्यस्या
यस्य चोक्तरीत्याप्रवृत्तेः॥ तथा चान्तरङ्गत्वात् तद्बाध एव न योर्बाधकाइति व्यर्थं सत् स्याज्ज्ञापकं॥ एवं च सूत्रमेव ज्ञापकं तमपर्यन्ता
नुवृत्तेः॥ अत एव भाष्ये युष्मत्रान्ये एकवचनादेशाः स्युः मपर्यन्तानुवृत्तिरनर्थिका स्यात् इत्युक्तं॥ एकवचनादेशा त्वादयो
यदि बाध्याः स्युरित्यर्थः॥ एवं च मपर्यन्तानुवृत्तेस्त्वादि बाधकत्वाभावमात्रप्रयोजकत्वं स्पष्टमेवोक्तं॥ तथा च भाष्यरीत्यापि ज्ञाप
कसिद्ध एवायमर्थ इत्याहुः॥ शंकापरेति॥ बहुष्वित्यस्य बहुवचनेष्वित्यर्थमाश्रित्येदं प्रवृत्तम्॥ अशक्यत्वादिति॥ इदं समाधान
मित्यनेनान्वयी॥ इदं चिन्त्यं॥ सामासिकलुकोऽप्येवं बलवत्त्वाभावे भाष्यासंगतेः॥ परे तु अन्तरंगानपीत्यपि घटितः पाठो न कुत्रापि
भाष्ये दृश्यते॥ अत एव स्वमोर्नपुंसकादित्यत्रापि घटितः पाठः केषांचिन्मते नोपन्यस्तः कैय्यटेन॥ तथा च बहिरंगलुक एवानेन
बलवत्त्वं॥ अत एव तद्राजस्येति सूत्रस्थभाष्यं संगच्छते॥ सामासिकलुको बहिरंगत्वेन तद्राजलुग्बाधकत्वात्॥ अत एव स्व
मोर्नपुंसकादिति सूत्रे त्यदादिभ्यस्त्वेति भाष्ये पठितं बहुशो भाष्यग्रंथा अप्यत्रानुकूलाः॥ एङ्ह्रस्वादिति सूत्रस्थभाष्यं त्वेकदेश्यु
क्तिः॥ बहुभाष्यविरोधात्॥ अत एव त्रिचतुरोरिति सूत्रस्थं प्रियत्रिस्र इति भाष्यं संगच्छते॥ शब्दान्तरादिति न्यायेन लुकोऽप्यनित्य
तया परत्वान्निसंभावप्रवृत्तेः॥ अत एव च भवतादिति सिद्धिः॥ अन्यथाऽनेन न्यायेन हेर्लुकि तदसिद्धिः॥ मम तु शब्दान्तरस्येति राम॰
न्यायेन लुकोऽप्यनित्यतया परत्वान्नानङ् सिद्धिः अत एव तं ब्राह्मणकुलमित्यादौ लुकं बाधित्वाम्॥ सनीस्रंसदंस्वादावपि लुक् २०
बहिरंग एवेति न दोषः॥ सुपथि वनमित्यादौ नुक्तनाक्कृतप्रसंगित्वमात्रेण नित्यत्वाल्लुकि नात्वादि इति प्राहुः॥ निमित्तविनाश

पूर्वोत्तरपदनिमित्तकार्यात्पूर्वमन्तरंगोप्येकादेशो न ॥

केति ॥ तत्फलं तु भवत्कं तममतिक्रान्तो नोतिभवकानिति सिद्धिः ॥ अन्यथा पूर्वमकचोऽप्रवृत्तौ पश्चादुपसर्जनत्वात्तदनापत्तिः ॥ एकार्थी
भावेनानुपसर्जनत्वनाशेपि तस्य लुकृतत्वाभावात् ॥ पूर्वपदत्वं इति ॥ सप्तम्यन्तपाठः ॥ तदाश्रयणे चेत्यपि सप्तम्यन्तं ॥ उत्तरपदत्वा
श्रयणे इति तदर्थः ॥ न्यायेन तदाश्रयणे निषेधाभावेनेन्द्रशब्दस्योत्तरपदत्वेपीत्यन्वयः ॥ ननु उत्तरपदत्वमेव परादिवद्भावेनानेष्या
मः ॥ नत्तूत्तरपदाद्यवृत्तं ॥ ताद्रूप्याऽऽश्रेऽऽतिदेशव्यापाराश्रयणेपि अतिदिश्यमानधर्मनिमित्तके विधौ ताद्रूप्याऽऽश्रयणमात्रेण निषेधे
सर्वासामित्यादौ सुटः भियद्दत्यादौ इयङः क्षीरपेणेत्यादौ णत्वस्य च अनापत्तिः अत आह ॥ तदेकदेशेति ॥ एकादे
शस्योभयस्थानिकत्वे नेन्द्रशब्दैकदेशमात्रस्य विकाराभावादित्यर्थः ॥ इदमपि चिंत्यं एकदेशविकृतन्यायस्य प्रामाणिकत्वे यैवोदाह
रणदानात् ॥ अचः परस्मिन्निति सूत्रे श्रायसावित्यादौ भाष्यकृतैतन्न्यायसंचारस्य ध्वनितत्वाच्च ॥ गुडोदकमित्यादौ सर्वैरप्येतन्न्यायेनोद
कशब्दत्वांगीकाराच्च ॥ परे तु उभयत आश्रयणे नांतादिवदिति निषेधविषये नैकदेशविकृतन्यायः ॥ अतीयात्परीयादित्यादौ तन्निषे
धविषयेपि उक्तन्यायप्रवृत्तौ उक्तनिषेधवैयर्थ्यापत्तेः ॥ अत्रैव ह्रस्वापत्तेश्च ॥ अत एव प्रोह्यत इत्यत्र उपसर्गाद्ध्रस्व ऊहतेरिति ह्रस्वः प्राय
त इत्यत्र लत्वं प्रादितेत्यत्रोत्तरपदप्रकृतिस्वरं च भाष्ये शंकित्वोभयत आश्रयणे नेति निषेधेन निराकृतं ॥ अत्रैकदेशविकृतमित्तिन्याय
स्य प्रवृत्तौ तदसंगतिः स्पष्टैव ॥ एवं च सोमं द्रेनैतन्न्यायप्रवृत्तिरिति भाष्योक्तं ज्ञापकं स्यगेव ॥ गुडोदकमित्यादौ तु उदकशब्दे एकदेशवि
कृतन्यायेनोदकशब्दत्वं नास्त्येव ॥ अत एव नादिवत्सूत्रे भाष्ये अंतवत्त्वं गुडोदकमिति फलमुपन्यस्य नूनः प्रादितेति च फलमुपन्य
स्योभयत आश्रयणे नेति निषेधेन निराकृतं ॥ तेन गुडोदकमित्यपि निराकृतमेव ॥ नह्यनयोर्मोत्रयापि विशेषोस्ति ॥ श्रायसावित्यादौ तु

एकदेशविकृतन्यायेनांगत्वादिभवत्येव॥ एकादेशघटितानां उगिदाद्यंतानां एवं नुमादिविधानेनांतवत्त्वस्य नुमादौ वैयर्थ्येनाप्रसक्तौ त-
त्प्रसक्तिमूलोक्तनिषेधस्याप्यप्रवृत्त्योक्तनिषेधाविषयत्वात्॥ एवं मातुः कृपेत्यादावप्येकादेशे सकारस्यैवप्रवृत्त्यर्थत्वे एकदेशविकृतन्याया-
त्॥ परादित्वं तु न। एकादेशमात्रस्य परादित्वबाधनेऽपि रेफविशिष्टे तदभावात्॥ यदागमन्यायस्य वर्णग्रहणे प्रवृत्त्यभावस्योक्तत्वात्॥ रेफं
मुक्त्वा तु नैकादेशमात्रस्य परादित्वबाधनसंभवः॥ परशब्दे नैकादेशप्राक्कालिकसमुदायस्यैव ग्रहणे न रेफेण व्यवधानात्॥ अत एव द्व-
दुद्रुपधस्येति सूत्रे भाष्येऽनेनैव षत्वमाशंक्य रपरत्वाभावाभिप्रायेण परादित्वेन प्रत्ययत्वमाश्रित्य प्रत्ययविसर्जनीयन्यायेमित्युक्त्वा र-
परत्वाभिप्रायेणोक्ताभिप्रायकं लुप्यतेऽत्र प्रत्ययविसर्जनीयो रान्तस्येत्युक्तं॥ वस्तुतस्तु नेंद्रस्येति निषेधस्य ज्ञापकत्ववर्णनपरभाष्य-
प्रामाण्येन पूर्वोत्तरपदैकादेशे नैकदेशविकृतन्यायः॥ तेन गणेशः वनेशः मासेशः माषेशः इत्यादौ ङमुट्नलोपरुत्वजश्त्वादीनि नेति प्र-
द्युः॥ मरुद्वादिभिरिति॥ अजाद्यदंतत्वादिति भावः॥ एवं विष्ण्वादिभिरिंद्रशब्दस्य द्वंद्वेयं नादजाद्यंतमितींद्रस्यैव पूर्वनिपातः॥ सोमस्य
त्वभ्यर्हितत्वात्पूर्वनिपातः॥ यद्यपि सोमादिद्रू एव श्रेष्ठः॥ यावदधिकारमिति ब्रह्मसूत्रव्याख्यावसरे तथैव भाष्यकृद्भिरुक्तत्वात्॥ त-
थापि चंद्रलोकस्य कर्मिणां परमगन्त्यवधित्वेन मनसो जातत्वेन च तत्त्वं बोध्यं॥ विष्णुस्तु यद्यपि साक्षात्परं ब्रह्मेति सर्वेभ्योऽभ्यर्हितस्तथापि
तेनोपेंद्रत्वस्वीकारेणापरत्वं बोध्यं। अत एव वेदे सर्वत्रेंद्राविष्णू इत्येव प्रयोगो न वैपरीत्येनेति दिक्॥ अभ्यासस्संबंधीति॥ यद्यपि संज्ञा-
कृतस्य बह्वपेक्षत्वरूपस्य बहिरंगत्वस्यानाश्रयणमित्युक्तं प्राक्॥ तथाप्यंगनिमित्तत्वादभ्यासांगोभयाक्षिप्तप्रत्ययनिमित्तत्वद्वारा तत्त्वं
बोध्यं॥ वस्तुतस्तु इयर्तीत्यादौ श्लुना प्रत्ययापहारेणाक्षेपासंभवादियायेत्यादौ उभयोः समत्वात्परत्वादियङ्वारणाय सवर्णग्रह-

णमावश्यकमितिननतज्ज्ञापकमिति प्राचीनमतमयुक्तमेव ॥ सकललक्ष्येति ॥ क्वचिल्लाघवेनबाधेपि प्राप्तिमात्रमस्त्येवेतिभावः ॥ ऋधा
तोरेवेति ॥ नेनानोरमतिक्ता नैरत्यतेभिर्दधिक्रत्त्विनेवाचरतिदधिक्रत्त्विनदृति ॥ अनाआअभवत् रीअभवनृृत्यादौन ॥ रुपेरिति ॥
नचात्रकास्त्रन्त्ययादितिटूजादेरितिवाआमृस्यात् इतिवाच्यं ॥ कास्यनेकाज्ग्रहणमित्यस्यप्रत्ययग्रहणमपनीयतत्स्थानेऽनेकाचइ
तिवाच्यम् इतिपक्षाश्रयणात् ॥ दयायासश्चेतिसूत्रेआमिग्रहणेनाकारादेशमृनेतिकल्पनसंभवेनगुर्वादेरनृच्छइत्येवसिद्धेगुरुन्यासे
नमुरव्यग्रुरुमतस्यैवग्रहणात् ॥ उर्वोणकौयिषतीति यथेष्टंनामधातुष्विस्तुक्तेरितिभावः ॥ अंत्येतितदुत्तरमेवाजादेस्त्वाद्येतरस्येत्युक्ते
रितिभावः ॥ यामयकालोत्तरमेवेति ॥ ननुननः प्रागित्यर्थः ॥ प्रकृतेतुनत्समकालंननःप्रागितिनैवेतिभावः ॥ शास्त्रबाधेति । वृद्धिशास्त्र
बाधेत्यर्थः ॥ सूत्रारंभसामर्थ्यादेवेति ॥ ननुइयेषेत्यादौपरत्वाद्गुणेनतोद्वित्वेवार्णादांगमितितनोइस्त्वेआदिश्चादचःपूर्वत्वेनतस्ये
यङिस्यानिवत्वाप्रवृत्तौअस्यसूत्रस्यचारितार्थ्यात्कथमेतत् नचात्रचारितार्थ्याडुक्तपरिभाषाज्ञापनमप्यसंभवीतिवाच्यं ॥ एतत्परि
भाषासिद्धेः पूर्वंअभ्यासेंतरंगत्वात् । ह्रस्वात्मागयादेशेइवर्णोवर्णयोरभावेनात्रएतदप्रवृत्तेः ॥ वाहऊठित्यादौविवागसंज्ञाद्यांगा
श्रितप्रत्ययनिमित्तकत्वेनवाअयादेशापेक्षयाह्रस्वापेक्षवहिरंगत्वात् ॥ इतरथापरिभाषाज्ञापकत्वमप्यसंभवंप्राप्नोतीतिचेत् ॥
अत्रकेचित् ज्ञापकपरंभाष्यमप्रामाण्येन । ननुअनर्थमेतत्स्यात् ॥ नैकमुदाहरणम् ॥ असवर्णग्रहणंप्रयोजयतीतिभाष्येणत्वान
भिधानमितितत्त्व ॥ ज्ञापकपरंभाष्यंनपूर्वविप्रतिषेधेनद्विर्वचनप्रवृत्तिमाश्रित्यप्रवृत्तं ॥ तथाहि द्विर्वचनेयणयवादेशेभ्यइतिपूर्वविप्र
तिषेधंपठित्वाननः पठितस्यद्विर्वचनात्प्रसारणत्वेन्यादिपरविप्रतिषेधस्येयाद्येतिप्रयोजनमुपन्यस्यननुचात्रासुद्विर्वचनेकृते

त्रि· परस्य गुणवृद्धी भविष्यत इति परविप्रतिषेधप्रयोजने दर्शिते ततो न सिध्यति अंतरंगत्वात्सवर्णदीर्घत्वं प्राप्नोतीति शंकायां वार्णादांगं
गा· बलीय इति गुणवृद्धी भविष्यतः। किं वक्तव्यमेतत्॥ न हि आचार्यप्रवृत्तिर्ज्ञापयति वार्णादांगं बलीय इति। यदयमसवर्णग्रहणं करोति।
२२ नित्समाहितं॥ तथा चैयेथेन्यत्रापि गुणवृद्धी बाधित्वा पूर्वविप्रतिषेधेन द्विर्वचने पश्चात्तात्रग्रगुणवृद्धी बाधित्वा अंतरंगत्वात्सवर्णदीर्घे कृ
एतस्य चारितार्थ्यये नाऽनभिधानेकल्पेन॥ इदं तु बोध्यमपर्यंतानुवृत्तिवद्वुवर्णोत्तु हृतिरेव उकार्थे योज्ञापिका॥ न चोवोण मात्रार्थो साऽम
त्रैइति निषेधेन इजादेरित्यामोऽप्रवृत्तेरिति वाच्यं॥ इयङादिप्रकरणे तन्वादीनां छंदसुपसंख्यानमिति वार्त्तिकेनोवङ्प्रवृत्तेः इत्यदोषात्
॥ स्पष्टं चेदं भाष्यकैय्यटयोरिति॥ सामान्यापेक्षमिति॥ तत्फलं तु अनूनवत् अबीभवत् आरतीत्यादिसिद्धिः॥ नन्वनेनैव सिद्धौ पूर्वस्येव वि
धावित्यस्य कथमारंभ इति प्रयोजनं संगच्छतां॥ न च ज्ञापकस्य सजातीयापेक्षत्वेनोत्तरखंडस्थ ऋवर्णोत्पाद्यस्थानिकादेशस्याजात्मक
स्य वा आदेशस्य ग्रहणे न अभ्यासत्वेनाभ्यासोद्देश्यकस्य ग्रहणे न वा तत्संगतिः॥ अववर्तत् आरतीत्यनयोरसिध्यापत्तेरिति चेन्न॥ अंत्ये
दीर्घविधौ तन्निषेधेन आद्ये उवर्णादेशत्वाभावेन णावच इति निषेधाप्रवृत्तौ परत्वाद्गुणे पश्चाद्द्वित्वे आदिष्टाच्चः पूर्वस्य विधिसद्भावेन
स्याऽनिषत्वाप्रवृत्तेरित्युक्तिरीतिमात्रं लभ्यैव पूर्वस्यैव विधाविमस्यारंभ इति प्रयोजनोद्भावनसंगतेरिति। आरतीति। अनूनवत् अनूनवत् इत्यादौ
दीर्घो लघोरिति दीर्घोऽप्यत एवेति बोध्यं। तस्यान्वदीदयत् इत्यादौ चारितार्थ्यम्। दीर्घविधाविति॥ ननु स्वरदीर्घयलोपेषु लोपाजादेश एव राम·
तस्थानिवत् इति नियमेन कथमत्र निषेधः। किंच रिर्यत्रुरित्यादौ उक्तनियमेन न पदांतेति निषेधस्य बाधेऽपि पूर्वत्रासिद्धमिति निषेधसाध्या २२
सकार्यं प्रति बधकीभूतस्येत्युक्तनिषेधस्य च प्रवृत्तौ न दरसिध्योक्तनियमेन तयोरपि निषेधयोर्निवृत्तेर्वक्तव्यतया आरतीत्यादौ अभ्यास

कार्यमनिवंधिकेनस्याप्यप्रवृत्तौ दीर्घानापत्तिरेवेति चेन्न॥ उक्तवार्त्तिके दीर्घग्रहणस्यादृष्टप्रयोजने रियेत्तु कियौरिति॥ तत्रारोऽभ्यासस्यन
व्यरीत्या अधातुत्वेन धातो रेकस्य दीर्घविधानेन॥ अंत्ये तु उणादीनामव्युत्पन्नत्वेन दोषाभावेन तत्रत्यदीर्घग्रहणस्यैवाकर्तव्यत्वात्॥ यद्वो
क्तवार्त्तिके व्याख्यानादाष्टमिकदीर्घस्यैव ग्रहणमिति न दोषः॥ वस्तुतस्तु पूर्वोक्तरीत्योपधायां चेत्यत्राभ्यासस्य इति निषेधबलेन नत्र सा
भ्यासस्यैव धातुत्वेन चरिर्येत्तुरित्यादौ दीर्घवारणार्थं उक्तवार्त्तिके दीर्घग्रहणमावश्यकं॥ किंच न पदांतेत्यत्र सामासिकदीर्घस्या
पि त्वया गृहीतत्वेन श्वायसाविन्यादावि व हंसाविन्यादौ सांतस्यैकदेशविकृतन्यायेनांतरंगत्वात्सांतमहत इति दीर्घवारणा
योक्तवार्त्तिके दीर्घग्रहणं॥ तेन सामासिकस्यापि ग्रहणमित्युभयथावश्यकं॥ कथं तर्हि आरतीत्यादौ दीर्घ इति चेदित्थं॥ उक्त
वार्त्तिके दीर्घपदेन उपधादीर्घपदस्यैव ग्रहणेनादोषात्॥ न पदांतेति सूत्रे पूर्वत्रासिद्धेनेत्यवष्टभ्य वरेयलोपस्वरवर्जं हि वं
वनादीनि न पाठ्यानि इति भाष्योक्तरीत्यादरणेन तु सूत्रे वार्त्तिके च दीर्घग्रहणं व्यर्थमेव वार्त्तिकेन स्वसूत्रस्थदीर्घग्रहणमूलक
त्वस्य तत्रैव भाष्योक्तेः॥ रियेत्तुरित्यादौ यत्तु उपधायां चेति सूत्रे अभ्यासप्रतिषेधस्यैव वार्त्तिककृतोक्तेरदोषः॥ स च दीर्घग्रह
णे कृतेप्यावश्यक इति तत्रैव कैयटेनोक्तं॥ युक्तं चैतत्॥ अन्यथा हंसाविन्यादौ स्वरदीर्घत्वस्य चारितार्थ्येनाभ्यासकार्यप्रति
बंधिकेति निषेधबलेन पूर्वत्रासिद्धमित्यनेन च प्रापितस्यानिवत्वाप्रवृत्तेस्तेन वाधेमानाभावादिति दिक्॥ अरिरियाद्विति
वस्तुतस्तु प्रतिबंधिकेति न निवेश्यफलाभावात्॥ अरिरियाद्वित्यत्र तु अंतरंगत्वादियङि न दोषः॥ नन्विवेशलस्यासिद्ध
स्त्र॥ न या हि उपधाकार्यं हि लोन्यवल इत्यस्यानेरस्वंडेऽवर्णाभावेन णा वच इति निषेधाविषये आस उपवेशने इति अस्य

त्रि॰ माभवानसिसत् माभवानटिटत् इत्यादौ चारितार्थ्येनाचकाणत् इत्यादौ द्वित्वात्पूर्वं णावचङ्इति निषेधेन वृद्धेरभावे द्वित्वोत्तरं वृद्धौ
गा॰ काण्यादीनां चेति विकल्पेन ह्रस्वाभावे तस्य स्थानिवत्त्वेन सन्वद्भावाद्यापत्तेः॥ एवं कृष्टधातोर्णिचि चङि अचचकावत् इत्यादावपि॥ अथ
२३ प्रकृतिस्थैकारः सूत्रे तस्य ज्येष्ठः श्रेष्ठ इति प्रयोजनमुपल्यस्याकारोच्चारणसामर्थ्यात्लोपेनेति तत्सूत्रस्य भाष्येण ओःपुयण्जिषु वचनं
ज्ञापकं णौ स्थानिवत्त्वस्य यद्येतत् ज्ञाप्यते ऽचिकीर्तत् इत्यत्रापि प्राप्नोतीति न तुल्यजातीयस्य ज्ञापकं कश्च तुल्यजातीयः यथाजातीयाः
पुयण्जयः कथंजातीयाश्चैते ऽवर्णपरा इति द्विर्वचनेऽचीति सूत्रस्य भाष्येण च यत्र द्विरुक्तौ परखंडे ऽवर्णस्थानिको वर्णः श्रूयते तेन
त्रैव णावचङ आदेशो नेति निषेधः॥ अन्यथा प्रशस्यस्य श्रशब्दाण्णिचि चङि णावचङ इति निषेधेन टिलोपाभावे ऽभ्यासे श्रवणार्थत्वेन न
ग कारोच्चारणवैयर्थ्यमिति श्वादेशे अकारोच्चारवैयर्थ्यमिति तत्संगतिः॥ औनन दितित्वसाध्वेव॥ तथा चाचकाण दित्यत्र णाव
चङ्इति निषेधात्प्रवृत्त्यापूर्वं वृद्धौ पश्चाद्द्वित्वे स्थानिभूतादचः पूर्वत्वेन दृष्टत्वाभावान्न स्थानिवद्भाव इति चेन्न॥ उक्तभाष्यात्पुनर
खंडे परिनिष्ठितेः वर्णः श्रूयत इत्येतन्न्यायेन कल्पनेऽपि उवर्णस्थानिकेऽपि निवेशे मानाभावात्॥ णौ चसंश्चङोरिति विहितस्य णा
ङःस्तु नानेन निषेधः॥ निषेधे सति अजादेर्द्वितीयस्येति णिचस्सवद्द्वित्वे ऽन्तरखंडे ऽवर्णपरत्वाभावात्॥ किंच इटकि टिकिटीत्यत्र म
श्चिष्टा श्विटि अतुस्तिद्वित्वे वर्णादागमिनुत्तरखंडे स्वरनेकाच इति यणि तस्य स्थानिवत्त्वे नाभ्यासे यणापत्तिरितिदिक्॥ अन्ये तु उ राम॰
वर्णादेशत्वाभावेन णावचङ इति निषेधाप्रवृत्तेः परत्वात् वृद्धौ ततो द्विर्वचने आदिष्टादचः पूर्वस्य विधिरिति अचकाणदि २३
त्यादिसिद्धिः॥ इयतुरित्यादौ तु स्थानिवद्भावेनेकारवृद्धौ पर्युदासन्यायलभ्यासवर्णाज्रूपनिमित्ताभावेन न यण्॥ सवर्णे

दीर्घस्तु न॥ पूर्वस्यैव विधानाभावात्॥ यद्वा वार्णादांगमित्यस्यानित्यत्वेन पूर्वमंतरंगत्वात्सवर्णदीर्घे इयङि रूपसिद्धिरित्याहुः॥
यत्तु अभ्यासत्वपर्याप्त्यधिकरणोद्देश्यकेकारेण स्थानिवत्त्वं इत्येव ज्ञाप्यते॥ तेनारियन्निति अरिरिप्रियान् इत्यत्र यलोपे यण्रीङोः स्थानि
वत्त्वं यलोपस्यातथात्वात्॥ एवं च प्रतिबंधिके निध्ययमेव॥ अरिरिप्रियादित्यत्रेयङादेशस्यातथात्वेनादोषात्॥ तेन यत्र यानिरित्यत्र
पङ्क्काले लोपस्यस्थानिवत्त्वेन पुनरातोलोपो न शंक्यः॥ आलोपस्यस्थानिवत्त्वादिति मनोरमाग्रंथोपि व्याख्यात इति तच्चिंत्यं॥ वि
भावयिषते इत्यादौ इत्वाद्यनापत्तेरिति दिक्॥ अंगसंबंधीति॥ इदं समानकार्यित्वे एवेति पूर्वेण गतार्थं॥ अनित्येति॥ ननु नुकृन्
पोने समानकार्यित्व इति वार्णपरिभाषाया अप्रवृत्तावंतरंगत्वात् नुकि तन्निवृत्तये सत्तुक्निर्देश आवश्यक इति कथं अनित्यत्वे
ज्ञापकमिति चेन्न॥ एतस्यैव परमसिद्धांतत्वेन पूर्वोक्तस्य सर्वस्यैतन्मूलकत्वेनादोषात्॥ जातेंऽतरंगे तस्येति॥ प्राप्तस्येति
शेषः॥ अंतरंगे असिद्धत्वमिति प्रकृतमंतरंगमिति चानुवर्तते॥ तथा चांतरंगे जाते प्राप्तस्य बहिरंगस्यांतरंगे कर्तव्येऽसिद्धत्वे
न बाध्यते इत्यर्थः संपद्यते॥ एतेन जातेऽतरंगे बहिरंगासिद्धत्वस्य पूर्वपक्षिणानंगीकारेण तत्खंडनं प्रकृतानुपयुक्तं इत्यपास्तं॥ नि
मित्तविनाशसंभावनापीति॥ एतेनैव सामंजस्ये तद्द्वारैव निमित्तविनाशत्वेनेत्यादि पूर्वोक्तं निष्फलमिति बोध्यं॥ अत्र निमित्त
त्वं कार्यिसाधारणं बोध्यं॥ तेन सोढ इत्यादिलोपकार्यित्वेपि न क्षतिः॥ ननु निमित्तविनाशसंभावनापि यद्येतत्प्रवृत्तौ निमि
त्तेन तर्हि हलोपो न इति सूत्रेण तत्परकरणं व्यर्थमित्यत आह॥ न परकरणं त्विति॥ नैमित्तिकस्याप्यपाय इति॥ स्थानिनः स्थितिश्चेत्य
पि बोध्यं॥ समर्थानामितीति॥ ननु समर्थग्रहणेन समर्थात्तद्धितोत्पादनेपि पश्चात्प्राप्तसवर्णदीर्घनिवृत्तेः कथं निराक्रियेतेति चेन्न

त्रि॰ गा॰ २४

॥ समर्थोत्तद्धितः साधुरित्यर्थोऽश्रयणात् ॥ प्रक्षालनाद्धि पंकस्येति न्यायेन कृत्वा निवर्तनादकरणं लघु इति दीक्षितोक्तं दूषयति ॥ भावीति ॥ तदाशयस्तु तस्मादुरिति शेषः ॥ तत्र च पूर्वोक्तस्य केचिदित्यस्यान्वयः ॥ प्रतिपदविधित्वादिति ॥ ननु नियमशास्त्राणां विधिमुखेनैव प्रवृत्तिरिति सिद्धांतादिट् विधौ वस्वेकाजाद्यत्र वस्वित्युक्तेरिटोपि प्रतिपदविधित्वमिति चेन्न ॥ एतन्मते वस्वेकाजित्यस्यानुवादकत्वेन विधित्वाभावात् ॥ यस्य च विधित्वं आर्द्धधातुकेत्यस्य न तस्य प्रतिपदविधित्वं ॥ तथाप्येषैव गतिः अन्यथा वस्वेकाजित्यस्य वलादित्वानिमित्तकतया तमादायाकृतव्यूहपरिभाषाप्रवृत्त्यसंभवात् ॥ बाधकत्वइति ॥ पश्चात्प्राप्तस्यापीति शेषः ॥ ननु इट्याप्येत्यादौ प्रतिपदोक्तेन णो यणित्यादिना इट्यादेर्बाधापत्तिः ॥ किंच शेषाद्विभाषेत्यत्र शेषानुग्रहणाभावे कबभावे सावकाशता नासमासांतानां प्रतिपदविहितत्वाभावात्कपा बाध इति तत्सूत्रस्थभाष्यासंगतिरिति चेन्न ॥ प्रतिपदविधेर्बलवत्त्वस्य क्वाचित्कत्वेनादोषात् ॥ यद्वा वस्वेकाजिति सूत्रे वलादेरिति वर्त्तते ॥ तच्च प्रक्रियायां वसोर्वलादित्वाव्यभिचारात् ॥ परिनिष्ठितवलादेरित्यर्थकं ॥ तथा च परिनिष्ठितवलादेर्वसोरेवेति नियमेन संप्रसारणेन नश्यमाणवलादेरिट् व्यावर्तनेनात्त्वदोषः ॥ ततोभ्रमवारणायेति ॥ वस्तुतः समर्थग्रहणं अंतरंगस्यापि संधिकार्यादेः पूर्वमप्रवृत्तिज्ञापनाय तेन समर्थोधिकारबहिर्भूततद्धितानामकृतसंधेरुत्पत्त्याऽनुकंपितो वायुदत्तो वायुक इत्यादिसिद्धिरिति दिक् ॥ एवं परनित्यांतरंगाणाव लाबलं निरूप्य क्रमप्राप्तापवादस्य बलवत्त्वं निरूपयति ॥ अंतरंगादिति ॥ भावकइति ॥ इदं चिंत्यं ॥ नपुंसके भावे क्त इत्यस्या राम॰ २४
पि अकर्मकेभ्य एव प्रवृत्तेर्णेरध्ययने वृत्तमिति सूत्रे भाष्यकैयटयोः स्पष्टमुक्तत्वात् ॥ ननु भ्रांतेदेशं इत्यादिप्रयोगात् अजर्य

संगतमिति सूत्रस्थभाष्याच्चगत्यर्थेभ्यः सकर्मकेभ्योपि भावे क्तो भवत्येवेति चेत्सत्यं॥ एतस्य आश्रितगत्यागत्यर्थत्वेपि गत्यर्थपदे
नाग्रहणात्॥ अत एव सुखं प्राप्त इत्यादौ कर्तरि क्त आदिकर्मणि वा बोध्य इत्युक्तं नव्यैः॥ अत एव ग्रामं प्रापयति देवदत्तेन नेत्येवेति ध्व
नितं नगतीति सूत्रे भाष्ये॥ तस्मा स्त्वेनेति करणे तृतीया॥ शास्त्रं च यत्पदार्थ इत्येव सम्यक्॥ विशेषशास्त्रोद्देश्यति॥ ननु उर्द्द
नुडूरशारामपवादो नस्तानुडिति चेदत्र केचित्॥ किं तु भिन्नधातुविहितप्रत्ययपरकांगावयवत्वविशिष्टोपधेकत्वस्य सामा
न्यसंभवादिति तन्न॥ एवमपि इरशांतदत्वक्लिन्नोद्देश्यकत्वाभावात् तस्मादेकशास्त्रस्य बाध्यत्वेद्दद॥ अनेकेषां बाध्यत्वे
तुनद्प्राप्तियोग्ये विषये चारितार्थ्यमेव तंत्रमिति दिक्॥ अत्र पाठद्वयं बाधकत्वे बीजमित्युत्तरं॥ अत एवायादयइत्यारभ्य
सममेवेत्यंतं पाठोत्तरं किं चानेन न्यायेनेत्यादिरेकः॥ वैपरीत्येन चापरः॥ तत्रोत्य एव युक्तः॥ एवमत्रेत्यादिग्रंथानुरोधात्॥
अनवकाशत्वेनेति॥ आनर्थक्येनेत्यर्थः॥ एतत्कथनेति॥ येन नाप्राप्तिन्यायकथनेत्यर्थः॥ स्यादयः प्राप्नुवंतीति॥ न च सार्वधा
तुकनिमित्तकस्य नित्यस्यायादेः स्यादिभिर्बाधे वैकल्पिका आयादयो भविष्यंतीति इष्टापादनमेतदिति वाच्यं॥ प्रत्ययः परःप्र
याकत्वस्य वेत्यर्थस्य तत्पुंसकस्य ज्ञत्वचइति सूत्रस्थभाष्यकैय्यटाभ्यां लाभेन धातुविकरणयोर्मध्ये निवेशासंभवेन स्यादि
प्रकृतेषु वैकल्पिकाप्रवृत्तेः॥ गोपाय्यादिष्वादौ तु सार्वधातुकसंभावनाव्यतिरेकग्रहेण पूर्वमेवायादिषु कृतेषु तिङादय इति न कश्चित्
दोषः॥ अनवकाशद्दति॥ आयादयो वा सार्वधातुके नित्य इति न्यासमुपक्रम्येदं भाष्यं प्रवृत्तमिति निसिद्धावकाशः॥ द्वय
वोक्तिसत्त्वस्य स्वनसिद्धातिनः॥ गोपायिष्यति इत्याद्यसिद्धेः॥ शप्यादिरिति॥ स्यादिग्रहणं दृष्टांतार्थं यथा स्यादिनि प्राप्नोति न

त्रि·
गा·
२५

तथाश्वावित्यर्थः। अत्रेति। अजादेर्द्वितीयस्येत्यत्र। तत्र ह्युत्तरं प्रथमैकाच्प्रवृत्त्युत्तरं उत्सर्गे सत्यसति वा न विशेष इत्यंशांतरकृतो भेदो। किंचित्कर इति भावः। विन्मतोर्लुगिति। परे तु नतिस्त्रिनि निषेधाज्ज्ञापकाद्विषयभेदेनापवादेन बाधः॥ किंतु विषयैक्य एव विषयस्तु साक्षात्कार्यभागेवेति न नियमः॥ किंतु आगमादेशविधौ षष्ठ्यंतपदोपात्त उद्देश्यः॥ तत्र तत्र कथमन्यस्योच्यमानमन्यस्य बाधकं स्यात् इत्याशंक्य तत्रापि तक्रकौंडिन्यन्यायेन बाधकत्वस्यापकभाष्येन्यस्येति। अस्य साक्षात्कार्यभाज इत्यर्थः। प्रथमद्वितीयद्विर्वचनयोः पूर्वोत्तरपदरूढ्योः आदिहल्शेषस्वयशेषयोः एजृध्योश्च साक्षात्कार्यिणो भेदेपि धातोरंगस्येति षष्ठ्यंतनिर्दिष्टो विषयो न भिन्नः विकारकृतं च न विषयान्यत्वं इति न विन्मतोर्लुकि टिलोपमात्रस्य बाधक इति प्रकृत्यैकाच्सूत्रस्य भाष्यविरोधः। नापि द्यतेरिगिति दिग्यादेशे न द्वित्वबाधने इति भाष्यविरोधः॥ त्रयाणामित्यत्र तु इकारांतत्वनिमित्तकदीर्घस्य त्रयादेशेन बाधेपि अदंतत्वनिमित्तकस्य नस्याबाधान्न दोषः॥ यद्वात्र सुपि चेति दीर्घः॥ कृष्टायेति निर्देशेन दीर्घविषये सत्यपि तत्परिभाषाया अप्रवृत्तिः॥ अत एवाने मुगिति सूत्रे मुडिति न्यासे पच्यमानमित्यत्रातो दीर्घो यञिति दीर्घ आपादितः॥ अत एव च नामीति सूत्रे भाष्ये प्रथमोपस्थितमदंतं विहाय अग्नीनां इंद्राणां इत्युदाहरणमुपन्यस्तं भाष्ये॥ वस्तुतो नुटः पूर्वमेव त्रयादेश इति न कश्चिद्दोषः॥ अत एव नष्वाभ्यां शस्पूर्व इति सूत्रयोरेकस्मिन्नंगे एकाभ्यासे इत्यादिना विषयैक्यमुपपादितं कैय्यटेन॥ अत एव नामीति सूत्रे भाष्ये आमीति न्यासे अग्नीनामित्यादौ नित्यत्वाद्दीर्घवचनाद्भूतपूर्वगत्या नुडित्युक्तं॥ अतो भिस इति सूत्रे भाष्ये च परत्वादेत्वमाशंक्य नित्यत्वादैस्भाव इत्युक्तं॥ कृतो भारद्वाजेति सूत्रे च भाष्ये जहर्थेत्यादौ गुणे रपरत्वे चानजंतत्वान्निषेधो न प्राप्नोति

राम
२५

सुकम् ॥ स्वपितोवेतिसूत्रेचभाष्येकुमार्यैइत्यादौयणुत्तरमाड्ढक्तःविषयभेदेप्यपवादत्वेचतदसंगतिःस्पष्टैव ॥ अतएवचसावन
डुहइत्यनेनहल्ङ्याब्भ्यादिलोपस्यतत्रैस्वयरत्यनेनतुदःशाहौचसौरित्याभ्यांधिभावस्यऋदुशनस्त्यनङाहल्ङ्यादिलोपस्यह्रस्वस्यगु
णइत्यनेनसंबुद्धिलोपस्यअमसंबुद्धाविन्यनेनहल्ङ्यादिलोपस्यइडत्यर्तीत्यनेनगुणस्यणौचङीत्यनेनद्वित्वस्यहन्तेर्हिंसायांयङि
घ्नीभावेनद्वित्वस्यचनबाधः ॥ ह्रस्वस्यणावङ्गंविषयःद्वित्वस्यण्यन्तमितिविषयभेदात् ॥ यङन्तस्यद्वित्वंयङिपरतोहन्तेर्घ्नीभावइतिविष
यभेदात् ॥ नचपचमानइत्यत्रमुकारयादेशस्यबाधोनस्यादितिवाच्यं ॥ अतइतितपरकरणेनैवतदप्रवृत्तेः ॥ पचमानइत्यत्रना
स्यनुदात्तेनदूतिस्वरस्तुउपदेशग्रहणात्सुलभः ॥ अतएवपचावइत्यादौस्वरसिद्धिः ॥ एतेनातइतितपरकरणान्नेतिनत्विन्नत्यं ॥
पदागमाइत्येतल्लभ्यस्यतपरत्वेनाव्यावृत्तेः ॥ अतएवाडुपदेशात्परत्वमयुक्तस्वरसिद्धिरितिलटःशतृइतिसूत्रेशेखरोक्तमपा
स्तं ॥ नन्वेवंगाङ्लिटीत्यनेनद्वित्वस्याज्झनेनिरीधेणद्वित्वस्यहलइत्यनेनातोलोपस्यतदोरित्यनेन्यदाद्यत्वस्यपथिमथ्यो
त्वात्वेनइतोत्इतिइत्वस्यचबाधापत्तिः ॥ त्वदुक्तरीत्याविषयाभेदादितिचेन्न ॥ आर्धधातुकइत्यस्यविषयसप्तमीत्वेनगा
ङोलिटःपूर्वमेवप्रवृत्तेः ॥ अज्झनेत्यस्यतुसनिपरतोऽङ्गंविषयःसन्यङोरित्यस्यतुसन्नन्तमितिविषयभेदात् ॥ यस्यहलइत्यत्रव
र्णग्रहणेनागसंज्ञानिमित्तस्ययकारस्यलोपविधानात् ॥ एतत्तदोरितिसुलोपविधानेनात्वस्यसत्वाबाध्यत्वकल्पनात् ॥ सुत्वस्यनपुंस
केसावपिसत्वेनसर्वनामस्थानत्वाव्याप्यत्वात् ॥ नन्वेवअनडुहःसावाम्प्रतिषेधः ॥ नुमोऽनवकाशत्वात्इतिसावनडुहइतिभा
ष्यवार्त्तिकविरोधइतिचेत्सत्यंएतत्तदोरित्यनेनसामान्यतएवस्वस्तुनिमित्तकविभिन्नविभिन्नस्थानिकादेशयोर्बाध्यबाधक

त्रि· गा· २६

भावाभावज्ञापनेनादोषात् ॥ एवमन्येपि दोषाः परिहरणीयाः ॥ एवं प्रत्ययविधौ पंचम्यंतपदोपात्तो विषयः संज्ञाविधौ प्रथमांतपदो
पात्तः ॥ तदेकदेश एव च तत्रोत्सर्गस्यापवादबाध्यत्वं ॥ अत एव सुराजपुरुषायेत्यादौ तद्घटके यचि सुवंतं तदपि भमिति भसंज्ञाया राज
न्शब्दस्य पदत्वबाधो नेति प्राहुः ॥ तदा भवत्येवेति ॥ अत एव च्छ्वोः शूडितिसूत्रे भाष्ये ऊठष्टित्वपक्षे ऊठिकृते लोपो व्योरितिलो
पइत्सुके एवं गोमानित्यादौ अत्वसंतस्येति दीर्घं नुम्सिद्धिः ॥ लोकेपि ब्राह्मणभोज्यं ना माठरकौंडिन्यौ परिवेविष्टामिति परिवे
षत्वेन विहितावपि तौ परिवेषणोत्तरं संजाते ॥ इदं विचार्यते ॥ एतन्न्यायप्रवृत्तौ बाधकाबाधितनित्यप्राप्तिस्तत्र आहोस्वित्प्रा
प्तिमात्रमिति ॥ अत्रांत्यपक्ष एव युक्त इति प्रतीमः ॥ ब्राह्मणेभ्यो दधि दीयतां तत्रौ न दीयतां तक्रं कौंडिन्यायेत्युक्तेपि तत्रौ चरि
तार्थे नापि तक्रदानेन दधिदानस्य बाधदर्शनात् ॥ अत एवाभ्यासस्यासवर्णे दीर्घस्य वार्णादांगमिति परिभाषाज्ञापकत्वोपपादनाव
सरे येन नाप्राप्तिन्यायेन यण एवायमपवादः ॥ ननु सवर्णदीर्घस्येत्युक्तेप्यटेन ॥ अन्यथा सवर्णेचितदप्राप्तेस्तदसंगतिः ॥ नन्वेवं
ऊदुपधाया गोहः इति सूत्रस्य भाष्यविरोधः ॥ तत्र हि विकृतनिर्देशप्रत्याख्यानाय उऊदिति प्रश्लिष्य निजुगुहतुरित्यादौ चरिता
र्थस्य ह्रस्वोकारस्य गूहयतीत्यादौ परत्वाद्गुणेन बाध उक्तः ॥ उक्तरीत्या तु निजुगूहतुरित्यादावपि गुणस्य प्राप्तिसत्त्वेन उक्तस्याप
वादत्वाद्विप्रतिषेधासंगतिः ॥ किंचेत्वोत्वाभ्यां गुणवृद्धी विप्रतिषेधेनेति वार्तिकासंगतिः ॥ निगीर्णमित्यादावपि गुणप्राप्ति
मात्रसत्त्वेनेत्वोत्वयोर्गुणापवादत्वात् ॥ किंच चिण्वद्भावे उपदेशिवचनं ऋकारगुणबलीयस्त्वात् ॥ इति स्यसिच्सूत्रस्थवार्ति राम· २६
कासंगतिः ॥ कारिषीष्टेत्यादौ उश्चेति कित्त्वेन गुणनिषेधेपि प्राप्तिमात्रसत्त्वेन चिण्वद्भावस्य गुणापवादत्वात् ॥ एवं न लोप

सूत्रे भाष्ये संबुद्धौ चरितार्थस्य रुत्वस्य असिद्धत्वान्नलोपमाशंक्य रूपरात्रीति रुत्वविधानात् ज्ञापकाद्रुत्वविषयेन नलोपो नेत्यु-
क्तं न ह्यपि विरुद्धं संबुद्धौ निषिद्धेपि प्राप्तिमात्रस्य सत्वात् इति चेन्न ॥ स्यसिच्सूत्रे उपदेशग्रहणेनोत्सर्गे निषेधस्थले चारितार्थ्य-
मात्रेणोत्सर्गसमबलताज्ञापनात् ॥ एतेन वस्तुतः सत्यपि संभवे बाधनं भवतीति भाष्यसिद्धांतात् रुत्वरत्वेन लोपापवादभूते ए-
व ॥ निषेधविषयेपि प्राप्तिमात्रस्य सत्वेन येन नाप्राप्तिन्यायविषयसत्वात् ॥ निषेधेनापि तस्य निषेध इत्यन्यद्दिनिशेखरोक्त-
मपास्तं ॥ परे तु उक्तभाष्यवार्तिकादिभ्यः बाधकाबाधितप्राप्तिरेवापवादत्वे तंत्रं ॥ उत्सर्गनिषेधस्थले चारितार्थ्यमात्रेण स-
मबलत्वमिति न युक्तं ॥ ब्राह्मणेभ्यो दधि दीयतां रात्रौ न दीयतां तक्रं कौंडि — न्याये त्वत्रापि उक्तभाष्यादिप्रामाण्येनापवाद-
त्वप्रतिपत्ते रित्याहुः ॥ इदं विचार्यते ॥ त्रिपाद्यां तक्रकौंडिन्यन्यायेन बाध्यबाधकभावोस्ति न वा इति ॥ तत्राद्य एव यु-
क्तः ॥ अभियुक्तैः ष्टुत्वस्य जश्त्वापवादत्वोक्तेः ॥ षत्वरुत्वादीनां ढत्वजश्त्वाद्यपवादत्वभाष्यकारादिभिरुक्तेश्च ॥ अत एव रदाभ्या-
मिति श्रुतेन निमित्तत्वेन कार्यित्वबाधः संगच्छते ॥ अत एव रुत्वेन नलोपबाधसिद्धिः ॥ परे तु असिद्धविषयेन तक्रकौंडि-
न्यन्यायः ॥ असिद्धेन सिद्धस्य बाधासंभवात् ॥ अत एव वुग्युटौ उवङ्यणोः सिद्धौ वक्तव्यौ इत्युक्तं ॥ निरवकाशत्वेन तु बाधक-
त्वमस्त्येव ॥ वचनप्रामाण्यात् ॥ अत एव पूर्वत्रासिद्धमिति सूत्रे भाष्ये एवं दोग्धा दोग्धुं घत्वस्यासिद्धत्वाड्ढत्वं प्राप्नोति ॥ का-
ष्ठतट् संयोगादिलोपस्यासिद्धत्वात्संयोगांतलोपः प्राप्नोति ॥ अपवादो वचनप्रामाण्यात् ॥ अनवकाश° वेतौ विधितौ व-
चनप्रामाण्याद्भविष्यत इत्युक्तं ॥ तथा नलोपः प्रातिपदिकेति सूत्रे भाष्ये अनवकाशो रुर्नलोपं बाधिष्यते ॥ सावकाशो

रुः कोवकाशः अनंत्यइत्यादुक्तमुपपद्यते॥ अतएवरथीनरइत्यत्रईत्वस्यासिद्धत्वान्नलोपेपश्चादीर्घइत्थिनइतीत्वं अन्यथान
लोपंबाधित्वानकारस्येत्वेनस्यासिद्धत्वात्सवर्णदीर्घोप्राप्तोनतत्सिद्धिः॥ एवमस्नण्वतइत्यत्रनलोपसिद्धिः॥ त्वद्रीत्यातु अनोनुडि
त्यनेननलोपस्यबाधापत्तिः॥ एतेनजश्त्वमितिप्रतीकमुपादायबाधित्वेति शेषइति नव्योक्तमपास्तं॥ प्रकृतिचरां प्रकृतिचरइति
न्यायेनरत्वमुडित्यादौजश्त्वंबाधित्वाषकारस्यैवापत्तेश्च॥ पक्कमित्यादौकुत्वमप्यतएव॥ त्वद्रीत्यातुतदसिद्धिः॥ निमित्तत्वेन॥
कार्यित्वबाधस्तुप्रकरणेएवप्रकरणस्यासिद्धत्वात्॥ नेमोरद्धोकार्यिणोइतिभाष्यप्रामाण्यादिति॥ नवाप्येषैवगतिः॥ अन्यथाधात्वं
शः मद्रहृदइत्यत्ररेफस्यहित्वापत्तिः॥ अचःपरत्वाभावेननिमित्तत्वानापत्त्याकार्यित्वस्यनिरपवादत्वात्माहुः॥ शेषिकोणिति॥
ननुवृद्धात्कुःस्यादितिचेन्न॥ लक्षणभूतेनशेषइत्यनेननिमित्तेनाच्यर्थेऽण्विधानेपितदधिकारस्थसूत्रैस्तदधिकारेविशिष्यनि
र्दिष्टार्थेष्वेवप्रत्ययविधानात्॥ यद्युदाहरणमिति॥ एतदुदाहरणंत्वचिरकृतइति॥ तत्रह्युत्सर्गेकृतेकाराभावेनास्याप्रवृत्तिः
॥यद्युदाहरणमिति॥ एतदुदाहरणंत्वेत्येधमूठसु॥ अत्रहिपररूपेकृतेस्याप्रवृत्तेः॥ उक्तन्यायेति॥ पूर्वोपस्थितबाधेननैरा
कांक्ष्यमिति उक्तन्यायेनेत्यर्थः॥ ङीपोविध्यभावायेति॥ ननुङ्यापितेपिनचारितार्थ्यं॥ बहुव्रीहेरूधसइत्येवसिद्धेः पुनर्विधिर्वैय्य
र्थ्यापातेनङीषएवविधिसिद्धेरितिचेन्न॥ नियमार्थस्यादित्याशयात्॥ तथाहि॥ परिच्छेदकार्थकादेश्चेत्संख्यादेरेव॥ असत्वा
र्थकादेश्चेदव्ययादेरेव॥ तेनभूर्यादेरग्रेवणादेश्चनेति॥ अग्रेवणशब्देऽधिकरणशक्तिप्रधानतयाऽसत्वार्थकः॥ नदैवर्थ्योप
निरिति॥ ननुजहतीत्यादौस्वसमप्राप्तिकानादेशबाधनेनादादेशश्चरितार्थइतिचेन्न॥ अत्राप्यभ्यस्तसंज्ञासमकालमेवांना

देशप्राप्तेः॥ नन्वभ्यस्तसंज्ञाधातुसंज्ञाप्रवृत्तिकाल एव तथा चोत्सर्गापवादयोः समकालमेवात्र प्राप्तिरिति चेन्न॥ तथाप्यायन्नादिष्वुपदे
शिवद्वचनसंनातादेशविषयकत्वस्याप्यंगीकारेणांगसंज्ञातः पूर्वमेवानादेशः अदादेशस्तु अंगसंज्ञोत्तरमिति न समकालता अदादेश
प तुनोदेशिवद्भावः॥ तत्राभ्यस्तानामादिरित्यस्य प्रवृत्त्या फलाभावात् दधतीत्याद्यनुरोधाच्च॥ अयं न्यायो नोपजीव्यविषये॥ इदितो नुमिति
सूत्रे कुंडेत्यादौ नुमोंगसंज्ञासापेक्षत्वेन तदर्थं कित्वापादनस्य भाष्ये कृतत्वात्॥ नन्वेवं कुंभकार इत्यादौ षष्ठ्यंतेन समास इति सिद्धा
तासंगतिः॥ उपपदसंज्ञाया विभक्तिसापेक्षत्वादिति चेन्न॥ कर्मण्यणित्यादीनां उपपदे बुद्धिस्थ एवाणादेर्विधानमिति तत्रैव शब्देन्दु
शेखरे समाधानस्य करणात्॥ नन्वेवं ऋदुपधेभ्य इति वार्तिकासंगतिः॥ अनेनैव न्यायेन गुणाप्रवृत्तिसंभवादिति चेन्न कस्य कित्क
रणे प्रयोजनांतराभावः॥ इह तु संप्रसारणविधौ कृतार्थत्वाद्दुर्बलेनातिदेशेन प्राप्यमाणो गुणनिषेधो दुर्बलत्वाद्विधिना सह न स्पर्ध
त इत्यसंयोगादिति सूत्रे कैयटेनैव समाधानस्य करणात्॥ यत्त्वत्र तिङः न प्रकरणे नव्यैरुक्तं विचतिगृण्हातीत्यादावातिदेशिकङि
त्वस्य संप्रसारणे न कृतार्थत्वेन तया तदनंतरं प्राप्तगुणे न त्वदुक्तरीत्याऽतिदेशप्राप्तगुणनिषेधबाधापत्तिरिति तन्न॥ कैयटाशयानवबो
धात्॥ तथाहि असंयोगादिति व्यपदेशातिदेशः इत्यभिप्रेत्य हि ऋदुपधेभ्य इति वार्तिकं प्रवृत्तम्॥ अन्यथा विभिदतुरित्यादाविदु
दुपधेपि पूर्वविप्रतिषेधस्यावश्यकतया ऋदुपधेभ्य इत्युक्तिवैयर्थ्यं ऋदुपधे कित्वमनित्यं गुणे कृते संयोगोपधत्वादिदुदुपधे तु त
न्नित्यं गुणे कृतेपि कित्वप्रवृत्तिरिति हि तदाशयः॥ कार्यातिदेशे चेदुदुपधेपि गुणे कृते कार्याभावेनातिदेशाप्रवृत्तेः॥ कित्वस्य त
नित्यत्वमिति सर्वत्र साम्यमेव॥ तथा च संप्रसारणविधौ कृतार्थत्वादिति न दुर्बलत्वे हेतुः किंतु वसस्य कित्वाद्वैषम्यं॥ दुर्बलत्वं त

तिदेशस्यानित्यत्वेन गुणस्य परत्वात्॥ विचतीत्यादौ तु ङित्वस्य नित्यत्वेन गुणापेक्षया प्रबलत्वमेवातो नातिदेशस्य दौर्बल्यमिति।
परे तु यत्रोत्सर्गेणापवादनिमित्तविनाशस्तत्रैवायं न्यायः॥ दधतीत्यादौ तु कार्येण नाशो न निमित्तनाशः॥ प्रकृते च गुणेन निषेधनिमि
त्तकित्त्वस्य विनाशान्नायं न्यायः॥ गुणेन कित्त्वनिमित्तसंयोगविघटनात्। अत एव पुयोगादिति सूत्रे भाष्ये गतिकारकोपपदानामि
त्यस्याः प्रीतिप्रयोजनमुक्तं टापास्तापवादङीषुनिमित्तादंतत्वविघटनेनैतन्न्यायाप्रवृत्तेः॥ अत एव गविष्ठिर इत्यत्र गवीति वच
नादेवालुगित्युक्तमभियुक्तैः॥ लुकापवादस्य प्रवर्तनेनालुङ्निमित्तहलंतत्वविघटनात्॥ तेन धनक्रीतेति सिद्धं॥ सुबंतेन समासे
प्यनेन न्यायेन टापोऽप्रवृत्तौ ङीषितरसिद्धमिति प्राहुः॥ केचित्तु एतन्न्यायबीजमचरितार्थत्वं निषेधशास्त्रत्वं च सनेनापवादो यद्य
न्यत्र चरितार्थस्तर्हि न रंगेण बाध्यत इत्यपास्तमित्याहुः॥ अत एवेति॥ अनयोर्न्याययोर्विभिन्नाधिकारिकत्वेपि फलतो भेदाभावादि
त्यर्थः॥ अभ्यस्तसंज्ञासूत्रस्थकैयटोक्तरीत्या तु नयोर्विभिन्नफलकत्वाद्भिन्नार्थकत्वाच्च न कदाचित्तावदित्यादिना एकीकरणा
संगतिः॥ अस्त्रानन्तु गुणमिति॥ यथाऽपवादविषयसिद्धिस्तथोत्सर्गो भिनिविशते इत्येवं वक्तव्यं स्यात् न तु न तु इत्यादि॥ तथो
क्त्या हि पूर्वमुत्सर्गाप्रवृत्तिर्गम्यत इति भावः॥ पूर्वं प्रवृत्तिप्रयोजकमिति॥ अत एव स्थापीत्यादौ पूर्वं दीर्घत्वमसिद्धिः॥ क्वचिदित्युक्तेरि
यायेत्यादौ प्रतिपदोक्तस्यापि गुणादेरभावः॥ हेरमेति॥ अनड्वान् पंथा गोमानित्याद्यनुरोधेन तत्र कौंडिन्यन्यायस्य हल्ङ्यादिलोपप्र
वृत्तिर्नेति भावः॥ वार्णादांगं बलीय इति तु न विभिन्नस्थानिकत्वात्॥ नापि विप्रतिषेधः चरितार्थयोरेव तदंगीकारात्॥ न च सेत्वे हल्
ङ्यादिलोपस्याप्राप्त्या समासांतैः कपइव बाध एवात्र तथा च न बाधप्रयोजकमिति पूर्वग्रंथासंगतिरिति चेन्न॥ लोपरूपकार्येण

वात्रसंप्रसारणाय अभिप्रेतत्वेनतस्यात्रनुवाधइतितात्पर्यात् ॥ नवाधंतंइति ॥ यथाचसर्वेषांसमावेशस्तथाक्रमेणाभ्यासकार्या
णिकर्तव्यानीत्यर्थः ॥ अत्रचविकारपदेनलोपोपि ॥ अकृद्ग्रहणमिति ॥ ओहाक्त्यागेइत्यस्याप्यत्यर्थंतुनविद्यतेकिंत्वस्मिन्द
तिवक्तुमीह्याश्रयणात् ॥ अनजंतत्वादिति ॥ अनवकाशेनबाधेपुनरुत्सर्गप्रवृत्तेरेवमुक्तं ॥ नन्वनुस्वारस्यैवात्रनविधानात्तस्या
श्रुपाठात्कथमनजंतत्वमितिचेन्न ॥ यंयम्यतेहविरियजतीत्यादौगुणजस्त्वादिवारणायनुम्विधिसामर्थ्येनस्वनिवर्त्तकादेशोऽनु
स्वारस्यानाश्रसमाम्नायिकत्वकल्पनात् ॥ अट्कुप्वाङितिसूत्रेनुम्ग्रहणंपाठानित्यत्वज्ञापकमितितुनयुक्तं ॥ तस्यतत्रभाष्यकृ
ताप्रत्याख्यानात् ॥ अत्रचविकारइतिआगमस्याप्युपलक्षणं ॥ अतोनुकोविकारत्वाभावेपिनक्षतिः ॥ यद्वाबाध्यबाधकयोरन्यत
रस्यविकारत्वमात्रेणैतत्परिभाषाप्रवृत्तिः ॥ ननुज्ञापितेपिनचारितार्थ्यंनुकिकितोभ्यासस्यानजंतत्वादितिचेन्न ॥ किंतुभाविनो
त्रग्रहणेनादोषात् ॥ भाष्येतुचेच्छिद्यतेइत्यादौगुणाद्यर्थमभ्यासकार्येषुवैय्यधिकरण्येनान्वयमाश्रित्यज्ञापकत्वंवर्णितंतत्रस्व
स्मिन्चारितार्थ्यमकष्टसाध्यमेव ॥ अस्याश्चप्रतिपदोक्तपरिभाषयाऽभ्यासपदोच्चारणेनविहितकार्यस्यैवग्रहणंतुक्तंचनतया
तयान्वयस्यापीदमेवगमकं ॥ नन्वेवंविव्ययेइत्यादौउत्सर्गापवादाभावात्पूर्वंहलादिःशेषेवस्यसंप्रसारणंस्यात् ॥ उभयेषां
ग्रहणसामर्थ्येनवय्यादीनांगृह्यादीनांसंप्रसारणस्यहलादिःशेषापवादत्वेप्यस्यतथात्वेमानाभावात् ॥ किंचअभ्यासविकारेइ
त्यस्योभयेषांग्रहणसामर्थ्येनबाधे उभयेषांग्रहणेनसंप्रसारणेहलादिःशेषानापत्तिरितिचेन्न ॥ अनयापरिभाषयाबाधक
प्रवृत्तेर्बाध्यप्रवृत्तिविघटिकायाएवाभावोबोध्यते नत्वपवादादीनामपिउत्सर्गप्रवृत्त्युत्तरंप्रवृत्तिर्बोध्यते ॥ तथाचमीमांसन

इत्यादौ दीर्घे कृते इत्वाप्रवृत्त्या बाध्येत्वस्य पूर्वं प्रवृत्तावपि विव्यथ इत्यादौ संप्रसारणप्रवृत्तेरुत्सर्गप्रवृत्त्यविघटकतया तस्याप
त्रि· वादत्वेन न पूर्वं प्रवृत्तिमात्रस्वीकारे बाधकाभावः॥ एवमुभयेषां ग्रहणेन पुनर्विधानेनापवादत्वात् संप्रसारणस्य पूर्वं प्रवृत्तावप्य
भा· नया बाधकत्वाभावबोधनाद्धलादिःशेषः सुलभः॥ ननूकारीत्येव विव्याधेत्यादिसिद्धौ उभयेषां ग्रहणवैयर्थ्यमिति चेन्न॥ निज्यावि
२९ व्याथेत्यादौ बाधकसंप्रसारणप्रवृत्तेरनन्तरं बाध्यहलादिःशेषाप्रवृत्त्या पूर्वं हलादिःशेषापत्त्या तद्वारणार्थत्वात्॥ नन्वेवमववेष्टइ
त्यादौ हलादिशेषात्पूर्वं टस्यात्वापत्तिरिति चेन्न॥ अत्र ह्रस्वात्परत्वाद्धलादिःशेषे वाणोदागमित्यस्यानित्यत्वात् ह्रस्वात्पूर्वं मयादेशे पु
नर्हलादिःशेषे रूपसिद्धिः॥ यद्वा त्वे लोपे ह्रस्वे यणि पुनर्हलादिःशेषे रूपसिद्धिः॥ नन्वेवं गुणो यङ्लुकोरित्यत्रेक्परिभाषाप्रवृत्तौ
डोढौक्यत इत्यादौ पूर्वं ह्रस्वे गुणस्य चरितार्थत्वेन लोलूयते नोनूयत इत्यादौ परत्वाद्गुणे ह्रस्वापत्तिः॥ मम तूत्सर्गस्य प्रथमप्रवृत्तिक
ल्पनस्यैव परिभाषार्थत्वेनादोषादिति चेन्न॥ धर्मिग्राहकमानेन बाधकप्रवृत्तिवैफल्यासंपादिकाया एव बाधकप्रवृत्तेरनन्तरं बा
ध्यप्रवृत्तेरनया कल्पनेनादोषात्॥ प्रकृते च गुणोत्तरं ह्रस्वेन त्र तत्प्रवृत्तिवैफल्यस्य स्पष्टमेवेति नन्वभिया बाध्यह्रस्वस्यैव पूर्वं प्रवृत्तिः
॥ बाध्यस्य बाधकात्पूर्वं प्रवृत्तौ तु अबीभवदित्यादौ सर्वबाध्यस्य प्रथमं प्रवृत्तौ पश्चाद्येन नाप्राप्तिन्यायेनोःसुपि यण् इत्यनेन तद्बाध्यस्य राम·
दीर्घो लघोरित्यस्य प्रवृत्तौ पश्चात् ओःसुपि यणिति इत्वे लस्य लक्षणस्येति न्यायेन दीर्घाप्रवृत्तौ न तत्सिद्धिः॥ पिपविषत इत्यादौ दीर्घा २९
प्राप्तौ धीत्यस्य चरितार्थे पिवर्गप्रत्याहारग्रहो निरवकाश एव॥ न च विभावयिषतीत्यत्रेत्वस्य चारितार्थ्यमिति वाच्यम्॥ एवमपि वि
व्यथ इत्यत्र उकारीत्यादोषापत्तेर्मम तु ह्रस्वात्पूर्वं प्राप्तौ सुपि यणित्यस्यालीलवदित्यादौ दीर्घाप्राप्त्या चरितार्थस्यारीरवदित्यादौ पर

त्वाद्दीर्घेणबाधितस्यदीर्घोत्तरंप्रवृत्तेर्बाधकदीर्घप्रवृत्तिवैफल्यसंपादकत्वेनपूर्वमेवेत्वेपश्चाद्दीर्घेरूपसिद्धिः॥ यत्रबाध्यस्यबाध
कात्पूर्वंपश्चाच्चसफलबाधकप्रवृत्तिविघटिकाप्रवृत्तिस्तत्रसर्वथाबाध्यस्याप्रवृत्तिरेव॥ यथाऽतएकेतिसूत्रेभाष्येपापच्यतेइत्यादिदीर्घे
णबाधितयोरेत्वाभ्यासलोपयोःपश्चाद्प्रवृत्तिरित्युक्तं॥ तथाचायंनिष्कर्षः॥ यत्रबाधकप्रवृत्त्युत्तरंसर्वथाबाध्याप्रवृत्तिसंभवः॥ तत्र
बाध्यंप्रथमंप्रवर्त्तेतां पश्चाद्बाधकं॥ यत्रापिसफलबाधकप्रवृत्तिविघटिकापश्चात् बाध्यस्यप्रवृत्तिः॥ तत्रापिपूर्वंबाध्यंप्रवर्त्तते॥
यत्रतुपूर्वंपश्चाच्चबाध्यस्यप्रवृत्तिः॥ सफलबाधकप्रवृत्तिविघटिकानतत्रनैवबाध्यंप्रवर्त्तते॥ इतरत्रतुबाधकस्यैवपूर्वंप्रवृत्तिः॥
पश्चाद्बाध्यस्येति॥ केचित्तुसर्वत्रबाध्यप्रवृत्त्युत्तरंबाधकप्रवृत्तिरेतत्परिभाषार्थः॥ उभयेषांग्रहणेनचसामान्यतएवलोपात्संप्र
सारणस्यबलीयस्त्वमितिविप्रतिषेधइत्यादौनदोषः॥ पिपविषतेइत्यादौविभावयिषतीत्यादौचचारितार्थ्येनदीर्घस्यानवबाधकत्वेदी
र्घसिद्धिः॥ मीमांसतेइत्यादावचरितार्थ्यमात्राद्दीर्घस्यानवबाधकत्वादित्वेदीर्घसिद्धिः॥ एवंहिअववर्ष्टदित्यपिसिद्धं॥ अददरदित्या
दौचेत्त्वदीर्घयोरत्वेरूपसिद्धिरित्याहुः॥ तन्नेतिइदमयुक्तं॥ यत्रबाध्यप्रवृत्त्युत्तरंबाधकप्रवृत्तिस्तत्रैवेयमितिकेयटाशयस्यसुव
चत्वात्॥ नचदीर्घेकृतेनपरकरणात्नुकोप्राप्तोधर्मिग्राहकमानविरोधः तथासतिनुग्विधानवैयर्थ्यापत्त्यातत्रान्यतनपरत्वस्य
बाभाव्यतइत्यादौभूतपूर्वदीर्घएवनुक्स्यात्प्रवृत्त्यर्थत्वात्॥ रुग्रिकोर्दीर्घस्याप्रवृत्त्याकितइत्यस्यचारितार्थ्याच्च॥ अजेनाभ्यासदीर्घेइ
तिवदनस्तवाप्येवगतिः॥ पूर्वदीर्घेनुग्विधिवैयर्थ्यापत्तेःकृतेतुक्यनंजनतनाद्दीर्घाभावेरकित्ग्रहणस्यनुकिदीर्घाप्रवृत्त्यर्थत्वा
संभवात्॥ लोपस्याभ्यासैकदेशविकारत्वाभावान्नदोषः॥ धर्मिग्राहकमानेनैकदेशविकारेएवतत्प्रवृत्तेः॥ अभ्यासलोपतयात्वे

पि सत्वस्याभ्यासविकारत्वाभावात् ॥ न स्पर्धीयेण बाधेन तत्सन्नियोगविशिष्टाभ्यासलोपस्यापि अप्रवृत्तिरित्यपि भाष्याशय उक्तश्रेयः
॥ सर्वथेदं भाष्यमेकदेश्युक्तिरिति नव्योक्तं नादर्तव्यमिति दिक् ॥ एकाज्भ्य इति ॥ अनेकाचकेः सूयक इत्यादौ तुण्वुलिल्लिनीति प्रत्य
यात्पूर्वमुदात्तत्वं वुनि नित्वादाद्युदात्तत्वमिति स्वरे विशेष इति भावः ॥ पुगन्तनिषेधेनेति ॥ अन्यथा नमिकंपीतिरेणैव पुगन्तबाधसिद्धेस्त
द्वैयर्थ्यं ॥ ७१ ॥ हसितमिति ॥ नपुंसके भावे क्तः ल्युट्चेति क्तल्युटौ घञोपवादो नपुंसक इति विशेषोक्तेः ॥ लिङ्लोटाविति ॥ इ
च्छार्थेषु लिङ्लोटाविति अस्य समानकर्तृकेषु तुमुन् इत्यस्यापवादः ॥ अत्र लिङ्गेति लिङ् भवत्येव ॥ लिङ्चेति नियमात् लोडपि
वारयितुं शक्यः ॥ ननु तुमुन् भावे कर्तृकर्मणोर्लिङ्लोटाविति कथं बाध्यबाधकभावः ॥ मैवम् ॥ भावेपि लिङ्लोटोर्विधानात्
कृत्यतृज्ग्रहणमिति ॥ ननु कथमेतत् ॥ अर्हेर्थे विधानार्थं तयोरुपादानमावश्यकत्वात् इति चेन्न ॥ कर्तरि कृदित्यादीनां कर्त्रा
द्यर्थे सत्वे एव कृतः न तदसत्वे इत्यत्रैव तात्पर्येणार्हाद्यर्थस्याधिकस्यापि कर्तृरूपार्थस्य तत्र सत्वात् तत्सिद्धेः ॥ ध्वनितं चेदं वासरूपोऽस्त्रि
याम् इत्यत्र भाष्यकैयटयोः ॥ श्वः पक्तेति ॥ ननु अनद्यतने इति सूत्रे भाष्ये अनद्यतने इति योगं विभज्य सदित्यनुवृत्त्या अनद्यतने लृ
टः सद्विधानेन अनद्यतने भविष्यति लृट मनु माय श्वः सोमेन यक्ष्यमाणः अनद्यतने भविष्यति इत्यादयः प्रयोगाः साधिताः ॥ ए
वमेव भविष्यत्युपसंख्यानात् नागम्यादीनां श्वो ग्रामं गमी इत्यादावपि साधुता भविष्यति गम्यादय इत्यत्र भाष्यवार्तिककृद्भ्यामुक्ता ॥
तथा चात्र लुडिङ्ष्वेवेति ॥ योगविभागसिद्धस्यासार्वत्रिकत्वात् ॥ भ्रमितेष्वेव तेन लृट् इत्यनुमानात् ॥ अत एव तत्र भाष्यकृता श्वोग्नीना
धास्यमानेनेत्यादयः प्रयोगा अन्यथैव साधिता इति दिक् ॥ ७३ ॥ नस्यादिति ॥ समासाक्षिप्तोत्तरपदेन विशेषणादिति भावः ॥ ननूक्त
वैत्त

सि नारशब्दस्येति॥पुंस्त्रियाःस्त्रियाःपुंसोवाआरोपेणतयोःसामानाधिकरण्यमनभिधानादितितुवाखलतीतिसूत्रेशब्दरत्नेस्पष्टं॥नन्वेवमिति॥ व
ननुसामान्यरूपेणविशेषरूपेणचेत्युक्तत्वात्बहुव्रीहिवत्स्वरूपातिदेशेनतुलभ्योयंधर्मइतिकथंशंकोत्थितिरितिचेन्न॥विशेषरूपेणेत्यस्या
नुपूर्वीविशेषरूपेणेत्यर्थभ्रमेणनानुत्थाप्यप्रातिपदिकत्वव्याप्यार्थपरत्वेनसमाधानात्॥विभक्ताविति विषयसप्तमीयं॥तेननगौ
स्त्रियामितिविहितविभक्तिस्वरेपिप्रवर्त्तते॥नांतरीयकतयेति॥अंतरशब्दोगहादिषुपठ्यतेसचविनार्थेवर्त्तते॥अंतरेभवंअंतरीयंत
त्रनञ्समासेकृतेपृषोदरादित्वात्भाष्यकारवचनप्रामाण्यात्वानलोपाभावः॥तत्रस्वार्थेकन्इतिभावेइतिसूत्रेकैयटः॥न
नुष्याघ्रीकच्छपीति॥इदमुपलक्षणं॥माषान्वपत्याभीष्ट्यइतिणिनौकृतेसुवंतेनसमासःस्यात्तदासमासेनईकारइतिणत्वंनस्या
त्माषवापिणइत्यादावेवतुस्यात्गर्गभगिनीत्यादौणत्ववारणायसमासरूपप्रातिपदिकांतस्यैवणत्वविधानात्॥एवंसाकू
टिनमित्यत्राभिविधाविति इनुणितत्तोविभक्तिश्चप्राप्नोति अणिनुणइत्यण्चतत्रस्वार्थिकत्वेनांतरंगत्वादण्स्यात्॥ततश्चकूटि
नित्यस्यैवांगत्वाद्दादिवृद्धिःस्यात्॥प्राक्सुबुत्पत्तेःसमासेःतदंगत्वात्पूर्वंसमासः॥अण्प्रत्ययोहिप्रातिपदिकविशेषापेक्षत्वा
त्॥बहिरंगःतत्रहिसंकूटिन्नित्यस्मात्समासप्रातिपदिकादण्प्रत्ययेसतीष्टंभवति॥अतएवेति॥कारकांशेबहुलग्रहणात्सि
द्धत्वंकिंतुएकदेशानुमत्यैवसिद्धत्वादित्यर्थः॥तदुभयमन्याख्यानमिति॥परेतुअत्रकारकग्रहणंकर्तृकरणइत्येतत्सूत्रविहित
समाससमात्रविषयकं॥कारकांशेबहुलग्रहणमूलकत्वादस्यालदेशवाचनिकत्वेचानयैवकाष्ठैःपचतितरामित्यस्यव्यावृत्तेःकृ
तृकरणइत्यत्रकृद्ग्रहणस्यचवैयर्थ्यं॥ग्रामशब्दस्यगामिन्शब्देनसमासेस्त्रियांग्रामगामिनीत्यत्रणत्वापत्तेश्च॥अतएवसंब

दूषितेः ४॥

त्रि॰ धसामान्यपक्षं तस्य देवदत्तस्येत्यस्य स्त्रीलिंगमाषवापिन् शब्देन समासे देवदत्तमाषवापिनीत्यत्र प्रातिपदिकांतेतिणत्वं न ॥ त्व
गा॰ द्वीत्यातुक्तग्रहणपरिभाषया वापिन् शब्दस्य कृदंतत्वान्ङीवुत्पत्तेः पूर्वं षष्ठीति समासे समासरूपप्रातिपदिकांतत्वाच्चस्यणत्वापत्तिः
३९ उपपदमतिङिति सूत्रस्य भाष्यं तु तत्रैव प्रतिकूलं ॥ द्वयोः समकालिकत्वमभिप्रेत्य वार्तिककृता षष्ठीसमासात् उपपदसमासो विप्रति
षेधेनेति वार्तिकेन विप्रतिषेध उपन्यस्तः ॥ तदुत्तरं च न वा षष्ठीसमासाभावादुपपदसमास इति वार्तिकेन च दर्शितः ॥ इदं च खंडन
वार्तिकं भाष्यकृता द्वेधा व्याख्यातं ॥ तत्र चाद्यव्याख्यानं न वार्थो विप्रतिषेधे न किं कारणं षष्ठीसमासाभावादुपपदसमासो भविष्य
ति ॥ गतिकारकोपपदानामिति सुबुत्पत्तेः प्राक् समासवचनादिति ॥ अंतरंगबहिरंगयोर्विप्रतिषेधायोग इति तद्भावं कैय्यट आ
ह ॥ द्वितीयव्याख्याने ॥ अथवा विभाषा षष्ठीसमासः ॥ यदा न षष्ठीसमासः ॥ तदोपपदसमासो भविष्यति प्रयोजनाभावाद्विप्रति
षेधो न पठितव्य इति तदाशयं कैयट आह ॥ तथा च नवेत्यादि खंडनवार्तिकस्यैवायुक्तत्वात्फलाभावाच्च विप्रतिषेधो न पठितव्य इ
त्यर्थद्वयमुक्तं भवति ॥ नह्यत्रांतरंगबहिरंगयोर्विप्रतिषेधायोगस्य प्रथमसुक्तस्य प्रत्याख्यानं गाधोपि प्रतीयत इत्याहुः ॥ विशेष्या
न्व- यित्वमिति पाठः ॥ प्राय इति ॥ सुकपालो घटश्चित्ररूपवान् लंबकर्णो दहत्कुक्षिरित्यादिव्याहृतत्वेयेद्दूरं ॥ न चहीति ॥ हैकुलि
जिक इति दोषस्तितोक्तं तु अयुक्तमेवेति भावः ॥ परमदृषदिति पाठः ॥ सुदृषदिति पाठस्त्वयुक्तः तत्राव्ययपूर्वपदप्रकृतिस्वरस्यैवेष्टत्वे राम॰
न समासांतोदात्तत्वस्य दुर्लभत्वात् ॥ चड्ड्यपि इति ॥ ननु ऋदृशिभ्यां चड्डुले भ इति चेन्न ॥ ऋदृशोत्यतोऽङीत्यनुवर्तमाने स्वय ३९
ने रह इति चड्ड्यपि स्यात् ॥ न्यायमूलेति ॥ ङितित्रस्वश्चेत्यत्र वाचि ह्रस्वश्चेत्येव सिद्धे वामीति व्यर्थं सदस्यां ज्ञापकं इति केचित् ॥ ननु म

तिश्चो भा चेति विग्रहे हुंहे यीति पूर्वनिपातनापत्तिः॥ नलोपः सुबिति सूत्रस्थभाष्यरीत्या पूर्वं प्रयोगे यस्य घित्वं भावितं सपूर्वं निपातनइ
त्यर्थे नात्र पूर्वप्रयोगे नदीत्वेन घित्वाभावात्॥ अंगाधिकाराभावे न प्रत्ययस्य निमित्तत्वालाभात्॥ एवमर्थस्य फलं ह्रुलि ह्वाविति
यथान्यासे तु वामीत्यतस्तांह्वचयेणङिःत्यनन्यस्यैव ग्रहणमिति॥ नचित्र्वङादौ मत्यादीनां नदीत्वमिति चेत्सत्यम्॥ एवमपि वामि
ह्रस्वहूत्यन्यासेन सिद्धे वामीति सूत्रस्योक्तपरिभाषाज्ञापकत्वात्॥ नचैवं ज्ञापितेपि नस्त्वसिंश्चारितार्थ्यं ङिः ह्रस्वचनेष्वामि अप्रा
नदीत्वापत्तौ व्यविधानेन सूत्रारंभसामर्थ्येनास्मिन्नदनाश्रयणमिति वाच्यम्॥ अस्यापि यदागमन्यायेन सन्निपातविघा
ताभाव संपादनात्॥ स्फुटीभविष्यति चेदमुपरिष्टात्॥ किंच स्वरतीति सूत्रस्थभाष्यपर्यालोचनया नद्यन्ताद्विहितस्येत्यर्थेन
यणुत्तरमाट्प्रवृत्त्यायणैव नदीत्वविनाशेनाटि नैनतत् परिभाषाप्रवृत्तिः॥ तस्माद्वामीत्यस्य ज्ञापकत्वं सुस्थिरं॥ ह्रस्वमितुक्ग्रहण
दिति॥ परपरस्याबहिरंगत्वस्यानाश्रयणाच्चिन्त्यमेतत्॥ यथा कथं चिदिति॥ नाजानंतर्ये परिभाषायैतदप्रवृत्तेरेव सुक्तिः यद्वा
पूर्वं किंचेत्यादिना तुग्विधौ बहिरंगपरिभाषाया अप्रवृत्त्युक्तेवसुक्तं॥ केचिदिति॥ न्यायमूलत्वारभ्येनदंतके षांचितयं योवा
ध्यः॥ अजंतनपुंसकशेरवरात्॥ परेतुक्तन्मेजंतसूत्रे भाष्ये आथर्येइत्यादौ अव्ययसंज्ञावारणाया निकारोकार प्रकृति
रिति प्रवृत्तं वाजिं कं सन्निपातपरिभाषया प्रत्याख्यायकः पुनरत्र विशेषः॥ एषापरिभाषा क्रियेत अनन्यप्रकृतिर्वोच्यते
त्यविशेषभाषा का वश्यमेषापरिभाषा क्रीयेत बहून्येतस्याः परिभाषायाः प्रयोजनानीत्युक्तं॥ न्यायसिद्धत्वेऽवश्यकर्तव्ये
त्युक्तिश्चासंगता। किंच न्यायसिद्धत्वे विशेषणविशेष्यभावेप्येतत् प्रवृत्त्यापत्तौ नप्रत्ययः॥ पूर्वपरसन्निपातनिमित्तक

त्रि॰ इति भाष्यासंगतिः॥ अस्यैकदेशयुक्तित्वकल्पनं तु विरोधिभाष्यांतरादर्शनात् बाधकाभावाच्चायुक्तं॥ नच वर्णाश्रय इति वार्ति-
गा॰ कं प्रत्ययः साक्षादेव निमित्तं नेति व्याख्याय न प्रत्यये त्यादिनोक्तव्याख्यां दूषयित्वांगसंज्ञाद्वारेण प्रत्ययो न निमित्तं स्यादित्यभिप्रा-
३२ येणांगसंज्ञा न ह्यनिमित्तं स्यादिति प्रकारांतरेण भाष्यकृता तत्व्याख्यातं॥ तत्र शैवो गार्ग्यो वैनतेय इत्यादावपि तस्या लोपनिमि-
त्तत्वानापत्त्या वर्णाश्रय इत्यस्य वैयर्थ्यं बाधकमिति वाच्यम्॥ तद्वैयर्थ्येनाग्रिमस्यांगसंज्ञेत्यादेस्तथात्वेपि न प्रत्यय इत्य-
स्यैकदेशयुक्तित्वे बीजाभावात्॥ वस्तुतोंगसंज्ञेत्यपि नैकदेशयुक्तिः॥ अंगसंज्ञाविधौ यस्मादित्युपात्तं तत्र प्रत्ययविधौ तदंतविधि-
र्येन रूपेणउपात्तस्तेन रूपेण परामर्शकं॥ अत एव भुनक्तिइत्यादौ न दीर्घः॥ तथा च दाक्षिरित्यादौ अदंतप्रकृतेः प्रत्यय-
स्य चानंतर्ये अंगसंज्ञानिमित्तं तच्च लोपे नश्यति॥ विशिष्टप्रकृतेरानंतर्यनाशात्॥ शैव इत्यादौ विशिष्टप्रकृतेरानंतर्यं नां-
गसंज्ञानिमित्तं॥ न च शैव इत्यत्रापि प्रातिपदिकप्रत्यययोरानंतर्यं अंगसंज्ञानिमित्तं तच्च लोपे नश्यत्येव प्रातिपदिकत्व-
नाशादिति वाच्यं॥ लौकिकैकदेशविकृतन्यायस्याशास्त्रीयेपि प्रवृत्त्या तेन प्रातिपदिकत्वस्य सुलभत्वात्॥ यदागमन्यायस्तु
शास्त्रीयकार्य एवेति तुक्स्तुकोरेतत् परिभाषासंचारो भाष्यकृदुक्तो न विरुद्धः॥ यद्वा यदागमन्यायो नैतत्परिभाषाविघ-
टकः॥ कृन्मेजंतसूत्रस्थभाष्यात्॥ न चैवं दाक्षिरित्यत्र वृद्धेर्लोपस्य बलवत्त्वात्पूर्वं लोपेऽदंतत्वाभावेनांगत्वाभावात् वृद्ध्य- राम॰
नापत्तिरिति वाच्यं॥ षट्त्वस्येवांगसंज्ञायाः अलुग्वृत्तित्वाभावेन स्थानिवत्त्वेन तत्सत्त्वलाभात्॥ इड्विधौ वलपरस्येवांगसंज्ञा- ३२
यांपच्छ्वस्यालमात्रोपस्थापकत्वाभावाच्च॥ ग्रामणिकुलमित्यादौ द्व्याश्रयत्वेन ह्रस्वस्य बहिरंगत्वेनासिद्धत्वान्नुक्

तिसृणामित्यादौ नुट्त्रयादेशस्यापि विभक्तिविशेषापेक्षत्वेन बहिरंगत्वसाम्यात् तिस्रादेशेन विप्रतिषेधोपपत्तिः॥ विशेषापेक्षस्य बहिरं- गत्वं तु पुंयोगादिति सूत्रे सांकूटिनमित्युदाहरणे भाष्यकैयटयोः स्पष्टम्॥ षत्वं तु कौस्त्यत्र यथा न तुक्ग्रहणवैयर्थ्यं तथोक्तं प्राक्॥ कृतितु कृद्ग्रहणं तु भाष्यकृता प्रत्याख्यानमेव॥ तुग्विधौ बहिरंगपरिभाषायाः अप्रवृत्तिज्ञापने फलाभावाच्च॥ किंच विशेषणविशेष्यभाव संनिपातस्यापि ग्रहणे ग्रामणिच्छत्रमित्यत्रापि तुक् न स्यात्॥ ह्रस्वतुकोस्त्वत्र साम्यं॥ तुकः पदद्वयसंबंधिवर्णद्वयनिमित्तत्वात् ततश्च नात्रान्तरंगपरिभाषोपतिष्ठते॥ यत्तु वामीति सूत्रमस्याः परिभाषाया ज्ञापकमिति हरिदीक्षितेनोक्तं तन्न॥ मतिस्त्री माचेति विग्रहे द्वंद्वे घीतिपूर्वनिपातानापत्तेः॥ नलोपः सुविति सूत्रस्थभाष्यरीत्या पूर्वप्रयोगे यस्य घित्वं तस्य पूर्वनिपात इत्यर्थेनात्र पूर्वप्रयोगे अंगा- धिकाराभावेन प्रत्ययस्य निमित्तत्वालाभात्॥ एवमर्थे सफलं तु लिहाविति॥ वस्तुतो यदागमन्यायेनापि सन्निपातविधानाभाव संपादने॥ ज्ञापकं चात्र न तिस्त्रिति निषेधः॥ अन्यथा परत्वात्तिस्रादेशे सन्निपातपरिभाषया नुटोऽप्राप्तौ तद्वैयर्थ्यं॥ तदेतदभिप्रे- त्य ह्रस्वेजं न सूत्रे प्रतिविधेयं दोषेष्विति सिद्धान्तभाष्यव्याख्यावसरे ज्ञापयतीत्याकारेण न भक्तः पुक्न व्यवधायक इत्युक्तं कैयटेन॥ नलोपः सुविति सूत्रस्थवृत्रहभ्यामित्यादौ सन्निपातपरिभाषया नुग्वारणपरं भाष्यं त्वेकदेश्युक्तिः॥ नपुंसके वृत्रहे इत्यत्रानया नुग्- वारणासंभवेन कृतितुक्ग्रहणस्यावश्यकत्वात्॥ एतेन कृति तुग्ग्रहणात् तुग्विधौ बहिरंगपरिभाषा नेत्यपि परास्तं॥ वृत्रहपुत्र इत्याद्यर्थं तदा- वश्यकत्वात्॥ तेन प्रियतिसृणि तानि कानि इत्यादौ नुम्। तेषामित्यत्र सुट् पचमान इत्यत्र मुक् च सिद्धः॥ मुक्तु अधिजिगांसमान इत्यत्र श- पं बाधित्वा चरितार्थः॥ एवं च ग्रामणीत्यत्र सन्निपातपरिभाषाया अप्रवृत्तौ अंतरंगपरिभाषयैव न वापि शरणमित्याहुः॥ स्वाति

त्रि· त्किस्येति ॥ शतानीत्यादौ स्वस्य स्वनिमित्तविघातकत्वेपि सामर्थ्यात्प्रवृत्तिरिति भावः ॥ ननु शतानीत्यत्र स्वनिमित्तभूतः सन्निपा
गा· तोऽजंतस्य सर्वनामस्थानेनानंतर्यं स च स्वेनैवापहृतः नांतसर्वनामस्थानयोः सन्निपातो लुका विनाश्यः ॥ स च ननु मो निमित्तं इ
३३ ति कथं सन्निपातपरिभाषया लुको वारणं ॥ एवं श्रीपायेत्यत्रानया कथमालोपवारणं ॥ एवं नदीन्यादौ अनया संबुद्धि लोपाभावापाद
नं कृत्स्नमेजंतसूत्रे भाष्यकृताकृतं ॥ नद्यंतांगसंबुद्ध्योरानंतर्यस्य स्वयमनित्यमित्यर्थं तु ह्रस्वेनैव विनाशितत्वात् ॥ ह्रस्वांतांगसंबुद्ध्योरा
नंतर्यस्य लुका विनाशेपि स्वानिमित्तत्वात् ॥ स्वसंपाद्यनिमित्तविघातकस्य स्वयमनिमित्तमित्यर्थे तु भवतीत्यादावव्वादेशस्य गुणः ॥ ता
भ्यामित्यादौ दीर्घत्वे त्वे सादीनां त्वदाद्यत्वकादेशादयो निमित्तानि न स्युरिति महोपप्लवः ॥ दोषाः खल्वपि साकल्येन परिगणिता इति
कृत्स्नमेजंतसूत्रस्य भाष्यस्य दत्तजलांजलिता च ॥ एवं आधये कुंभकारेभ्य इत्यादौ गुणत्वे त्वयोर्निमित्तभूतसन्निपातः ध्यंतादंतविभक्त्योः
स च स्वेनैवापहृत इति कथमियमुपतिष्ठतामिति चेन्न ॥ श्रीपायेत्यत्र बहवः प्रकाराः प्रभायामस्माभिर्दर्शिताः ॥ शतानि नदीत्यादौ
तु अजादंतविभक्त्योः सन्निपातस्य स्वेन नाशेपि स्वनिमित्तभूतांगविभक्त्योः सन्निपातोऽवशिष्यत एव ॥ नन्विदमेगमन्यदेवेति वाच्यं
॥ शास्त्रीयाशास्त्रीयधर्मसाधारणाभ्यायदागमैकदेशविकृतन्यायेन च तत्त्वप्रत्यभिज्ञानात् ॥ न चैवं भवति ताभ्यामित्यादौ गुणदीर्घ
त्वादीन्यपि न स्युरिति वाच्यम् ॥ गुणादिषु कृतेषु शास्त्रीयाशास्त्रीयकार्यसाधारणाभ्यां ताभ्यां स्वनिमित्तभूतसन्निपातसत्त्वविज्ञानेन राम·
तद्विघाताभावात् ॥ नदीशतानीत्यादौ लुक्लोपयोस्तद्विघातोऽस्त्येव ॥ प्रत्ययलक्षणस्य शास्त्रीय एव प्रवृत्तेः ॥ एकदेशविकृतन्यायेन ३३
विकृतावयवबुद्धेरभावात् ॥ तथा च सन्निपातलक्षणविधौ निमित्तभूतस्यानंतर्यस्य विघातेन त्वप्रतियोग्यनियोगिनोरन्यतरस्य न

द्विशेषणयोर्वा विघातकविधेः स्वो निमित्तमित्यर्थ इति दिक्॥ ननु तिसृ इत्यत्र प्रकृतेः रामायेत्यत्र प्रत्ययस्य साकल्येनापहारान्न लौकि
कैकदेशविकृतन्यायावतार इति कथमत्र परिभाषोपतिष्ठतां इति चेदत्रायं निष्कर्षः॥ अत्र सन्निपातशब्देनानन्तर्यमेव उक्तं युक्तेः॥ स
च स्वनिमित्तभूतः स्वसंपाद्यश्च॥ यद्वा स्वनिमित्तभूतयोस्तत्वेन प्रत्यभिज्ञायमानयोश्च सन्निपातोऽत्र ग्राह्यः॥ प्रत्यभिज्ञा च तत्स्थानिक
तया वा लौकिकैकदेशविकृतन्यायेन वा यदागमन्यायेन वा॥ तत्राद्यस्योदाहरणं तिसृः रामायेति स्वनिमित्तप्रकृतिप्रत्ययस्थानि
कत्वात्॥ द्वितीयस्य नदीकुमकारेभ्य इति॥ तृतीयस्य शतानीति॥ तद्विघातकत्वं चानेकधा क्वचिदानन्तर्यमात्रस्य यथा यासा शकृदौ
पद्गतौ इयेषेत्यादौ क्वचिदनुयोगिनः यथा नदी शतानीति प्रतियोग्यनुयोगिनोरल्समुदायविघातः समुदायलोपात्मक एव नैक
देशलोपः न विकारः॥ नेदमदसोरिति ज्ञापकात्॥ अन्यथैभिरित्यत्र भिस्निमित्तस्यादत्वस्य तद्विघातके सन्निमित्तत्वाभावे ऐ
सोऽप्रवृत्तिसिद्धेस्तद्वैयर्थ्यं॥ तेन भवति नेरित्यादौ गुणे सार्वः प्रवृत्तिः॥ ननु पूयमित्यत्र जसः शी कस्मान्न सकृद्गतिन्यायादिति भाष्य
विरोधात्॥ तस्मादनयैव परिभाषया स वारणीयः॥ स चोक्तरीत्या न संभवतीति चेन्न॥ शेषे लोपष्टिलोप इति पक्षाश्रयणात् पसदृश
स्यापि भाष्ये स्थितत्वात् शेषे लोप इति सूत्रस्य शेषग्रहणं शक्यमकर्तुं इति भाष्यं तु निमित्तसमर्पकशेषग्रहणाभिप्रायकं॥ अत एव त्य
दादीनामः इति सूत्रे टिलोपप्राप्त्यभावार्थ इति वार्तिकं संगच्छते॥ अन्यथा ते इत्यत्रापि शीभावानापत्तिः॥ एवमेव तु भ्यम् अस्मादित्यादौ
स्मायादयः परिहर्तव्याः॥ प्रतियोग्यनुयोगिनोरल्रूपयोस्तयोर्ये विशेषणेऽल्रूपे तयोश्च तन्मात्रविकारान्य एव विघातः स च स
विशेषणयोः प्रतियोग्यनुयोगिनोः सर्वविकारः॥ अल्मात्रलोपश्च॥ आद्यं अतिजरेण अतिजरैः इत्यादि द्वितीयं गव्यितेत्यादि अ

त्रि· त्रयस्य हल इति लोपाभावः॥ अत्र बहुवचनेऽनिति सूत्रे झलीति॥ तद्धिरामाणामित्यत्रे त्वाभावाय॥ मारणतोषणेतिजानने रूप
गा· धातुर्स्वार्थमितित्वचनदेतदभिप्रेत्य कृन्मेजन्त इति सूत्रे भाष्ये एतत्परिभाषादोषेषु पुकुह्रस्वत्वस्यादीदपत्॥ मन्तुपश्चि भन्तुदात्त
३४ त्वं पूर्वविनिघातस्य॥ अग्निमान्परमवाचायादेशः॥ सुपि चेति दीर्घे सत्युत्तपा प्रतिविधेयं दोषेष्विस्मुक्तं॥ अमुनाऽनित्यत्र दीर्घे सति नुन॥ ना
शब्देयत्कार्यं तत्र मुभावस्य नमुनेऽनित्यत्र भाष्यकृता नोक्तेः॥ एतत्परिभाषाफलत्वेनास्योपन्यसनपरं कृन्मेजन्त इति सूत्रस्थभाष्यं तु पूर्वप
क्षिणः॥ अत एवा ने सुपीति सूत्रे सुकि दीर्घ आपादितः दोरद्वो रिति सूत्रे भाष्ये दांतधांतयोर्नत्वधत्वे आपाद्य थांतइति सिद्धमित्तं तेन
नैषादकर्षुक इत्यत्र ह्रस्वः जग्धमित्यत्र थत्वं अष्टानामित्यत्र हलि विधीयमानमात्वं एधेत इत्यत्र गुणः कुमार्यै इत्यत्र यण् स्त्रियै
इत्यत्रेयङ् सख्याविन्यत्र यण् नेऽनित्यत्र गुणः सर्वेषामित्यत्रैत्वं मराणामित्यत्रात्वं सन्त्र्कं भुरित्यत्र कुत्वं गवाग्रमित्यत्र दीर्घो ऽनड्वा
नित्यत्र यण् रामेरित्यत्र वृद्धिश्च सिद्धाति॥ सन्निपातपरिभाषाया अनित्यत्वेन समाधानं तु विशिष्यैतद्दोषगणनभाष्येण विशिष्य
तत्तद्दोषपरिहारोपायप्रदर्शनपरकैयटेन च विरुद्धं॥ आर्द्धधातुक इति सूत्रस्य आतो लोपे रक्षसेति प्रयोजनपरभाष्यं तु नित्यत्वा
त्स्यादेशात्पूर्वं आतो लोपापत्तिः स्यादेशस्तु तस्यैत्यत्र चरितार्थः॥ अत्र प्रत्ययोपदेशे अकारान्ताभावेन लोपाप्राप्तेरित्यभिप्रायकमिति
नतेनाप्यनित्यत्वप्रत्याशा। एवं तर्हि माभूदिति भाष्यं तु असिद्धवत्सूत्रेणागृह्यमाहादिसिद्धौ तत्रानुवर्तनीयं इत्यभिप्रायेण विधिश्च्या
पूर्वे एव तेन न पपिवानित्यत्रालोपः सिद्धः॥ तस्य नियमत्वेन विधित्वाभावात् कुत इति चेत्॥ धर्मिग्राहकमानादित्यवेहि॥ अस्यां च ३४
परिभाषायां नतिस्त्रिति तिनिषेधो ज्ञापकः॥ तत्र चतिस्त्रादेशो विधिरेव तस्माद्यान्येन स्याः परिभाषायाः प्रयोजनानि तद्दर्थमेषाकर्त

ष्येत्वनुपसंहारभाष्येकर्त्तेष्येत्युक्तनिषेधेनानंतर्यविघातनांशेपरिभाषासिद्धावपितत्वनियोग्यत्वनुयोगितद्विघातकांशेऽपूर्वोभिप्राया
धर्मिग्राहकमानादेवचानंतर्यरूपएवचात्रसंनिपातः॥ अतएवद्वासिरित्यादौलोपः सिद्धः॥ प्रत्ययस्यानर्थक्यात्॥ अंगसंज्ञायांतु
यस्मादित्यनेनावधिमात्रपरामर्शोनतुप्रत्ययविधौयेनरूपेणोपादानंतेनरूपेणेति॥ प्रतिविधेयमितिसिद्धांतभाष्याभिप्रायः॥ धर्मि
ग्राहकमानादेवचत्रिपादीस्थस्यसन्निपातविघातकस्यनैषाःप्रवृत्तिःकातेनपंचानामित्यत्रनलोपः सिद्धः॥ एतेनत्रिपाद्यामपिए
षाप्रवर्त्ततेऽनित्याचैषा अनित्यत्वंचपरिगणितेष्वेवेतिनव्योक्तमपास्तं॥ जग्धसन्वृद्धुःपचानांगावाग्रमित्यादिषुपरिगणितानाति
रिक्तेषु उक्तरीत्यादोषापत्तेः॥ वृत्रघ्नइत्यत्रानयैवपरिभाषयाणत्ववारणेकुव्यवायइतिवार्त्तिकवैयर्थ्यापत्तेश्च॥ दोषाः
स्त्वत्वपिसार्वकस्येनपरिगणिताइतिपूर्वोक्तभाष्येपरिहारस्यानुक्तसाधारण्यात्तेपिपरिगणितप्रायाइतिअभिप्रायकः सपरिहारोपाय
श्चास्माभिःप्रदर्शितः॥ केचित्तुवामीति धर्मिग्राहकमानादंगाधिकारस्यैवेषेति तन्न॥ कुंभकारेभ्यइत्यत्राकजापत्तेः तुल्याविषयत्व
दावापत्तेश्च॥ तस्यज्ञापकतायादूषितत्वाच्च॥ अनिमित्तमित्यत्रानिमित्तत्वसाक्षात्परंपरयाचयथाकथंचित् अतएवऊदुपधत्वम
कित्वस्येतिवार्त्तिकंसंगच्छते॥ तत्रोदुपधत्वशब्देनतत्प्रयोजकोनलोपोलक्ष्यते॥ ऊदुपधत्वस्यविधित्वाभावात्॥ सचोदुपधत्व
संपादनद्वाराऽकित्वस्यनिमित्तमित्यर्थः॥ नन्वेवंयासेत्यत्राऽत्वमपिसुलोपनिमित्तंनस्यात् इतिचेन्न॥ संज्ञातिरिक्तशास्त्रविहितका
र्यातिरिक्तधर्मद्वारैवनिमित्तत्वेनस्पर्शाददोषः॥ अत्वंकित्वस्योपादास्तेतिवार्त्तिकोपपत्तयेसंज्ञातिरिक्तेतिदिक्॥ नाग्रहइति॥ इदमंग
संज्ञानहिइत्येकदेश्युक्तिरितिपूर्वग्रंथविरुद्धंनिष्फलंच॥ लुङ्माभूदिति॥ नन्विदंकार्यकालपक्षेवायथोद्देशपक्षेवा॥ नाद्यःएतद्

निमित्तविघातकत्वात्
दाहरणेत्यादिसमाधानासंगतेः॥ अकजनिमित्ताव्ययसंज्ञापरंपरया विवक्षितत्वात्॥ नान्यः॥ लुकं प्रति गुणादेरनिमित्तत्वादिति वे
त्वनिमित्तत्वस्य परंपरयाविवक्षितत्वेन लुकं प्रति गुणस्यानिमित्तत्वात्॥ इतोन्यत्रेति॥ इदंगवाग्रमित्यत्र सन्निपातपरिभाषाया अ
नित्यत्वाद्दीर्घ इति॥ अष्टानां पंचानामित्यत्रास्या नित्यत्वादिति च शेखरेण विरुद्धमिदं॥ कृतं कुगागमेति॥ अकारो विव॰
क्षित इति भावः॥ एतेन बिल्व एव बिल्वकः तत्र भवो बैल्वकः तस्मात्साक्रीता च्छेऽणो लुगभावाय च्छग्रहणमित्यपास्तं॥ बिल्व एव
बिल्वकः तस्मात्साक्रीता च्छे शैषिकेऽणि च्छस्य लुगभावाय मूलोकार्थस्य च्छग्रहणेऽप्यावश्यकत्वात्॥ एककालिकत्वेति॥ कालश
ब्दाहृत्त्रिगमकत्वादेकशब्दस्य कालशब्देन समासे समकालिकत्वस्साधुरिति भावः॥ न्यायसिद्धापीयमिति॥ सन्नियोगशिष्टानां सहै
व प्रवृत्तिनिवृत्तीह्यमित्यर्थः॥ अत एवागस्तीय इति सिद्धं॥ लुकि निवृत्ते आगस्त्यादेशस्यापि निवर्तनात् सन्नियोगशिष्टत्वं चैकभ
वतिक्रियान्वयित्वं॥ तत्त्वात्तु बाध्यमानस्यापि इति बहुयज्वेत्यादौ ङीपि निषिद्धेरोन॥ यत्र च शब्दो न तत्र सोऽध्याहर्तव्यः॥ अन्यतरा
पाये इति तु तन्न्यायलभ्यसमुच्चये सह प्रवृत्ते लौके दर्शनेऽपि तस्यादर्शनात्॥ इडविडोऽपत्यं स्त्री जनपदशब्दादित्यत्र तस्यातश्चेति लु
क्॥ इष्टनिर्दिष्टस्यैवातिदेशाद्गुणवचनत्वाभावेनास्मादिष्ठनोदर्शनात् न पुंवद्भाव इति कैयटाशयः॥ अपत्यमेको गुणः धनमेको
गुण इति भाष्यं त्वेकदेशस्तुतिरिति तत्पुरुषशेखरे एवोक्तमित्यन्ये॥ सिद्ध इति॥ तत्र विधिशब्दो भावसाधनोऽप्याश्रीयत इति भावः॥ प
रे तु धर्मिग्राहकमानाल्लुग्विषये वैषा परिभाषा तेन एनेय इति सिद्धं॥ अत एव नार्गीयीक इत्यत्र संप्रसारणस्य निवृत्तावपि नती
यस्य निवृत्तिः॥ एवं हि फौल्किरपि सिद्ध्यति॥ एवं स्वेय इत्यत्रेत्वस्य निवृत्तावपि नक्यपो निवृत्तिः॥ धिनोतीत्यत्र चातो निवृत्ता

वपिनो प्रत्ययनिवृत्तिः ॥ नह्यत्र भावसाधनविधिशब्दाश्रयणे न निर्वाहः ॥ पूर्वेस्यस्थितेरभावात् ॥ किंच भावे कावपि विधि
शब्दं स्मारं नार्थो न स्थितिपरः ॥ एतत्फलत्वेन भाष्ये दाहृते धिन्वंतीत्यत्रेट उत्पाद्यत्वात् ॥ आगस्तीयः वहयतीत्यादितु ठकरी।
त्यासहैव प्रवृत्तिनिवृत्त्योरंगीकारात्सिद्धं ॥ ज्ञाननिवृत्तिस्तु ज्ञापकसाध्यैव ॥ अनया ज्ञाननिवृत्तिबोधनद्वारा प्रकृतिस्थितिरेव बोध्यते
॥ तेन पचेद्रूढ्यत्त्वाकारस्यान्त्रिकमित्यत्र च रिशब्दस्य अवर्णसिध्यतीत्याहुः ॥ अत एवेति ॥ ज्ञापकसिद्धत्वाभावादेवेत्यर्थः ॥ तत्सिद्धत्वे
चलुग्विकरणस्यैवेति ज्ञापनेपि सूतिसूयत्योः पृथकूनिर्देशस्य सार्थक्यसंभवात् तथापि ज्ञाप्यतेति भावः ॥ परेतु अलुग्विकरणत्वे
नेवाश्यन्विकरणत्वेनापि साहचर्याश्रयणसंभवात्कैय्यटोक्तज्ञापकं सुस्थमेव ॥ स्वरतीति सूत्रे प्रदीपे बहुषुग्रन्थेषु सावधारणः
पाठः गातिस्थेति सूत्रेपि वनेरिति वार्तिकं तु अस्तेर्भूभावे सिचो लुगर्थं ॥ घुसाहचर्येण परिच्छेदकत्वायामप्रवृत्त्यभिप्रायकं ॥ पाग्रह
णेन पिबतेः सर्वत्रैव पाग्रहणे अलुग्विकरणस्य ग्रहणमिति नित्यन्यास्याख्यानभाष्यस्यान्वयभावः ॥ घुमास्थेत्यत्रापि पूर्वोक्तरसाह
चर्येण लुग्विकरणस्यैव ग्रहणापत्तिवारणाय लुग्विकरणपरिभाषायाः साहचर्यपरिभाषाबाधकत्वौचित्यात् ॥ घुसाहचर्ये
पि लुग्विकरणपरिभाषाप्रवर्ततएव ॥ अस्तेर्भूभावे तु तेषां धर्मिग्राहकमानेनादेशत्वानाक्रांतेस्यैव तत्परिभाषाप्रवृत्तिरिति
॥ अत एवोपात्वव्याख्या सह्निसूत्रे नयापरिभाषया वसतेरेवग्रहणं ॥ घटादौ च परिभाषाद्वयबलाद्व्ययोर्ग्रहणमित्याहुः ॥ प्र
जिघापयिषतीति ॥ जिह्वननीयिषतीत्यत्र कुत्ववारणाय आभ्यासांगनिमित्तप्रत्यययोः कुत्वविधावेकत्वविज्ञानादिति भावः ॥ संज्ञापू
र्वकेति ॥ स्वरूपं तत्परः अणुदिदिति संज्ञातिरिक्तसंज्ञेत्यर्थः ॥ असाध्वेवेति ॥ बहुशिष्टप्रयोगान्महाकविप्रयोगाच्च पृषोदरादि

त्वात्साधुत्वं बोध्यमिति तत्त्वं॥ समुदायस्यैवेति॥ इदं तु न युक्तं निर्दिश्यमानपरिभाषया समुदायस्यादेशप्राप्तेः॥ विभेदेत्यादौ नधा
त्विति निषेधस्तु नहलादिः शेष इत्यत्र प्रत्ययाक्षेपे मानाभावात्॥ विस्तरेणैतत्पूर्वं निरूपितं॥ तर्कमूलत्वमिति॥ तस्मिन्निति त्या
दिविषयेत्व श्रूयमानविशेषणे व्यवस्थापकत्वेन चारितार्थ्या यास्तद्विशेषणे न व्यवस्थापकत्वमिति तत्कौ बोधः॥ भाष्याकरीत्येति॥
तत्र हि भस्येत्याक्षिप्य यजादिभिरतो विशेषणात्वान लक्ष्योत्यत्र दोष इत्युक्तांगस्य विशेषणमित्युक्तमिति भावः॥ क्रियाजनका
श्येति॥ नहि शेषकर्त्राद्यर्थके त्यर्थः॥ तत्त्वं च कर्तृत्वादिविशिष्टस्य तत्त्वाभेदेनान्वयिनो वाच्यर्थकस्य वाचकत्वं॥ ननु नमस्त इति निर्दे
वान इत्यत्र द्वितीयाचतुर्थ्योर्भिन्नार्थत्वे संप्रधारणायोगेनैकार्थत्वाच्चतुर्थ्यपि कारकविभक्तिः स्यात् तद्दृश्यति क्रियाकारकभावे
नेति चेन्न॥ यस्मिन् शब्दे यस्याः कारकार्थत्वं तस्मिन्नेव स्वातन्त्र्येण प्रयुज्यमानेन तस्यास्तदर्थकत्वे एव कारकविभक्तित्वांगीकारात्॥
प्रथमाया अव्ययेषु कर्त्राद्यर्थकत्वाभावेपि स्वस्ति इत्यादौ तिष्ठत इत्यादियोगे तदर्थकत्वमेव॥ चतुर्थ्यास्तु हरये नमः इत्यत्र तस्मि
त्वेवं नमः शब्देन कर्त्राद्यर्थकत्वमिति न कारकविभक्तित्वं॥ ध्वनितमिति॥ ननु लक्ष्यलक्षणभावे यस्य चेति सप्तमी अधिकारयो
गे चापरेत्यर्थभेदाद्युगपत् न संप्रधारणेति कथमेतदिति चेन्न॥ कथमपि कारकविभक्ति त्वसंभवे उपपदविभक्तिर्न कर्तव्यर्थेना
दोषात्॥ अत एवोद्देश्यत्वमात्रविवक्षायां देवाय नमस्करोतीति न प्रयोगः॥ यत्किंचित्क्रियेति॥ यथा राज्ञः पुरुष इत्यत्र पुरुषस्यारा
ज्ञा स्वस्वामिभावे राजकर्मकसेवायां कर्तृक्रियाभावमूलकः अस्ति क्रियायाः कर्तृक्रियाभावस्तु न तथेति प्रथमैवेति॥ तदर्थेति॥
अत एव वी रूपधा इत्युपधाग्रहणं चरितार्थं॥ ॥ इतराव्यवधान इति॥ तेन चलीक्लृप्यत इत्यत्र द्वयोर्लत्वसिद्धिः॥ अगावयवे

ति ॥ अंगावयवश्चासौ यजादिपरश्चेति कर्मधारयः ॥ उदात्तनिर्देशादिति ॥ तत्र हि नेता सोमा माषवापेणेत्यादावेव नत्वसत्वणत्वा
दीनि स्युर्नेतुर्न मतिसिंचति माषवापाणामित्यादावित्याशंकायत्रैषा परिभाषोच्यते नेन त्रोदात्तनिर्देशः कर्तव्यः अनंत्यविकारेंत्यस
देशस्य कार्यं भवति ॥ उदात्तनिर्देशादिति च परिभाषापाठेप्युक्तं ॥ इदमुपलक्षणं ॥ एतदुत्तरमिदमपि ग्रन्थस्वारस्याय यत्रैवान्त्यसदे
शस्यानंत्यसदेशस्य चैकप्रयोगे युगपत् समवस्थितौ न तत्रैषेत्युक्तेः ॥ अन्यत्र विस्तर इति ॥ परे तु ष्यङः संप्रसारणमिति सूत्रे वार्ति-
ककृदुक्तानि प्रयोजनानि अक्लिष्टोपायैरेवान्यथा संसाधितानि भाष्यकृता प्रतिविधेयं दोषेष्विति भाष्यं त्वतिप्रसंगानां वार्तिककृदु
क्तानां सुपरिहरत्वात्तावन्मात्रेणास्याः अकर्तव्यता सिद्ध्यतीति किंतु प्रयोजनाभावेनैवेत्यभिप्रायकं ॥ अत एव न संप्रसारणे इति
सूत्रे नैतस्याः प्रयोजनानि इति फलाभावेनास्याः अकर्तव्यता भाष्यकृतोक्ता ॥ न त्वनन्तावन्मिमार्जिषतीति प्रयोजने उरदत्वं वृद्धेर्वा
नित्यत्वान्न बाधितात् वृद्धौ हृस्वे रूपसिद्धेः ॥ अत्वोत्तरमित्वे वृद्धिप्राप्तेस्तस्या नित्यत्वं ॥ न च वृद्धिं बाधित्वा हृस्वः ॥ अत एव हृस्वाप
वादत्वेन न तद्विषये तत्प्रवृत्तिपर्यंतं हृस्वाप्रवृत्तेः ॥ अभ्यासविकारेष्वबाध्यबाधकभावो नेति तु सर्वसमावेशतात्पर्यकं न न्यायप्र
वृत्तिविघटकमित्युक्तं प्राक् ॥ यद्वा प्रतिपदोक्तत्वात् वृद्धिः ॥ तदेतदभिप्रेत्यास्तु वृद्धिः ॥ अभ्यासहृस्वेन सिध्यतीत्युक्तं भाष्ये ॥ त
न्मतेऽभ्यासस्य मृजित्वाभावश्च ॥ नाप्यदस्यु यङिति प्रयोजनं ॥ तस्य साधुत्वासंप्रतिपत्तेः ॥ इति भवितव्यमित्युक्त्या तत्राप्रयुक्तत्वसू
चितमिति शेखरे त्वयाप्यसाधुत्वोक्तेश्च ॥ अत एव ष्यङ इति सूत्रे एतत्परिभाषाप्रयोजनेषु नैतत् गणितं वार्तिककृता ॥ अत
एवादसोसेरिति सूत्रे अदोत्रेत्यत्र वारणाया सेः सकारस्येति व्याख्याय यदोवममुस्युयङीति न सिध्यति ॥ अदद्र्यङिति

त्रि· प्राप्नोनीत्युक्तं भाष्ये ॥ यत्तु तदग्रे भाष्यम् अनंत्यविकारेंऽत्यसदेशस्येत्यत्र [illegible]ङितिभवितव्यमितितत्त्वेकदेशिनः ॥ एवमद
गा· सोऽद्रेरितिश्लोकवार्त्तिकपूर्वार्द्धमेवसिद्धान्तयुक्तिः ॥ एतदुत्तरं भाष्यवार्त्तिककाराभ्यांसिद्धतुसकारप्रश्लेषादित्यादिना असेरिति।
३७ प्रतिषेध एवोक्तः ॥ तस्माच्चलीक्लृप्यतइतिवदस्मुमुयङित्येवसाधु ॥ नचपूर्वार्धेनैवैकदेश्युक्तिरितिवाच्यं ॥ नैतस्याः प्रयोजना
नीत्युक्तभाष्यानुरोधात् वार्त्तिककृतामप्रयोजनेषुपरिगणनाच्चेत्यवेहि ॥ नाप्यनः [illegible]सिद्धफलं ॥ यजादिपरतयानविशे
षयिष्याम इतिभाष्येएवपरिहृतत्वात् ॥ अथांगाशेप्रत्ययस्याऽन्विताकांक्षतयासोऽर्थो[illegible]तइतिचेन्न ॥ भाष्याशयानवबोधा
त् ॥ प्रष्ठवाहविश्वौहः पथ्यदीर्घपात्तुपद्दः पश्यश्वयुनः पश्यन्मादौकृतपद भावस्य[illegible]नापूर्वपदेऽप्रवृत्तयेपरिभाषा
श्रयणोपि अयमर्थः भाधिकारेआवश्यकइतिभगवतोभिप्रायः ॥ नहीदमुक्तपरिभाषयानिर्वोढुंशक्यं ॥ चलीक्लृप्यतइ
त्यनुरोधेनांत्यवर्णतद्वर्णयोरितराव्यवधानएवैनतत् प्रवृत्तेः कल्प्यत्वात् ॥ वस्तुतोनोपधायाइत्यादौउपधाग्रहणात् ॥ अ
गाधिकारेप्रत्ययोंगस्यैवविशेषणं ॥ उक्तभाष्यंतुपरिहारांतरोपलक्षणं ॥ तथाहिस[illegible]सावेवचेतिविग्रहेतदेषइत्यत्रतद
लकारस्यसत्वमनंत्यपरिभाषयानशक्यंवारयितुं ॥ अनंत्ययोरित्युक्त्यापरत्वेनापवादत्वेनचत्यदाद्यत्वात्पूर्वंसत्ववाच्यं ॥ त
त्रचात्यवर्णतद्वर्णयोर्व्यवधानेनैतस्याः प्रवृत्तेः ॥ नाप्यल्लोपोनइत्यादाविवसाविति तदोविशेषणमितिनिर्वाहः ॥ न राम·
चासतित्येननाव्यवधानन्यायेनद्वाभ्यामेवव्यवधानेप्रवृत्त्यापत्तौस्यइत्यादौत्रिभिर्व्यवधानेतदनापत्तेः ॥ नचत्यदा ३७
द्यत्वोत्तरंपररूपेद्वाभ्यामेवव्यवधानमितिवाच्यम् ॥ एवमप्यचः परस्मिन्नितिपररूपस्यस्थानिवत्वेनत्रिभिर्व्यवधान

इदं चिंत्यं उपसर्जनत्वेन त्यदादित्वाभावेन सत्वाप्राप्तेः॥

नादत्वस्यात् ॥ तस्मात्त्यदाद्यन्तस्यांगस्य तदोरित्यर्थे न तदोरेव निर्दिश्यमानत्वेन निर्दिश्यमानस्य परिभाषया वा प्रत्यासत्त्या वा त्यदादिनदोरेव सत्वमिति न दोष इत्यवश्यं स्वैर्वाच्यं॥ तथा चैवमेवात्र तस्यांगस्येत्यर्थः न तस्य स्थानादौ न दोषः॥ किंचैतत्परिभाषादर्शनेनोपधाया इत्यत्रोपधाग्रहणवैयर्थ्यं॥ पंचानामित्याद्यवकाराकारस्य दीर्घवारणायोपधाग्रहणमिति शेखरविरोधश्च॥ किंचैतराच्यूथाने इति निवेशोप्ययुक्तः॥ हंसशिरांसितदेषैः स्त्रियुव इत्याद्यसंग्रहापत्तेः॥ अतएव वार्तिककृता विद्दु इत्येतत्परिभाषाप्रयोजनेषु परिगणितं तदनिवेशे च चलीक्लृप्यत इत्यत्राभ्यासे लत्वानापत्तिरिति सेयमुभयतः पाशारज्जुः॥ नचैतदनाश्रयणे ऽवादीदित्यत्रादोपि वृद्ध्यापत्तिः॥ एतत्प्रकरणे वृद्धिभाजस्य एव प्रत्ययेन विशेष्यंते इति त्वयैवात्रोक्तत्वात्॥ नचैतदनाश्रयणे हूस्तिष्व इत्यादौ पूर्वरेफस्यापि स्थूलदूरेत्यादिना निवृत्त्यापत्तिः॥ स्थूलदूरेति साहचर्येणान्याच् समभिव्याहृतयणादेरेव तेन लोपविधानात् यणादेः परमिति विग्रहेण यस्माद्यणादेर्गुणसंभावना तस्मादेव लोपविधानाहू इति प्राहुः॥ प्रधानस्त्रीत्वेति॥ स्त्रीत्वादेः प्राधान्यं चानवयवत्वाप्रधानविशेषणबोध्यं॥ कुमारीवाचरन् ब्राह्मणः कुमारीत्यादौ नदीत्वार्थं अवयवस्त्रीविषयत्वासिद्ध इति वार्तिकं तु यथोद्देशपक्षाभिप्रायेण प्रवृत्तमिति न तद्विरोधः॥ यत्तु यूस्त्र्याख्याविनत्यत्र शेखरे उक्तं॥ प्राधान्येन स्त्रीत्वबोधकत्वनिवेशे न मानमित्यनद्यातिकं कार्यकालपक्षेपि सुयोजमिति तदेतत् परिभाषाविरोधादयुक्तं॥ अन्यथा कुमारीशब्द इव सेनानीशब्देपि नदीत्वापत्तिः॥ नन्वेवं प्रियतिसृ इत्यत्र कथं तिस्रादेशः स्त्रीत्वस्याप्राधान्यात् इति चेन्न॥ यच्छब्दं प्रति स्त्रीत्वं विशेषणं तद्विशेष्यगतमेव तस्य प्राधान्यं न

त्रि· गा· ३८

त्वात्रास्त्येव॥पुमान्स्त्रियेत्यत्रस्त्रियेत्यनेनोपादीयमानेब्राह्मणीवत्साशब्दे विशेष्यभूतेर्थेब्राह्मणीत्यत्रङीनैद्योत्यंस्त्रीत्वंनप
वर्तनइतिनकश्चिद्दोषः। हेतुमतिचेत्यत्रेति॥ नत्रहिपाचयतोरनंदेवदत्तेनेत्यत्र गतिबुद्धीत्यस्यनियामकत्वयानकर्मत्वमि
त्युक्तं॥ एतत्परिभाषाप्रयोजनंतुमूलकेनोपदंशंभुंक्तेइत्यत्रकरणेतृतीयासिद्धिः॥नत्रहिमूलकस्यदंशनेभोजनेचशब्दएवा
न्वयः॥ननुग्रामंग्रामायवागंतुमिच्छतीत्यत्रगमेर्ग्रामः कर्मइषेस्तूभेकर्मणीइतिभाष्येणेच्छांप्रत्यपिग्रामस्यकर्मत्वात्॥प्र
धानानुरोधिकार्यस्यबलवत्त्वाच्चचतुर्थीबाधित्वाद्वितीयैवस्यात् इतिचेन्न॥ अपवादविषयेएतन्न्यायाप्रवृत्तेरदोषात्॥
तदन्तालिंगिनेति॥ इदंपंकजशब्दे योगार्थबोधनिर्वाहाय॥ननुस्वस्त्रादिषुमातृशब्दानुकरणंनयौगिकोनापिरूढइतिचेन्न
॥अर्थवत्परिभाषोक्तरीत्यागणपठितेभ्योपिअर्थविशिष्टशब्दबोधांगीकारेणतत्ररूढिजोपस्थितेः प्रतिबंधकतयायोगा
र्थस्यविशेषणतयाभानाभावेनादोषात्॥ रथ्यकाराधिकरणेति॥ नत्रहिरथकारशब्दोनयौगिकः। किंतुरूढ्याजातिवि
शेषपरइत्युक्तं॥ विशब्देनेति॥ननुहिवचनांतोविशब्दोजेरव्यवहितः पक्षिवाचीसंभवतीतिकथंतत्साहचर्यान्निर्णय
इतिचेन्न॥उपात्ताविकृत्तनविशब्दसाहचर्यस्यैवभाष्यकृदभिमतत्वात्॥ बहुविजयतेवनमित्यस्यत्वनभिधानेचाप्राधान्ये
नस्वार्थबोधकस्यैवपराशब्दसाहचर्याद्भाष्यप्रामाण्याद्वाग्रहणं। तेनेति॥ नन्वेवमपिदीधीत्यत्रद्वयोर्ग्रहणापत्तिरितिचेन्न
क्वचित्सहचरितमात्रग्रहणस्यानित्यशब्देनविवक्षितत्वात्॥ नपुंसकत्वाभावादिति॥ नपुंसकग्रहणानुवृत्तिफलंतुअन
पुंसकसंज्ञाशब्दव्युदासः॥अभिव्यक्तेति न्यायानुसरणेगौरवप्रसंगात् नपुंसकशब्दानुवृत्तिराश्रिताउत्तरार्थंच। ईश्चद्वि

चन इत्यत्र नपुंसकस्येति पुंवदिति चानुवर्त्ततेनेनक्वं इसि नपुंसकस्य पुंवद्भावान्न घोर्ग्रहणापत्तीत्यादौ नुमभावसिद्धिः। इदमुपलक्षणं
त्रिचतुरोरित्यस्य॥ सष्टं चेदमिति॥ इयं चानित्याऽनुपसर्जनादित्यधिकारात्॥ तेन वनोरचेत्यादौ नाँअनि धीवरीत्यादौ प्रवृत्तिसिद्धिः
बाध्यत इति॥ श्रुतेन निमित्तत्वेनैव लस्येरेफः। संबध्नातीति परिभाषास्वरसमन्वय इति भावः॥ वित्तर इति॥ कार्यित्वनिमित्तत्वबो
धकयोः षष्ठीपञ्चम्योः श्रुतौ चाविशेषान्नानया निर्वाहः॥ प्रातिपदिकांशे सामान्यविशेषभावस्योत्सर्गापवादभावोपपादकत्वेपि प्रकृ
तानुपयोगात्॥ लक्षणोक्तेति। लक्षणेनानुमानेनोक्त इत्यर्थः॥ प्रतिपदोक्तेत्यस्य विशेष्योक्तेत्यर्थः॥ इदमेवेति॥ विलंबितोपस्थिति
कत्वशीघ्रोपस्थितिकत्वे चेत्यर्थः॥ अनित्या चेति॥ तेन भो भगो इत्यत्र वार्त्तिकनिष्पन्नानामपि ग्रहणं॥ पित्त्वमिति॥ दोरद्द्रोरित्य
त्र धेटो निवृत्त्यर्थं क्रियमाणदाग्रहणं च धाग्रहणेऽविशेषज्ञापकं॥ नेदं दधातिनिवृत्त्यर्थं दधातेर्हि यादेशविधानात्॥ बाधिकेति॥
नत्वर्थवत् ग्रहणपरिभाषायाः तेन प्रनिदारयतीत्यत्र नणत्वं॥ भाष्यं त्विति॥ भेदकत्वाभिप्रायकं तु न वक्तुं शक्यम्॥ वृद्धिसूत्रेभा
ष्ये अभेदका गुणा इत्येव न्याय्यमित्युक्तेः॥ ईदूदेदिति सूत्रस्थस्वरांतरसंग्रहाय तपरकरणमित्यादिभाष्यं तु एकदेशीति भावः
॥ अन्यत्रेति॥ षड्जादीनां सहस्वरोदात्तानुदात्तोभयगुणकतया तद्रूपे स्वरिते उच्चारणीये उदात्तोच्चारणं विवक्षार्थं॥ न च श
स्त्राप्राप्तोदात्तोच्चारणप्रयत्नः प्रकृतेनुदात्तस्य शास्त्रप्राप्तत्वेपि स्थान्यननुगुणतया उच्चारणं यत्न एव इत्याशयात्॥ ननु स्वरि
तस्य स्थान्यननुगुणत्वेपि फिष् इति शास्त्रविरोधेन तदुच्चारणं यत्न एव स्यात्॥ अन्यथा समासस्येति शास्त्रविरोधेपि चतसर्याद्यु
दात्तोच्चारणस्य स्थान्यननुगुणतया न यत्नः स्यात् इति चेन्न॥ चतसर्येनोदात्तस्यापि स्थान्यननुगुणतया तदानेन शास्त्राप्राप्ता

न्युदात्तोच्चारणं यत्नः॥ प्रकृते तूदात्तस्य शास्त्रप्राप्तत्वेपि स्यान्यनुगुणतया तदुच्चारणं यत्न एवेत्याशयात्॥ वधादेशे स्थान्य
नुरूपे तेनोदात्ते उच्चारणीये आद्युदात्तोच्चारणं विवक्षार्थं॥ ननु हंतेरेकाच्त्वेनाद्युदात्तत्वाद्युदात्तवध्युच्चारणं तदनुरूपमे
वेति चेन्न॥ विधेरपि स्थानिवत्वेन धातुतया धातोरित्यंतोदात्तस्यैवोचिततया द्युदात्तोच्चारणस्य तदनुरूपत्वाभावात्॥ यद्वा फिषइ
त्यंतोदात्ते उच्चारयितव्ये आद्युदात्तोच्चारणविवक्षार्थं। यद्वा आर्धधातुकविवक्षायामेव वधिप्रवृत्त्या सति विशिष्टप्रत्ययस्वरेण व
धेरपि अनुदात्तत्वस्य उचिततया ऽनुदात्त उच्चारयितव्ये तदुच्चारणं विवक्षार्थमिति भावः॥ ननु आद्येपि फिषइत्यंतोदात्ते उच्चार
णीये आद्युदात्तोच्चारणं विवक्षार्थं स्यादिति चेन्न॥ उपदेशानंतरमेवेत्संज्ञालोपाभ्यामपहारेण ज्ञापकत्वेन परभाष्यप्रामाण्येन
चानङि· फिषइत्यस्याप्रवृत्तेः॥ नन्वेकश्रुत्यैवाष्टाध्यायीपाठे नतत्र तत्राद्युदात्तनिपातनं भाष्योक्तमसंगतमेवेत्याशंक्याह। संपू
र्णेति॥ परस्येति॥ ननु गुणानामभेदकतया त्रैस्वर्येण पाठेपि दोषाभावादेकश्रुत्या पाठाश्रयणं भाष्यकृत्कृतं व्यर्थमेवेति चेन्न॥
एतदनाश्रित्य परिहारांतरपरत्वेनादोषात् इदं चिंत्यं॥ परिनिष्ठिते इंद्र प्रयुक्तेनोदात्तत्वे शेषनिघाते नैश्वाकस्यानुदात्ततया प्र
क्रियायां किंस्वरकस्य इंद्र घटकतयेति चिंतायास्तत्त्वज्ञापनाभिप्रेतत्वेन त्रैस्वर्येणैव स्वाकस्य पाठात्॥ ननु जातिपक्षे यूइत्यनेन
ह्रस्वयोरपि नदीसंज्ञा स्यादिति नादिजाने स्तत्रापि सत्वादित्यत आह॥ यूइति॥ परे तु गुणाभेदकत्व प्राप्तस्याप्यप्रत्ययइत्यनेन नि राम·
षेधेप्यदादीनामइत्यादौ उच्चारित स्वरस्यैव विवक्षा पत्याद्धि शब्दे उदात्तस्यैतच्छब्दे च स्त्रं सन धर्मणो हलः स्थाने नुदात्तस्याका ३९
रस्यानापत्तिः॥ न चात्रैकश्रुत्या पाठः एवं विधेषु सर्वत्रैकश्रुत्या पाठस्य शपथैकनिर्णेयत्वात् एतत्प्राप्तस्य चाप्रत्ययइत्यनेना

निषेधेइदमित्यानुनासिकापत्तिः पररूपेण रुद्ध्या च शुद्धो भविष्यतीति चेन्न॥ आभ्यामित्यादौ पररूपेण सानुनासिकापत्तेः। किं
चाडुदात्तइत्यादौ उदात्तग्रहणं व्यर्थं अनुबंधविनिर्मुक्तपदार्थोपस्थित्याण्त्वेनाऽप्रत्ययइतिगुणाभेदकाइत्यस्यनिषेधेउच्चा
नोच्चारणे नैव निर्वाहात्॥ किंचैवं संयंतेत्यादौ सानुनासिकद्वित्वार्थमणुदित्सूत्रेण्ग्रहणमिति हयवरट्लण्सूत्रस्य भा
ष्यविरोधः॥ गुणाभेदकत्वे नैव तस्य द्वित्वसिद्धेः॥ न च यणविषये गुणानामभेदकत्वमेवेति ज्ञापनायाण्ग्रहणमिति शब्दरत्नोक्तं
युक्तं फलाभावात्॥ गुणाभेदकत्वाभावस्याप्यप्रत्ययइत्यनेनैव निषेधेन घटवानित्यादौ सानुनासिकापत्तिः। न च पथिमथ्यत्र
शेखरोक्तरीत्या अप्रत्ययार्थे निरनुनासिकत्वस्यावश्यकतया सामर्थ्याभावेनानया परिभाषया सानुनासिकाय॥ अप्रत्ययइतिनि
षेधोऽनण्यपीति युक्तं॥ तथा सति गोतइत्यादौ न परसूत्रस्येवाऽनङ्गि गुणाभेदका इत्यस्याप्रत्ययइत्यनेन निषेधेन विवक्षासिद्धा
उदात्तग्रहणवैयर्थ्यापत्तेः॥ गोतइत्यादाविव समुदायसावर्ण्यसंभवात्॥ तस्माद्गुणाभेदका इति स्वरमात्रविषयकं धर्मिग्रा
हकमानात् गुणभेकत्वं तु अनुनासिकमात्रविषयं अण्ग्रहणाद्धर्मिग्राहकमानादेव॥ यद्यपि वृद्धिसूत्रेऽस्तिप्रयोजनमे
तत् किं तर्हि भेदकत्वात् गुणस्येत्यादिपूर्वपक्षभाष्यभेदकत्वाभेदकत्वयोरपि स्वरानुनासिकोभयविषयकत्वरसतः प्रती
यते॥ तथापि उभयमिदं गुणेषूक्तं भेदका अभेदका इति किं पुनरत्र न्याय्यं॥ अभेदका गुणा इत्येव न्याय्यं कुत एतत्॥ यदय
मस्थ्नीत्यत्रोदात्तग्रहणं करोतीति सिद्धान्तभाष्यस्युक्ताभिप्रायकमेव॥ अन्यथा लण्सूत्रस्योक्तभाष्यविरोधात्॥ यद्वाभेद
का गुणा इत्यत्र अदेङ्गुणानुनासिकोभयपरं वृद्धिसूत्रस्यभाष्यस्वरसात् अभेदका गुणा इत्यत्र गुणपदं स्वरमात्रपरं

त्रि· ॥अयंपूर्वस्यापवादः॥ननुवृद्धिसूत्रेसानुनासिकसंग्रहार्थेनपरत्वावश्यकतयातद्ग्रहणेनासंदेहार्थस्तर्हिनकारइति
पा· तत्सूत्रस्यभाष्यासंगतिरितिचेन्न॥नसवृद्धिसंज्ञायांफलाभावइतिभाष्याभिप्रायात्॥आनुनासिक्यंनामगुणःतद्भिन्न
८० स्यापियथास्यादितिपूर्वभाष्यंतुफलाभावेपिगुणत्वमात्रेणतदुक्तौनेनयुक्तमित्याशयेनसानुनासिकस्याइ·ऋच्छगतौ
वृद्धसिनप्रयोगः॥अप्रत्ययइतिचनगुणाभेदकत्वमात्रस्यनिषेधोनवानणसाधारणइतिनकश्चिद्दोषः॥त्यादादितिध
र्मिग्राहकमानमप्यणिविषयकत्वएवानुकूलं॥अतएवाष्टनआइतिसूत्रेभाष्येसानुनासिकमाशंक्यानणत्वेनपरिहारउक्तः
॥ननुगुणाभेदकत्वेनतदाशंक्यप्रत्ययइत्यनेनतत्परिहारश्चोक्तः॥पथिमथीत्यस्यापितपरत्वेनैवसानुनासिकत्वमाशंकि
तं॥ननुगुणाभेदकत्वेनेतिप्राहुः॥एषोदरादीति॥एवंश्रावणीशब्दोप्यत्रबोध्यः॥लोपेनेति॥ननुवार्त्तिकासूत्रमेवसूत्रस्य
प्रवृत्त्याकथंवार्त्तिकेनसूत्रवैयर्थ्यमितिचेन्न॥वार्त्तिकस्यसूत्रैकवाक्यतयातस्यसाधुतानियामकत्वेसंभवतितद्वचनेनत
द्वैयर्थ्यकल्पनमनुचितमित्याशयात्॥समासप्रकरणेभाविवार्त्तिकाद्यर्थस्यापिसूत्रकृदभिमतत्वोक्तेश्च॥आगमेति॥तेनसर्वे
षाइत्यत्रसुडितिकृतेनपुनःसुट्॥भूयादित्यादौतुस्थानिभेदात्पुनःपुनःलोपः॥एवंचात्रलस्यपदेनसाक्षात्कार्यभागेवगृह्य
तेइतितत्त्वं॥इंद्रेचेति॥अनेनसिद्धइतिशेषः।ज्ञापकसिद्धमिति।तेनकरस्यकरभोबहिरितिसिद्धं।अपपरिइतिज्ञापक राम·
सिद्धपंचम्याअसार्वत्रिकत्वात्॥ज्ञापकेति॥अदोजग्धिरितिसूत्रेल्यप्ग्रहणज्ञापकेत्यर्थः॥एकस्याआकृतेरिति॥वेद ८०
लोकप्रसिद्धोयंन्यायः।तथाहिस्वादिरेवध्मातिपालाशेवध्मानीत्यादौविकल्पितेषुसाधनेषुयेनैवसाधनोपक्रांतानेनैवनि

र्वाह्यते॥ तत्र यदि कदाचित् खदिरस्याभ्रेषो भवति तदा तत्सदृशः कदरः सादृश्यात् खदिरबुद्ध्या प्रतिनिधीयते न तु पलाशः परिगृह्यते साधनभेदेन क्रियान्यत्वात्। उपक्रान्तक्रियानिर्वाहाप्रसंगात्। लोकेऽपि यदा स्वस्वामिभावप्रतिपादनाय गवां स्वामी निषण्णः पञ्चम्यतः तदाश्वानां चेत्तत्रापि तत्प्रतिपादनायैव निर्वाह्यते॥ अन्यथा अश्वेषु चेत्युक्तेऽधिकरणप्रतिपत्तिरपि स्यात्। अश्वेषु च तिष्ठतीति। तस्माद्यो यो यया शब्दाकृत्या प्रतिपादयितुमुपक्रान्तः तथैवासौ निर्वाह्यो न त्वन्यया शब्दाकृत्येत्यर्थः॥ एवं हि प्रतिपत्तिलाघवं भवति। निर्दिष्टं विशिष्टं हि त्वमित्यादि। हित्वमेकाज्ग्रहणेन निर्दिष्टं। यङ्लुगन्त्यर्थं पूर्वं प्रवृत्तधातुत्वेनैवेष्टसिद्धेः धातुत्वांशे नानित्यत्वोपयोगः। गुणो यङ्लुकोरिति हित्वाप्रवृत्तावभ्यासाभावात् तद्वैयर्थ्यं बोध्यं॥ अत एवेति। अनित्यत्वे नैकाज्ग्रहणनिर्दिष्टहित्वादेः कृतिपयस्य यङ्लुकि प्रवृत्तेरेवेत्यर्थः। पूर्वपक्षी यङ्लुकीट् इष्टत्वेन दोषानुपन्यस्तन् भाष्यसाधकत्वेनोपन्यस्य परोपन्यस्तं प्रमाणं दूषयति॥ यङ्लोपे इत्यादि दूति॥ तथा च नेदमत्र प्रमाणमिति भावः॥ अन्यथेति। एतत्परिभाषाङ्गीकारे। प्रकृतभाष्येति। सूयमाणादेकाच इत्यर्थेन यङ्लुकि शेषवारणपरेत्यर्थः। इत्यादिस्थेति। यङ्लुकृत्याबद्धत्यर्थं तु न तत्। न चाम्प्रवृत्त्या लिटोऽभावात्। केचित्तु बेभिदीतीत्यादौ चाकर्तीत्यादौ च श्नमशपोरभावाय पावश्यमाश्रयणीया अदादिपाठे नातोऽभूत् चाकशीतीत्यादौ शपो लुक्यपि स्वगणपाठस्याव्याहतत्वात्तया श्नमादेर्दुर्वारत्वात्॥ अजर्घाः बेभिदीतीति निर्विकरणभाष्यप्रयोगेण ध्वनितेषा॥ अत्रानुबन्धेन निर्देशः स्वरूपेण विवक्षितः। नङितङ्त्यादिरूपेण तेन नर्नृतीतीत्यत्र नाभ्यस्तस्येति निषेधः। दाधर्तीति सूत्रे नेनिक्ते इति नियमार्थमतेवानुदात्तेत्यादिलक्षणमात्मनेपदं नान्यत्र यङ्लुकीति भाष्यवचनासंगतं। अनुदात्तङित इति सूत्रे स्वरूपेणानुबन्धस्यानिर्देशेन यङ्लुकि प्रवृत्तेः। ज्ञापकं चात्र चाद्गुहादीनामिति वक्तव्ये पृथक्तेषामुपादानमित्याहुः॥ त्रीण्येवेति। अष्टकस्येत्यखंडमिति

भावः। अल्ग्रहणे मात्राग्रहणं स्पष्टमेव। एकपदघटिते मात्रालाघवविचारोस्त्येव। यथा वामीत्यत्र। एतेषट्संज्ञायां रेफं पठित्वा
षड्भ्यः ह्रस्वत्वाच्चतुर इति पठित्वा षट्चतुर्भ्यः षट्त्रिचतुर्भ्यो हलादिरित्यत्र चतुर्ग्रहणं व्यर्थमित्यपास्तं॥ पदगौरवात्॥ प्रायेणे
त्यस्य व्यावर्त्यमाह॥ अचिश्न्विति। प्रायेणेति। उक्तमिति शेषः। अत्रानुक्ताः परिभाषाः दिक्प्रदर्शनाय व्याख्यायन्ते। सतिशिष्टस्वर
बलीयस्त्वमन्यत्र विकरणेभ्यः। उदाहरणानि स्फुटानि। इयं च न्यायसिद्धा। पश्चात्प्रवर्तमानविध्येकवाक्यतापन्नानुदात्तमित्यने
न पूर्वप्रवृत्तस्वरनिवृत्तेः। अन्यत्रेति तु ज्ञापकसिद्धं। तास्यनुदात्तेदिति सूत्रे तासिग्रहणात्। तासिस्वरेण सतिशिष्टेन सार्वधातुकानु
दात्तत्वसिद्धेस्तद्वैयर्थ्यं। यत्तु प्राचीनविवरणकृता यत्र विकरणः स्वरभाक् तत्रैव नान्यत्रेति निषेधः। यत्र तु विकरणान्तं तथा नत्र
नांयं धर्मिग्राहकमानात्। तेन दीव्यत इत्यत्र श्यन्स्वर एवेत्युक्तं। तन्न। दाधाध्विति सूत्रस्य भाष्यविरोधात्। तत्र हि दैवादिको दिवादौ प
ठ्यत इत्युक्तं। खशासूत्रस्य भाष्यविरोधश्च। तत्र हि खशस्वरेण श्यन्स्वरस्य बाध उक्तः। इयं चानुदात्ते सर्वमित्यत्र कैयटे स्पष्टा। आ
गमा अनुदात्ताः। उदाहरणं लविषीयेति। अत्र हि विशेषविहितत्वात्परत्वाच्च पूर्वं सीयुटि तनो लादेशे प्रत्ययसंज्ञासन्नियोगेन वि
धीयमानमाद्युदात्तत्वं सीयुट एव स्यात् इति दृष्टं॥ आद्युदात्तश्चेत्यत्र भाष्ये स्पष्टैषा। सौवर्यः सप्तम्यः तदंतसप्तम्यः। अत्र च ज्ञापकं भीह्रीति सूत्रे
प्रत्ययात्पूर्वमिति। इयं चतुरः शसीति अत्र ऊङिदमित्यत्रैव चतुर्ग्रहणे कार्ये चतुरः शसीत्यारंभसामर्थ्यात्। एकपदस्वरे प्रत्ययलक्षणेन॥ अत्र
ज्ञापकं कनो नित्वात्सिद्धे संज्ञायामुपमानमिति सूत्रे। एकपदेत्युक्तेरध्यितिष्ठतीत्यत्र तिङ्ङतिङ इति निघातसिद्धिरित्यन्यत्र विस्तरः। ननु मतेन्य
त्र भाष्ये स्पष्टैषा। उत्तरपदत्वे चापदादिविधौ प्रत्ययलक्षणप्रतिषेधः। वाचनिकोयं तेन परमवाचा विग्रहे न कुत्वं। विवक्षातः कारकविभक्त
यो भवंति। तेनाधिकरणविवक्षायां ग्रामे गच्छतीत्यादि सिद्धानि॥ छन्दसि दृष्टानुविधिः। तेन द्यावा चिदस्मै इति सिद्धं। छंदोवत्सूत्राणि भव

ति।तेनवृद्धिरादैजित्यत्रनकुत्वम्॥सविशेषणानांवृत्तिर्न।वृत्तस्यचविशेषणयोगोन।आद्यमनित्यंसमासविषयं।द्वितीयंतुनित्यसमासविषयं॥तेनमहतःकुम्भस्येतिन।विभज्यपदानिव्याख्यायंतेक्रमेणवा॥संस्कृत्यपदान्युत्सृज्यंते॥वाक्यादेवोधृत्यपदानिसंस्क्रियंते॥तत्राप्याद्यायथालक्ष्यंअंत्यापिप्रायेणतथाअनेकपदनिमित्तकेनियमैव॥सापेक्षमसमर्थवत्॥समानाधिकरणमसमर्थवत्।एकादेशशास्त्रनिमित्तकस्यनषत्वं॥वृद्धेर्लोपोबलीयान्॥अत्रचालोपिनानेतिप्रतिषेधोज्ञापकः॥तेनपटुमाख्यत् अपपटत् इत्यत्रसन्वद्भावोन॥इयंचानित्या।हलिकल्योरदंतत्वनिपातनात्।नकर्मधारयान्मत्वर्थीयोबहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकरः।इयंचानित्याअसुष्वतइतिभाष्यप्रयोगात्॥णावचआदेशोन॥ओःपितिसूत्रेपवर्गग्रहणात्॥उपधाह्रस्वोद्वित्वात्प्रबलः॥ओणेर्ऋदित्करणात्॥कृत्तद्धितसमासेभ्यःसंबंधाभिधानं॥भावप्रत्ययेनगुणप्रधाननिरूपितशक्तिः॥प्रधानशक्तिवज्ज्ञाप्यते॥तेनपक्वौदनोभुज्यतइत्यत्रनद्वितीया।लक्ष्येलक्षणंसकृदेवप्रवर्तते॥उक्तार्थानामप्रयोगः॥तेनक्रियासमभिहारेपौनःपुन्येयङिःनित्यवीप्सयोरितिद्वित्वंन।न्यायसिद्धैषा॥अर्थस्योक्तत्वेनपुनःप्रयोगवैयर्थ्यात्॥इयंचानित्या॥तेनद्वौब्राह्मणावितिसिद्धं॥विप्रतिषेधेआभीयासिद्धत्वंन॥घुमास्थेतिसूत्रेहलग्रहणेनज्ञापितैषा॥असतिबाधकेप्रमाणानांसामान्येपक्षपातः॥शिष्यमाणंलुप्यमानार्थाभिधायि॥प्रयुक्तानामन्वाख्यानं॥यथालक्षणमप्रयुक्ते॥तेनवचनीत्यादिन।प्रयोगमूलत्वात् व्याकरणस्मृतेर्न्यायसिद्धैषा॥जहत्स्वार्थावृत्तिः।अजहत्स्वार्थावृत्तिःजहत्स्वार्थातुतत्रैवयत्ररूढिविरोधिनी॥अंत्यासर्वत्र॥इयंकेपरिभाषेंदुशेखरेणविधार्यतां॥यतस्त्रिपथगाविष्णुपदस्यकुसुमनःप्रिया॥२॥ इतिराघवेंद्राचार्यकृतापरिभाषेंदुशेखरव्याख्यात्रिपथगासमाप्ता॥शुभम्भूयात्॥संवत्१९४६चै॰शु॰३॥

॥इस्तिहार दिया जाता है ग्राहक लोगों को कि बम्बई· कलकत्ता· लखनऊ· और आगरा· दिल्ली· मेरठ· इला
हाबाद· पूना· बनारस और कई एक छापे की पुस्तकें हमारे इहां मौजूद हैं जिन महाशयों को लेना होय तो
आध आने का टिकट भेज के संस्कृत और भाषा सूचीपत्र मंगाय लेवें उसमें सब पुस्तकों का नाम औ
दर लिखा है॥ इस कार्य के संपादक बाबू कवलेश्वर सिंह बुक्सेलर बनारस छोटकी पियरी॥०॥

श्रीकाशीजीमेंमहल्लाआदिविश्वेश्वरपरपंडितदुर्गाप्रसादजीकटारेपरलोकस्थकेपुत्रपंडितकामता
प्रसादजीकटारेकेगणेशयन्त्रालयमेंशांकरीटीकाछापीगई·लिखामहावीरमिश्रछापनेवालाव
तुजिसलेनाहोयउसेचांदनीचौकमेंपंडितकामताप्रसादजीकटारेकेदुकानपरमिलैगी॥९॥

शांकरी ॥श्रीगणेशाय नमः॥ आहुरिति। यद्यपि परिभाषादेशे विधिसूत्राणामुपस्थितौ गुणभेदकल्पनेन पदैकवाक्यताना
१ न्यथा द्वितीयपञ्चमीत्यादौ तद्विधीनां व्यवहिताव्यवहितसाधारण्येन प्रवृत्तौ पश्चात्परिभाषैकवाक्यतायामपि जातनिवृ
त्त्ययोगात्। भुक्तवंतं प्रतीति न्यायविरोधापत्तेश्च प्राचीनोक्तवाक्यैकवाक्यता कर्तुमशक्या। संज्ञाशास्त्राणां तु मृजेर्वृ
द्धिरित्यादौ वृद्धिपदश्रुत्योपस्थितवृद्धिरादैजित्यस्य तदर्थज्ञानाय वृद्धिपदाभिन्ना आदैच इति बोधे मृजेरिकस्थाने वृद्धि
पदाभिन्ना आदैचो भवंतीत्येतावतैव वाक्यैकवाक्यताव्यवहार इति नोक्तदोषस्तत्रैव वृद्धिपदानर्थक्यं तु नोपस्था।
पकतया चारितार्थ्यान्नथापि उक्तषष्ठी स्थानइति सूत्रभाष्यं तु प्राचीनैर्लोपयितुं शक्यं न यद्धि कार्यकालपक्षे प्रदे
शैकवाक्यतया स्वबुद्धिजननवशाद्ययोदृशोऽपि स्वदेशे वाक्यार्थस्य सत्त्वेन तत्तदर्थोपस्थित्यैव सर्वं प्रकाशकत्व
स्य संज्ञाशास्त्रवत्सत्त्वात्। किं च भाष्येणैकादेशस्य स्थत्वमनुपपन्नं। यथा व्यवहर्तॄणां तत्तद्देशगमनेन तत्तद्देशीयत्व॥
व्यवहाराभावेऽपि तस्य भावार्थकमन्ययातत्त्वात् न तद्देशस्थत्वव्यवहारस्य दुर्वारत्वेन तच्च चतद्दत्यक्तेनेऽपि सत्त्वाद्देवं
च दृष्टांतदार्ष्टांतिकयोर्वैषम्यं स्पष्टमेव परं च परिभाषाणामुभयपक्षेऽपि पदैकवाक्यता लाघवादादर्तव्या संज्ञा राम.
शास्त्राणां तु यद्यपि अदसो मादिति सूत्रभाष्यप्रामाण्यात्कार्यकालपक्षे प्रदेश एव वाक्यार्थबोधस्तत्रापि पर॥ १

त्वेनपूर्वत्वेनचविप्रतिषेधप्रवृत्तिः। पूर्वत्रासिद्धमित्यस्यचप्रवृत्तिरितिलभ्यते। तथाहिसुत्वासिद्धत्वात्प्रकृतिभा
वेनप्राप्नोतीत्याशंक्य सामर्थ्यात्तद्भाववद्वसुन्काभरणोप्रगृह्यसंज्ञेनत्वप्रतिबंधेनकार्यकालपक्षेसार्थक्यमि
तिसंखंड्य एवंनहियद्येतावत्प्रयोजनंस्यात्तत्रैवापब्रूयाद्रणोप्रगृह्यस्यादसोमेस्सुक्तमग्रेपिसुत्वाद्यसिद्धत्वाद।
यादीनांप्राप्तिप्रसङ्गात्व्यपरैवप्रगृह्यसंज्ञेतिसमाहितंतथापिनतद्युक्तिमत्। तस्मिन्नितिसूत्रस्थन्यायसिद्धभाष्य
स्वारस्येनतत्रतत्रापिपाठकृतपरत्वस्यैवतत्रापिलाभात्। पदपदार्थोपस्थितौवाक्यार्थबोधेप्रतिबंधकाभावाच्च
संज्ञापरिभाषयोरैकरूप्यलाभेवैरूप्यकल्पनस्यायुक्तत्वाच्चविरोधस्यकार्यज्ञानाधीनत्वेनसार्वधातुका
र्धधातुकयोरित्यत्रगुणपदश्रुत्युपस्थाप्यालिंगस्यदुर्बलत्वेननतन्निमित्तेषाइक्परिभाषापदैकवाक्यतयान्व
यवत्त्वंतरंगस्यानषष्ठीत्वनिर्णयोपस्थितालोंत्यपरिभाषावाक्यैकवाक्यतयान्वयइतियदिहिरंगासेतित्वदीय।
शब्दरत्नासंगतेश्च। अंतरंगपरिभाषाया अपिविरोधेसत्येवप्रवृत्त्यातज्ज्ञानस्यतद्बोधोत्तरकालिकत्वेननत
दानींविरोधाभावेननतदसंगतिः। अदसोमादित्यत्रभाष्ये ——— पूर्वत्वस्यतत्प्रयुक्तप्रकृतिभाववद्दन्येवार्थ आ
श्रयानभिन्नस्याग्रेप्रश्नः। कथंकार्यकालमित्यादीन्येकदेश्युत्तरमेवंचननतद्विरोधः। तत्रापिस्वगृ॥ ९ ॥

शांकरी। हेवाक्यार्थबोधः पूर्ववत्। अतएव भाष्ये संज्ञापरिभाषयोरविशेषेणैकदेशस्थत्वमुक्तं। कश्चित्परिभाषारू
२ पइति कैयटोक्तं न युक्तं। परार्थत्वेन परिभाषाणामिव संज्ञानामपि तुल्यत्वात्। अतएव सर्वशास्त्राणां प्रयोगा
र्थत्वेन प्रयोगरूपैकदेशस्थत्वेपि परत्वादिकं संगच्छते क्ङिति चेति सूत्रस्थकैयटोक्तरीत्या विधिसूत्राणां प
रिभाषादेशे सन्निधानेपि परत्वादिकं संगच्छते। एवं चाकडारसूत्रस्थभपदादिसंज्ञा स्वस्वेच्छाव्यवहारएव। अ
तएव ष्यङः इति सूत्रस्थभाष्यसंगतिः। अंशांतराप्रामाण्येनतत्सैकदेशयुक्तित्वेपि सर्वांशस्यैकदेशयुक्तित्वेप्र
माणाभावात्। अतएवोद्योतपरिभाषेंदुशेखरादि— भिर्नविरोधः। अन्यथा वाह ऊठ् सूत्रस्थशेखरस्य अ
दसोमादित्यत्रोद्योतस्यैकदेशविकृतमनन्यवदितिव्याख्यानस्य परिभाषेंदुशेखरस्य चासंगतिः सोढव्या
स्यात्। अत्रत्यग्रंथस्य सर्वस्य सिद्धांतित्वेपि अंशांतरस्यासिद्धांतत्वमिति सूचयितुं केचिदित्याहुरित्युक्तं। ए
वं च संज्ञापरिभाषाणामैकरूप्यमेव फलितं। एतावानेव विशेषः॥ ष्यङः सूत्रभाष्यादौ दृष्टसूत्रभाष्याद्युक्तसं
ज्ञाशास्त्राणां वाक्यैकवाक्यता। परिभाषाणां तु लाघवात्पदैकवाक्यतेति एतदेव ध्वनयितुमाह। राम
अंलमिति। अनुबंधपदार्थमाह। इत्संज्ञका इति अनेन पूर्वसंगतिः सूचिता। अन्य। १। ९। २

थाविक्रियमाणपदस्यभावित्वेनपूर्वंनहिवर्णसंगतिः।इत्संज्ञाप्रयुक्तलोपाद्यभावाभावकार्यभाजइतितुपर
मार्थस्तेनोच्चारणार्थेषुनातिप्रसंगः विधेयैकदाप्यदर्शनादिति।ननूपस्थाप्येऽनवयवत्वंसाध्यतेउतउप
स्थापके नाद्यः।हलन्त्यमित्यत्रलक्षणाया।निर्बीजत्वापत्तेः। नांत्योपि। विधेयैकदाप्यदर्शनादितिहेतोरसं
गत्यापत्तेः।नहिशरीरावयवस्यहस्तादेर्वृक्षादावदर्शनेनानवयवत्वंशक्यतेवक्तुमितिचेन्न।प्रायोभ्यामा
दौउपस्थापकेदृष्टस्यावयवस्योपस्थाप्येपिदर्शनवत्प्रकृतेतदभावेनतस्योपस्थापकानवयवत्वमित्याशया
त्।यद्यपित्रयाणांवचनरूपाणामकरणेनानवयवत्वमेवयुक्तं लाघवात्तथापिनहिवर्णाभिव्यक्तिजनक
कंठाद्यभिघातगौरवमेवादर्तव्यमितिन्यायेनतत्रतत्त्वारोपरूपस्यज्ञानजनकमनोव्यापारगौरवस्यापि
सत्वेनन्यायसिद्धावयवत्वस्यैवन्याय्यत्वादत्रचनत्रयावश्यकत्वस्यभाष्य नोलाभाच्चातआह। वस्त्विति।
नन्वेतन्मतेऽनुबंधानामेकान्तत्वेपचतिभवतीत्यादौनास्यनुदात्तेदितिस्वरानापत्तिः।अकारान्तोपदिश्यमा
नत्वाभावात्भाष्येस्वरविधौतथैवसिद्धांतितत्वात्।अतएवहंतीह यद्ध्यादौनानुदात्तत्वंसुद्धाकारेत
ल्वपदेशिवद्भावोबोध्यइतिचेन्नतानुबंधकत्वमनेजंतत्वमितिपरिभाषायामनेजंतपदस्यानकारान्त।।

शांकरी। ३ त्वस्याप्युपलक्षणत्वात।अन्यथानेकमुदाहरणमितिन्यायेनतास्यनुदात्तेत्त्विच्चादित्येववदेतिभावः शिद्ग्रहणं
व्यर्थमिति। नन्वित्संज्ञालोपयोरंतरंगत्वेनात्र पक्षेप्यनुबंधविनिर्मुक्तपदार्थोपस्थितेः शेशादौ नानेकाल्त्व
मितिचेन्न। सूत्रोपात्तस्यैवस्थानित्वमिवादेशत्वमपितस्यैवांगीकारादित्याशयात्।शिद्ग्रहणेनानुबन्धानाम
लत्वमब्यव हाराभावो ज्ञाप्यते नेतेनेयं फलितेतिस्थानिवत्सूत्रेशेखरे। अतएवमदीव्यत्यादौ स्थानिवत्त्वात्कित्वा
त्कित्वातिदेशेनगुणाभावः एतेनापूर्वोचेयमित्यपास्तं। यदितुनत्स्यपीतिविशेषापेक्षज्ञापकमेमित्यप्रदीव्ये
त्यादिसिद्धिः। सूत्रोपात्तस्यान्यादेशत्वमपिफलाभावान्नांगीक्रियते।औणादावपिभूतपूर्वानेकाल्त्वादेव
सिद्धिः।शिशोडा पालादेरपि आनुपूर्व्या नसिद्धिः अवणस्तृहृत्यादौनूगित्कार्यार्थतया नानेकाल्त्वाभावादिवव
उदित्यत्रनूच्चारणार्थत्वेननदोषोऽन्यथासामर्थ्यात्प्रत्ययत्वेपिनित्स्वरःस्यादितिध्वनितंचेदमनेकाल्सूत्रेभाष्ये
।स्पष्टश्चायमर्थस्तत्रैवकौस्तुभेइत्युच्यते।तदेकांतत्ववादिनापिनांगीकर्तव्यमेषाशिद्ग्रहणंचनकर्तव्यं। ए
वंचानेकाल्त्वात्सर्वादेशःस्यादेवेतिप्रक्रियाग्रंथः परिभाषेन्दुशेखरस्थःस्वरसतउपपद्यतेलुवः प्रथमस्येति राम।
सूत्रभाष्यंतत्सूत्ररीत्यैवनिबोध्यं।किंचार्वणस्त्रिन्नादौङकारानुबंधकरणेपिनिर्वाहोऽनङ्वत।एतेनदिव ३

उदित्यत्र तकार उदित्यत्र च तकारोच्चारणस्य भाव्यमानोऽप्युकारः सवर्णान्न गृह्णातीत्यर्थज्ञापनतया आवश्यकत्वेन त
कारादुत्तरत्र ङकारकरणेन तस्येत्संज्ञालोपो न स्यादित्यपास्तं। नैकमुदाहरणमिति न्यायेन तत्प्रयोजनस्यैवा
भावात्। अदसोऽसेरित्यत्र उदूतिति समाहारेण निर्देशाच्च। असंदेहाय तत्रैव ऊकालइ इति वदूदिति निर्देशेन स
वैरूप्यसिद्धेश्च परिभाषास्वीकारे समनाशंसा इत्यादौ अतिप्रसंगाद्दुपधायोगो ह इति सूत्रभाष्याच्चेत्यन्यत्र वि
स्तरः। अवदातं मुखमिति। आत्वे कृते पलोपेन त्वानुमानिकस्यान्यादेशभावेन दापइत्यस्य दाइत्यादेशे स्थानि
वत्त्वेन दाप्त्वं सुलभं पूर्वं पकारलोपे तु दैप इत्यस्य निवृत्तादाइत्यस्यस्यात्वेऽपि तत्रदाप्त्वाभावादिति भावस्तदेवोप
पादयति। पलोपात्तरमात्वे कृते इति न च पलोपात्तरमुपदेशत्वाभावात्कथमात्वमिति वाच्यं दोदद्घोरित्यत्र दइत्युपा
दानेनानुबंधलोपात्तरमप्युपदेशत्वकल्पनात्। उदीचां माङ इति। माङ्मानेइति तत्रेह ग्रहणे ज्ञापकपरभाष्यप्रामा
ण्यादपूर्वकालार्थकत्वाप्रत्ययस्ततो नानभिधा—नात्। भाष्ये तु उपायांतरप्रदर्शनेनास्यानावश्यकत्वं सूचितं। त
थाहि। नायं —दैप किंतु दिवादिषु दापशोधने पठ्यते। दायतीत्यत्र स्वरे भेदस्तु नोभयथाप्यंतोदात्तत्वात्। नाच्छी
लिके चानशि दायमान इत्यत्रापि न स्वरभेदः श्यन्स्वरस्याद्युदात्तस्य सतिशिष्टत्वेऽन्यत्र विकरणेभ्य इत्युक्तेर्नवल
वत्वम् उभयथाप्यंतोदात्तस्यैव सत्त्वात्। प्रणिदापयतीत्यत्रादाविति प्रतिषेधाभावात्।

यापिदितिन्यासोपिदर्शितो दाधाघ्वेतिसूत्रभाष्येउदीचांमाङः इत्यत्रतु कृतानुबंधलोपस्यमेङः आत्वेस्योपलक्षितो
च्चारणार्थोङकार इतितदाशयः। इहानिदध्यात्योरिति। वासरूपसूत्रभाष्येतुउपायांतरमुदर्शनमपि। तत्रहि सूत्रे
ऽसारूप्यमौपदेशिकंप्रायोगिकंचेतिप्रश्ने औपदेशिकग्रहणेसरूपमन्ययवाध्यवाधभावेफलाभावेनासारू
प्यएवतत्सत्वेनासरूपग्रहणानर्थक्यात् प्रायोगिकमिहगृह्यते। नचप्रायोगिकग्रहणेग्रामणीः ग्रामणयेइ
त्यत्रक्विपोऽदर्शनरूपत्वेनसरूपस्यैवाभावेनक्विवर्णोनस्यानामितिवाच्यं। असरूपइत्यस्यसरूपाभावइ
त्यर्थेनादोषादित्युक्तमेवंचनात्रपक्षेवृचनकर्तव्यताया आवश्यकत्वमस्ति। एतेननानुबंधकृतमसा
रूप्यमितितुकर्तव्यमेव। कारणोर्वाक्यार्थबोधोत्तरमन्वयज्ञानंतदुत्तरमितिसंज्ञेतिबोध्यमित्यपास्तमितिमा
त्सर्यमुत्सार्यविचार्यमार्यैरितिदिक्। नन्वध्येताशयितेति। क्ङितिचेत्यत्रक्ङितीतिनिमित्तसप्तमीतिभावः। नचनि
मित्तग्रहणंकर्तव्यमितिवार्त्तिकात्। भाष्यकृताक्तोः किंत्वेतत्संसाध्यवार्तिकप्रत्याख्यानाच्च। अतएवभिन्न
मित्याद्दौनगुणः तद्भावभावितामात्रेणेहनिमित्तत्वं। अतएवचक्रतुरित्यादिसिद्धिः। द्वित्वेतुसोनिमित्तत्वेऽ
नाचोपितत्सत्वात्। यद्यपिशायितेत्यत्र इकारस्यकार्यित्वेपिनशीङ इतिगुणनिषेधोदुर्वारः। ।

लयाप्यर्यवत्येव स्थान्यादेशभाव इति सिद्धान्तात्समुदाये कार्यित्वलाभात्। अरिरिषतीत्यत्रैवावयवद्वारा समुदा-
येन तत्सत्वाच्च। ऊर्णुनविषतीत्यत्र तु सन्नन्तस्योद्देश्यत्वेपि तत्रैवात्रापि समुदायद्वाराऽवयवस्य प्राप्तकार्यित्वव-
रणाय कार्यमनुभवान्निति। द्वित्वविधौ हि सन्यङोरिति षष्ठी न तु सप्तमी। अन्यथा प्रतीषिषतीत्यत्र सनो द्वित्वं
न स्यादिति बोध्यं। यदि तु क्ङितीत्यधिकरणसप्तमी कारकविभक्तेर्बलवत्त्वात्। क्नोः किंत्वे नैकवर्णव्यवधानं
सह्यामतिभिन्नमित्यादौ न दोषः।। द्विर्वचनेचीत्यत्रापि द्विरुच्यतेऽस्मिन्निति व्युत्पत्त्यारिरिषतीत्यत्र न दोषस्त-
त्र हि नकारे परे द्विरुच्यते किं तु नस्यैव ऊर्णुनविषतीत्यत्र तु इकारे परे द्वित्वमुच्यते इति भवत्येव स्थानिवत्त्वमित्यु-
च्यते न तदेषा निष्फला। यद्यपि तदतिरिक्तफलं नेतीति परैर्वस्तुत इति। नन्ववयवावयविनोः संबंधस्य समवायत्व-
मित्यनुभवात् लोके निमित्तकारणस्य दंडस्य समवायिकारणमृत्तिकायाश्च भेद इति शक्यते वक्तुं। शास्त्रे त-
था प्रयोजनाभावः। वर्णानां प्रसज्यप्रसंज कभावसंबंधसत्त्वेपि अवयवावयवित्वस्यालाभात्। नच
शपि तेत्यत्र शीङेन तत्समवेतगुणरूपकार्यसंपन्ने निमित्तकारणस्य ङित्वस्य शेदित्यत्र सत्त्वे न तत्संभवद-
निवार्यं। एवमप्यध्येतेत्यादौ तदसंभवादिति चेन्न। शपि तरीति ज्ञापकमात्रसाध्यत्वे। ९ ।

शे. क. नादेशात्। प्रकृतग्रंथस्तु प्राचामनुसारीति केचित्। ध्वनितं चैतत्। यद्यपि भाष्ये एतत्परिभाषाभावस्यैव ध्वननं। न
९५ ह्यत्र जेघ्रीयते देध्मीयते इत्यनेन दृग्ग्रहणाद्यावर्त्यौ। तत्र च कार्यातिदेशेन द्वानर्थक्याद्रूपातिदेशे ई घ्राध्मोरिती
त्वस्य निवृत्त्याऽनिष्टापत्तिरित्युक्तं। तत्र च नत्र भार्यावद्व्यंजनानि भवंतीति नैतद्भाष्यसिद्धं नाद्वितीयाजवधिक
स्याद्वित्वे यङो निमित्तत्वा नापत्त्या दोषाभा वेन भाष्यासंगतिस्तथापि स्वरांतरे व्यंजनान्युत्तरस्येति प्राप्ति शास्त्र
मनुसृत्योक्तं। अत्र पक्षे अरिरिषतीत्यत्र रिशब्दस्य द्वित्वे पीकारस्य सनवयवत्वाद्द्वित्वानुभवेन तन्निमित्तत्वा
भावान्न दोष इति बोध्यं। एतेन कृतेप्यनुग्रहणे ऽरिरिषतीत्यादौ गुणस्य स्थानिवत्त्वेन इस्शब्दस्य द्वित्ववारणे नै
षा ध्वनितेत्यपास्तं। सत्यसति च तस्मिंस्तत्र दोषस्य दुर्वारतया तस्याप्यनुग्रहणाद्यावर्त्याभावादनुग्रहणस्या
किंव्यावर्त्यमिति प्रश्ने अरिरिषतीत्युत्तरस्यासंगतत्वाच्च। इत्थं ग्रंथकृदाकूतं। भाष्ये कार्यातिदेशे चक्रतुरित्या
दौ अनकाराभ्यासतां प्राप्नोतीत्याशंक्यानुग्रहणेन रूपातिदेशज्ञापिते उक्तदोषवारणं कृतं। अग्रे अधिजगे
इत्यत्र इवर्णाभ्यासतां प्राप्नोतीति निरूपातिदेशे दूषणमभिधाय गाङ् लिटीति द्विलकारकोनिर्देशः। लिटि राम.
लकारादावित्युक्तं। एवं चानुग्रहणस्यैतदेव व्यावर्त्यमित्याशयः। एवं चाधिजगे इतिवदरिरिषतीत्या ५

त्रतो धातुपन्यासेन भगवता साध्वनितैवेति सुधियो विभावयंतु। आर्धधातुकीयाः सामान्येन भवंतीति पक्षेनज्ञा
वभाविता मात्रेणैव न ह्रुद्धि भाविता मात्रेणापि निमित्तत्वमन्यगीकारात्। अधिजगे इत्यस्य तद्भावनर्थं बाध्यं। ई
दृशनिमितत्वाश्रयणे लिंगत्व जग्रहणमेवेत्यन्यत्र विस्तरः। ननु पूर्वं धातुरुपसर्गेण युज्यते पश्चात्साधनेनेति
सिद्धांतात्प्रयोगोद्देशे दाशब्दे प्रवृत्ताया घुसंज्ञाया अवारणाण्णत्वमुपलभ्ये न च कार्यकालपक्षे दोष एव न तथा हि अ
त्रपक्षे अदसो मादिति सूत्रभाष्यप्रामाण्येन संज्ञाशास्त्रस्य स्वदेशवाक्यार्थाभावेन घुसंज्ञायाणत्वशास्त्रैक
वाक्यत्वेन त्रिपादीस्थनत्वासिद्धत्वात्साधनकार्ये कृते तदा रूपाभावादिति वाच्यं। अदसो मादित्यत्रोक्तरीत्या परि
भाषावत्संज्ञाशास्त्रस्यापि स्वदेशवाक्यार्थस्य सत्वेनाष्टाध्यायीपाठकृतपरत्वाद्याश्रयणेन चांतरंगत्वाद्घुसंज्ञा।
यां कृतायां साधनकार्ये कृतेपि अत्र पक्षे णत्वं दुर्वारमिति चेन्न। पूर्वं धातुरुपसर्गेणोपसर्गार्थेन युज्यते ततः।
साधनेन कारकेण कार्येण क्रियायाः साध्यत्वेन साधनाकांक्षत्वादित्यर्थस्य ग्रंथकृदभिलषितत्वेन पूर्वं साधन
कार्ये कृते दापद्यस्य दारूपत्वाभावादवयवस्यानर्थकत्वेन च णत्वविधौ यत्क्रियायुक्ताः प्रादयस्तं प्रत्येव गत्युप
सर्गत्वमित्यर्थस्य सत्वेन दानिरूपितोपसर्गत्वाभावेन च त्वदुक्तशंकाया गरुत्मन पक्षपातचूर्णितत्वात्। ६ ॥

शं.कौ. न चैवमपि कार्यकालपक्षे पोक्तो दोषो नरीत्यां न रंगणयां घुसंज्ञायां कर्तव्यायां बहिरंगस्य घुको सिद्धत्वाद्भीरत्यादौ तु
६ नेक्तिनेऽनुनासिकप्रतिबंधकमगृहीत्वा बद्धाप शब्दे दावुध्याप्रवृत्तया घुसंज्ञयाणत्वस्यु लभमेवेति वाच्यं। घ्यङ् इति
सूत्रभाष्यप्रामाण्येन संज्ञायां वाक्यैकवाक्यत्वलाभेपि शतानीत्यत्रत्यशब्दरत्नोक्तरीत्या षट्संज्ञासूत्रस्य शेखरो
क्तरीत्या कृन्मेजंत इति सूत्रस्थशेखरोक्तरीत्या च विधिनिमित्तनिमित्तकत्वस्य संज्ञाशास्त्रस्य लाभेन तु पसर्गनिमि
त्तकत्वेन घुसंज्ञायामपि बहिरंगत्वस्य तु सत्त्वात्। अप्रधानेन प्रधाननिमित्तकत्वस्य लोकसिद्धत्वेपि प्रधानस्य न
न्निमित्तकत्वे मानाभावेन परस्य बहिरंगत्वखंडकग्रंथेन न विरोधः। असिद्धपरिभाषाज्ञापनपरभाष्यादिना
यथा नविरोधस्तथानंत्रेव स्फुटीकरिष्यति। एवं च प्रकृते सर्वथा न तदसिद्धिरेवात आह। नतु प्रणिदापयतीति।
अत्वादाविति निप्रतिषेधस्तु ननेनहि वान्तस्य प्रतिषेधेपि पांतस्याप्रतिषेधात्। सूत्रे अदाविति चर्त्वेन निर्देशादिति
दाधाघ्विति सूत्रे भाष्ये स्पष्टं। लोकन्यस्तदर्थालाभेपि तदनित्यत्वेनैव तद्बाभात् आह। यत्तुद्देश्येति॥ अ
न्यथा रेफस्योरण्णेति शास्त्रेणाकारावयवत्वबोधनेनावयवावयवस्य समुदायावयवत्वस्य लोकसिद्धत्वे न दा राम.
वयवत्वस्य रेफे सत्त्वेन प्रनिदापयतीत्यादौ दोषः स्यादिति भावः। न चायं न्यायः। शास्त्रे। ॥ ॥ ६

नाश्रियत इति वाच्यं। हलंनान्नदादेः परस्यापृक्तस्य हल्लोलोप इत्यर्थकहल्ङ्यादिसूत्रस्य सोमसुन इत्यादौ अ
निष्टापत्तेः। कीर्गीरित्यादौ रेफस्यापदांतत्वेन विसर्गानापत्तेश्च सज्जु भूरित्यत्र नकारस्यानुक्यपदांतत्वान्नश
श्छोटीत्यनापत्तेश्च। अत एव दीधीवेवीटामिति सूत्रे इदूद्ग्रहणं चरितार्थं। अन्यथा इकारस्य शास्त्रेण प्रत्ययाव
यवत्वबोधनेपि अङ्गावयवत्वाबोधनेन गुणाप्रवृत्तौ तद्वैयर्थ्यं स्पष्टमेव। एतेन पठितेत्यादौ एवं सति ड्डी वाप
निरित्यपास्तं। अनुबंधविनिर्मुक्तपदार्थोपस्थितिरिति सिद्धांतादेकांतत्वपक्षेप्युपदेश एवेत्संज्ञालोपाभ्याम
पहारादृकारस्य कस्याप्यवयवत्वाभावेन दित्सद्वाच्यत्वाभावात्। यत्रेत्संज्ञानुबंधानां तत्र प्रयोजनाभावा
त्सामर्थ्यादुपस्थाप्येत न्कायोनुमानेपि अन्यत्रापि तदनुमाने मानाभावाच्च। भवितेत्यादौ त्विकारस्य प्रत्यया
वयवत्वेबोधिते न्यायेन समुदायावयवत्वं सुलभमिति बोध्यं। यदुपदेशप्रयुक्तेत्संज्ञासंख्यवह्निपन इत्यादिना स्त्री
लिंगप्रकरणे शब्दरत्ने स्पष्टं। एतेन लघुलुलोष्ट्रित्करणेन क्वचित् तदनाश्रयणमिति वदंतोपि परास्ता इत्यलं। सु
ग्विधानसामर्थ्यादिति। ननु सवर्णदीर्घं बाधित्वाऽ तोङि तद् इति स्यात्। सुग्विधानेन तत्र कौंडिन्यन्यायेन सो
पि बाध्यते। न च कृतेपि सुकि अनयासदुर्वारएवेति वाच्यं। सर्वथा निरवकाशत्वेन बाधेरभायामिति स्या। ६

पां॰ क॰
७

दीप्रुनरुत्सर्गप्रवृत्तावपितक्रकौण्डिन्यन्यायेनबाधेतदप्रवृत्तेरंगीकारात्।अस्तिचप्रकृतेन्यायविषयतायाद्यादेशे
कृतेपिआनुमानिकस्थान्यादेशेनस्थानिवत्त्वेनसुकप्रवृत्तेः सत्वात्।सवर्णदीर्घेतुनैवंतद्धुतरंसुकोचारितार्थ्या
त्।यत्तुसुकिकृतेनेयादेशोनइतितपरकरणादितितन्नपचमानइत्यत्रानुपदेशप्रयुक्तस्वरसाधकपरभा
ष्यप्रामाण्येनयद्यागमलब्धस्यतपरत्वेनव्यावृत्तेः।अविशेषाद्विशिष्टत्वातिदेशवन्मात्रिकस्याप्यतिदेशाच्चे
निचेन्नतावन्मात्रस्यप्रयोजनत्वे आनोडि· तद्व्येनंतरंनानस्येत्येववदेत्।अर्धमात्रालाघवस्यउत्तरत्रैइ
दासइत्याद्यौव्यन्यथकल्पनानावश्यकत्वस्यचसत्वात्। नन्वेवमपि सुग्विधानंसफलंपचम् आमइ
त्यवस्थायांसानुनासिकाननिरनुनासिकयोः स्थानेजायमानस्याकारस्यान्तरतम्यादुभयगुणकस्ययुगपत्त्वे
भवाभावेपिपूर्वपरयोः प्रत्येकंस्थानितयापर्यायेणास्यात्।अन्यथातुस्थानिगुणकनिरनुनासिकएवस्यात
।नचामइत्यत्रात्क्वातिदेशवत् कंठ्यत्वादिशस्यसत्वेपि ओदौतोः कंठ्यत्वओष्ठ्यत्वयोरेकत्रदर्शनेना।
निर्दिश्यमानधर्मविरुद्धधर्मत्वाभावेनमकारस्याश्रयस्यौष्ठ्यत्वस्यापिसत्वेनोभयांतरतम्याद्गुणापवा
देनसवर्णदीर्घेणोभयगुणकयारोकारौकारयोरेवप्राप्त्यापचौ नः पचौनः पचौ।

राम॰
७

नः प्रचीन इति रूपस्य सत्वान्नाकारः प्राप्न इति वाच्यं। न ह्यविन्त्युपलक्षणामेव चः सर्वस्यानुनासिकस्यादर्शनादि
तिशेष्वरोकरीत्या ऽनुनासिकत्वाभावात्। भंजो आमर्दने इत्यादौ तथादर्शनेपि स्वराणामूष्मणां चैव विवृतं क
रणां स्मृतं इति शिक्षोक्तरीत्याकारस्य विवृततमत्वप्रतीत्यात स्य च विवृतेनाकारेण साम्याभावेपि ईशन्सदृशस्य
विवृततरौकारस्य मा प्रावपिनेतावता सुगविधानसाफल्यं केनचिदपगतमिति चेन्न। विधानस्यैतावत्प्रयोज
नत्वे मात्रालाघवेन प्रक्रियालाघवेन च आनस्योः इति न्यासमेव पाणिनिः कुतो नाशिश्रियत्। एवं चादेपेर
स्यत्वदे ॥ नेनाकारस्य सानुनासिके उकारे कृते आद्गुण इत्यनेन सानुनासिकान्तरतम्यात्सानुनासिको गुणः
। निरनुनासिकान्तरतम्यात्त्वाहृशएवेति पचोनः पांचोन इति त्वदृभीष्टं सिद्धमेवेति किमियता प्रयासेनेति रह
स्यविचार्यतां। एतेन एच इगिति सूत्रभाष्ये प्रदर्शितन्भूयसा व्यपदेशेन प्रकृते कंठ्यस्थानिनोबाहुल्येन सव
र्णआकार एव भविष्यति नौकारादय इत्यपास्तं। एचोतरतमह्रस्वाभावेनावयवान्तरतमेनेतत्व्यवस्था
पनेनियमप्रसक्त्याउत्तरभागबाहुल्येन व्यवस्थायास्सत्वेपि संभवति समुदायान्तरतम्येन तदाश्रयणे मा
नाभावादनिष्टापत्तेश्च। अत एव स्वद्वा एड का इत्यादौ अवर्णभागबाहुल्येपि नाकारोदाहृरि। ६ ।

शे०क
८

निध्वनितत्वात्पमसमर्थः। नह्वर्णयोरादेशो वर्णप्रतिपत्तिरित्यादिनास्थानेंतरतमसूत्रशेषभाष्यैकवाक्यतेन स्पष्टमे
वोक्तमितिदिक्। दिदीमेद्वत्तिसुड्विधानवैयर्थ्यंतु नलोपस्यपाक्षिकत्वेन तस्यायत्रयस्त्रवणार्थत्वात्। ननुना
यंद्योपः त्वुग्यगावितिवार्तिकारंभात्। एवं नेकाचइत्येतदप्राप्तिप्रयोग्यसुटोऽचारितार्थ्यात्। घञर्थकविधानमि
तिकेनेकाच्त्वाभावेपिद्वयडः प्राप्तिसत्वादित्यरुचेराह। जहारेत्यादावितिं। आदिनाभूयात्स्तामित्यादौ आर्धधातुक
त्वबलादित्वयोरतिदेशेनप्राप्त स्यटः परिग्रहः श्रीणांसुभ्रूणामित्यादौ नुड्विशिष्टस्याजादित्वातिदेशेन ओः सु
पीतिप्राप्तयणादेशस्य च पसंयोगेवोध्यः। ननु यमुद्दिश्यविहितइत्युक्तौ एधिषीष्टेत्यादौ सुटः सकारस्यप्रत्यया
वयवत्वाभावेनषत्वंनस्यात्। नकारोद्देशेनसुटोविधानात्। नचतकारे प्रत्ययावयवत्वसत्वेनतदतिदेशेनषत्व
सुलभमितिवाच्यं। उद्देश्यतावच्छेदकधर्म"मानाधिकरणधर्मस्यप्रत्ययावयवत्वस्यविशिष्टेतिदेशेपिसकारे
तदभावादितिचेन्न। तन्मध्यपतितन्यायेनसीयुड्विशिष्टस्यप्रत्ययावयवत्वलाभेनसकारेतदवयवत्वाक्षते
※ कविहिधातूद्देश्यविशेषणेनापिआगमवि शिष्टागृह्यंते। अतएवबहुवचनस्यवस्नसाविन्यत्रपद
स्यपदादित्यधिकारादुपस्थितसमर्थपरिभाषावाधायपदत्वेनसुबंतत्वेनवा यत्रसाक्षादुद्देश्यतातत्रै
वास्याः प्रवृत्तिरित्युक्तसमर्थसूत्रेशेखरे। विशेषणेऽउद्देश्यत्वाभावेतुसाक्षादित्युक्तिरसंगता। ८ ।

राम
८

स्यात्। तेन नशेरते इत्यादौ रुड्विशिष्टस्य सार्वधातुकत्वान्नशीङः सार्वधातुके गुण इति गुणः सिध्यति। वर्णग्रहणे इति तद्वृत्तिधर्मातिदेशात् द्वघटितधर्मातिदेशे चेत्यर्थः। अत एव हुझल्भ्य इति सूत्रे भाष्ये रुदिहीत्यादौ धित्वव्यावृत्तये इह लीत्यनुवर्त्य हलादेर्हेरिति व्याख्याते अन्यथानया हलादित्वातिदेशेन तदसंगतिः स्पष्टैव। अत एव भूयात् स्तामित्यादौ वलादित्वाभावेन नेडिति तेन दिदीयेइत्यादौ हरीणामित्यादौ सुदित्रुदि च यणाद्यो नेति बोध्यं। इ. मंन इति। फलितार्थपरमिदं॥ सूत्रार्थस्तु हस्वान्परस्य पदावयवस्य ङमो ङमुड्जा दौ पदे इति बोध्यः। तेनावृत्तिकरणे गौरवेण सस्यभाष्यस्यैकदेशयुक्तित्वमिति परास्तं। पूर्वान्तत्वकथनेनैकदेशयुक्तित्वमित्यन्यत्। यत्तु मिदचोन्त्यादिति सूत्रस्य भाष्यविरोधेनैकदेशयुक्तित्वमस्येति। अत्र हि मिनः परादित्वे द्विषन्तप इति अत्र मोऽनुस्वारो न स्यादपदान्तत्वादित्युक्तम् आगमानामागमिधर्मवैशिष्ट्यबोधने हि तदसंगतिरिति तन्न युक्तिमत्। संयोगान्तलोपकृते ऽनुस्वारस्य सुकरत्वेन तस्यैकदेशयुक्तित्वस्यत्वप्रापिवाच्यत्वात्। नन्वेवं कुनः सोपेक्षितत्वमिति चेद्भाष्यानुभवविरोधात्। फलाभावाद्वरीणामित्यादौ नुटः सुप्त्वेनानन्तस्यपदत्वेन पदान्तस्यातिणत्वनिषेधप्रवृत्त्यादौ प्रवाहुल्याच्चेति गृहाण। सिद्धान्तासंगतिरिति। नन्वेवं। । ।

७ टिप्पणं नन्वपरनिमित्तत्वेनान्तरङ्गत्वात्स्वरसिद्धिर्भवत्येवनचवारणपरिभाषयाप्रयामनोसुकाभाव्यमिति वाच्यमतस्या:

बहिरंगपरिभाषानित्यत्वमूलकत्वेनयत्नानिरस्य

त्रीमतिनत्रैवनास्मीकारादिस्यत्वेराहकिन्त्वेति॥

शां.क. मपि भाष्यासंगतिः।पाघ्रेति सूत्रे पा इति विशिष्टरूपोपादानसत्त्वेनोपस्थितार्थस्य शब्दं प्रति विशेषणतयान्व
९ यसंभवेनार्थवतः पाशब्दस्यादेशविधानेनागमसमभिव्याहारे विशिष्टस्यैवार्थवत्त्वेन च निर्दिश्यमानप
रूपस्यार्थवत्त्वाभावादिति चेन्न। आदेशविधौ अंगाधिकारसत्त्वेनार्थवत्याः शब्दांतं यदंगं तदवयवस्य नि
र्दिश्यमानस्यादेश इत्यर्थस्य सत्त्वेन यदागमेति न्यायेन प्रकृतेर्थवत्याः शब्दः अपा इति तदंतत्वमपि व्यपदेशिव
द्भावेन तस्यैव सत्त्वेन तदवयव पाशब्दे निर्दिश्यमानत्वात्प्राप्तेरिति भाष्याशय इति बोध्यं। स्थानषष्ठीनिर्देशादि
ति। एवं च शब्दानित्यत्ववारणाय पठितवाक्यस्य लक्षणया समुदायादेशपरत्वेपि न शक्यार्थत्यागः इत्यचः
परस्मिन्नित्यादेर्नासंगतिरिति बोध्यं। ननु स्थानिवत्सूत्रेणानुमानिकस्यान्यादेशग्रहणमित्युक्तं। तत्क
थमिहोच्यते तस्य स्थानिवत्सूत्रे ग्रहणेन न दोष इत्यादेशग्रहणसामर्थ्यादिति चेन्न समं प्रकृतेपीति चेन्न। इ
नोवर्धेति वदेरूशिति षष्ठीनिर्देशेनाध्याहार्यबोधितस्यान्यादेशभावसत्त्वेपि श्रौतस्यान्यादेशभावे शब्दा
नामनित्यत्वानुपपत्त्या कल्प्यमानसमुदायादेशस्यादेशग्रहणेन ग्रहणेपि नेदृशानामिति बोध्यं। न त्वेव राम.
मुदस्यादित्याद्यापत्तिः। यदागमेति न्यायेनोद्देश्यतावच्छेदकसमानाधिकरणया बहुर्मा। । । ९

अत्तिदिश्यंते। तेनात्रस्यात्वमुपपन्नं अत्रचेदंभाष्यंमानमितिबोध्यं। अतिस्यइत्यादिभाष्योदाहरणादध्याहृ
तनिर्दिश्यमानपदंलक्षणया अर्थद्वयमित्याह अवयवरूपमेवेति। यद्यप्यतिस्यइत्यात्रांत्यबाधेऽत्यसदृश
स्यतस्यैवसिद्धांतत्वेनतदव्यवधानंचज्ञापकस्यसजातीयविषयत्वादजव्यवधानं। अतएवहंसशिरांसीत्यादौन
दोषस्तथापिअतिपूयमित्यादौस्थौघोविदुषीत्यादौचद्वितीयार्थस्यफलंबोध्यं। निरूपितत्वस्यतृतीयार्थत्वा
दाह। स्थानेनिरूपितेइति। सचनिवर्त्यनिवर्तकभावापन्नकोयणचीत्यादौतत्रचेकोनिवर्तकोयण भवतिप्रसं
गेसतीत्यर्थः सचार्थात्तस्यैवेतिबोध्यं। जातिपक्षेदोषाभावादिति। नन्विदमयुक्तंजातेः स्वतोनिर्दिश्यमानत्वा
भावेनव्यक्तेरुच्चारणावश्यकत्वेनोक्तंनिर्दिश्यमानत्वस्यतत्राभावादितिचेत्। अस्यायंभावः। निर्दिश्यमान
त्वंनोच्चार्यमाणसजातीयत्वंवक्ष्यमाणहयवरट्सूत्रभाष्यविरोधात्। नाप्युच्चार्यमाणपदबोध्यत्वंतत्वंउ
च्चार्यमाणस्यस्यापाबोध्यत्वस्यागमविशिष्टसत्वेनउदस्थादपिवदित्याद्युदाहरणपरभाष्यविरोधात्। येनवि
धिरितिशास्त्रप्रामाण्येनविशेषणस्यतदंतबोधकत्वेनोच्चार्यमाणविसर्जनीयपदबोध्यत्वस्यतदंतेसत्वेनो
क्तभाष्यविरोधापत्तेश्चातस्मादनच्छास्त्रीयसंकेतग्राहकासहरिणोच्चार्यमाणपदबोध्यत्वंतदितिवाच्यं। अ
।४।टिपणं। तत्रहिविसर्जनीयांतस्यपदस्यसत्वमित्यर्थेनिर्दिश्यमानपरिभाषयाविसर्गस्यैवस्थानेसत्वमित्युक्तमकथमुच्चार्यमाणविसर्जे

शां· क
१०

त्विचवदुदस्यादपि वदित्मत्राद्यंनौ टकिनाविति शास्त्र सहकारः सुपदइत्यत्र येनविधिरिति सहकारस्य। विसर्ज
नीयस्य सदत्यत्र तुन्नदंतस्य येनविधिरित्येतत्सहकारसत्वेपि विदुह्यपस्य तदभावात्। यद्यपि स्वरूपमिति संके
तग्राहकसत्वेनैतत्स्वात्स्त्रीयेत्यनुपपन्नं तथापि भाष्ये तस्य प्रत्याख्यानात्। सत्वेपि तदतिरिक्त विशेषणोदो।
षाभावाच्च। ईदृशनिर्दिश्यमानत्वं ग्रंथकृतोप्यभिमतमेव। अन्यथाव्यक्तिपक्षे शंकायाजातिपक्षेणसमाधा
नासंगतिः। तत्र जातेर्निर्दिश्यमानत्वेतु त्यसुत्याप्पृशृदित्सूत्र गृहीताष्टादशव्यक्तीनांनिर्दिश्यमानत्वसंभवा
त्। ज्ञापकाश्रयणासंगतिश्च। अंतरावृरीङ्. रिङोर्ङि. त्वस्य शार्थेमितिवक्ष्यमाणग्रंथसंगतिः। अन्यथानदो
सः साविल्यत्रानुवृत्तत्यदादीनामित्यस्यैवतद्धि धावनुवृत्तोंगस्येत्यस्य निर्दिश्यमानत्वसंभवादंत्यादेशत्वा।
यत्तस्यावश्यकत्वेननतद्संगतिः। ममतु अंगस्येत्यस्यैकतत्स्वात्स्त्रीयसंकेतितत्वेननतदंतस्यचतथात्वेनतत्संग
तिस्स्पष्टैव नन्वेवमपिस्वपूर्वापरविरोधः। इयङुवङोर्ङित्ववद्धात्वादीनामपिनिर्दिष्टत्वादंत्यादेशत्वायेत्यने
नधातोरप्येतत्स्वात्स्त्रसंकेतत्वात्वादिति चेत्। ग्रंथस्यान्याभिप्रेतकत्वात्। तथाहि। धातोरादिः धात्वादिः। धा
तुरादिर्यस्येत्यतद्गुणसंविज्ञानोबहुव्रीहिः धात्वादिश्च धात्वादीच धात्वादयः तेषामिति षष्ठीतत्पु।।

राम·
१०

रूपबहुव्रीहिगर्भैकशेषेण स्नुभ्रूश्रीणां निर्दिश्यमानत्वादित्यादेशत्वायेत्याशयात्। इदं तु धात्वादीनामितिवद्
ना सूचितमिति बोध्यं। अत एवानमुगिति सुग्विधानस्य यदागमेति न्यायानित्यत्वज्ञापकत्वं संगच्छते अन्य।
था यदागमेति लब्धस्य उक्तरूपनिर्दिश्यमानत्वाभावेन तदसंगतिः। अत एव च येन विधिरित्यत्र भाष्ये प्रत्य
यग्रहणे चापञ्चम्या इत्यस्य दृषत्तीर्णे इत्युदाहरणं संगच्छते इति दिक्। अनया परिभाषयेति। येन विधिरि
त्यस्यैव यदागमेत्यस्यापि संज्ञात्वबोधकत्वेनोक्तरूपनिर्दिश्यमानत्वं तयोर्नास्तीति भावः। लोकेनाप्य
गाधिक्ये संज्ञासंज्ञिभावस्यैवावबोधनात्। न चैतच्छास्त्रीयसंकेताभावात् तस्य तत्त्वं सुलभमिति वाच्यं। आद्यन्तौ
टकितावित्यादिना संज्ञासंज्ञिभावस्यैव लाभात्। अत एव ऋकारस्य गुणवृद्धी अरारावेवेति संगच्छते। अ
तिदेशस्य तु तथात्वाभावेन तद्बोधितस्य निर्दिश्यमानत्वमेव। अत एवोक्तनिसृणामिति भाष्यसंगतिः लिंग
विशिष्टपरिभाषाया अपि अतिदेशत्वेन तद्बोधितस्यापि निर्दिश्यमानत्वमेव। अत एव सखीसुपथीत्यादिवि
भक्तौ लिंगविशिष्टाग्रहणमिति परिभाषोदाहरणं भाष्ये संगच्छते। अत एव महतीमियायस्येति बहुव्रीहौ लिंग
विशिष्टपरिभाषया न्महत इत्यात्वमाशंक्यानित्यत्वेन समाहितं भाष्ये। नन्वेवं तदोः सस्सावित्यत्र। ।।

शां.कं. भाष्यशेखराद्यसंगतिः। तत्रहिनोरिक्तिनोक्तमनेषेत्यादौनस्याप्याप्तेरित्युक्तमतिस्यदित्यादौतद्वारणायपरिभाषाप्रवृ

११ त्तेरावश्यकतयायदागमेतिन्यायबोधितस्थानित्वस्याप्यनयाबाधाहितिचेन्न। विरोधाभावात्। निर्दिश्यमानत्वस्यद

द्यवयवत्वस्यनकारेसत्वेनदोषध्रौव्यात्। उदस्यादित्यत्रतुनि र्दिश्यमानस्योदः परत्वाभावेनततः परस्यनिर्दि

श्यमानत्वाभावेनचविरोधः स्पष्टएवेतिबोध्यं। एवंचतन्मध्यपतितन्यायबोधितस्थानित्वस्यापिनेयंबाधिकान

मस्थानिकद्वावनुस्यन्तत्वात्। नचयदागमेत्यनेनास्यभेदाभावेनस्थानिवृध्याकार्यजननादित्यस्योभयत्राविशि

ष्टत्वेमकथमेतदितिवाच्यं। कादेशःखल्ववश्यंवाच्यः साकच्कार्थः। अथवचनंसाकच्कार्थमित्यादिभाष्याद

सन्यायस्यातिदेशत्वलाभाद्यदागमेतिनूदस्यादितिनिर्दिश्य — मानस्येत्यस्योदाहरणादानात्संज्ञाबोधकइति

लाभेनचतयोर्भेदस्यबालैरपिसुज्ञेयत्वात्। अतएवजरायाइतिसूत्रशेखरः संगच्छते। नचोक्तभाष्याद्व्यपस

र्वनाम्नामित्यकच्विषयेनिर्दिश्यमानस्येत्यस्यप्रवृत्तिर्वास्तु। अतएवकिमः कइतिसूत्रशेखरोपपादितभिन्नकी राम.

त्यत्रभाष्यविरोधोनेतिवाच्यं। न्यायसिद्धोक्तभाष्याभ्यामेतद्भाष्यस्यैकदेश्युक्तित्वात्। अकचिकृतेधित्वंनप्रा। १११

प्नोतीतिभाष्यस्यतन्मध्येतिन्यायेनाकच्विशिष्टस्यधित्वेः कचः श्रवणंनप्राप्नोतीत्याशयमजानन्।

नापरत्वाद्बहिरङ्गत्वमिति समाधानमेकदेशिना कृतं। अत एव भाष्ये॰ यथा हृक्कारस्येन द्गशक्तिजेनेकारेणानिर्देश इति उक्त-
न्यायेन समाधानं कृतं। तत्र त्यशेखरस्तु हृड्डलय इति सूत्रस्य कैयटानुरोधेनेति केचित्। एतेन क्वचिद्विषये ऽयं न्या-
य इति प्रतीकमुपादाय किमः कादेशे कर्तव्य इति शेष इति वदन्तः परास्ताः। उक्तभाष्ये हि पविरोधान्नमपर्यन्तनस्य
किम एव कादेशमिति प्रक्रियाग्रंथविरोधाच्च। एतेन क्वचिद्विषये नायं न्यायः स्थानिवद्भावेनैव तन्त्वप्रतिपत्तिन
न्यायेनापि तल्लब्ध्यैव कार्यजननादिति वक्ष्यमाणग्रंथोपि इहैव व्याख्यात इत्यलं। विरोधाभावादिति राज्ञः क-
वेत्यादौ निर्दिश्यमानराजन्शब्दात्तस्य कादेशो भवतीत्यादिना समावेशसंभवादिति भावः। यद्यपि सत्यपि संभ-
वे बाधनं भवतीति भाष्यनये विरोधेपि बाधसंभवः। तथाप्यबाधेनैवोपपत्तौ बाधो न न्याय्य इति भावः। यत्वा-
देः परस्येति। सुपद इति भाष्योदाहरणादनेकालित्तिविषये ऽस्याश्चारितार्थ्येन परत्वादाभ्यां बाधः स्यादिति भा-
वः। नाप्नोति। निर्दिश्यमानेत्यस्य षष्ठीस्थाने इत्येतदर्थभूतत्वेन वाक्यार्थबोधात्पूर्वं प्रवृत्त्यांतरंगत्वं न स्मरात।
याम्तु स्थानषष्ठीनिर्णयोत्तरं प्रवृत्त्या बहिरंगत्वमिति भावः। कैयट इति। अत्राहुर्विबीजंतु अनयोर्निर्विषयत्वा-
भावः। हरीणामित्यादौ दीर्घस्यांत्यादेशत्वापत्ते अलोन्त्यस्येति चरितार्थमनामीत्यादौ ह्रस्वस्य गुण इत्यपि वाच्यं।

शा.कौ. १२ रन्तस्यसंकेतेनवत्वान्निर्दिश्यमानत्वाभावादंतरंगप्रवृत्त्युत्तरं वहिरंगप्रवृत्तौ वाधकाभावाच्च। अकृत्स्विषयेइति। अ
त्रपदकृत्स्नंतदुक्तंमाकृ। नमवृग्रहणमेवेति। नन्वनेकविधात्वर्थाभावेपिस्थानकृतान्तर्यस्यसत्वेनतत्रैवातिशय।
लाभार्थंतमवग्रहणंतत्वंचान्यूनानतिरिक्तस्यान्तिमत्वेनेनहरीणामित्यादौएदेतौनललाकृतिरित्यादौवकारोयणो
नेतिचेन्न। तदभावेहिपूर्वसूत्रेस्थानेग्रहणानुवृत्त्याप्रसंगेसदृशोभवतीत्यर्थसंपत्तेस्थानेद्न्तुतरसूत्रसामर्थ्या
देवातिशायनत्वलाभेनतमवग्रहणस्योक्तार्थतात्पर्यकत्वसत्वात्। तेनह्यनेकविधान्तर्यलाभेप्रसंगेस्थानेनैवान्तरो
भवतिसतिसंभवइत्यर्थेजातेतमवग्रहणस्यातिशायनत्वलाभार्थत्वमित्यन्यदिति वोध्यं। समानवर्णपादादीनांन
इति। तेनचरणशब्दस्यपदादेशोनेतिभावः। यद्यपिचरणपदशब्दयोःपर्यायतयास्थान्यादेशत्वसत्वेपिनदोष
स्तथापिपदंग्रिश्चरणोस्त्रियामितिकोशेनचरणशब्दस्यनपुंसकत्वलाभेनतत्स्थानेनत्समानार्थकपदादे
शोशास्त्रिनुमिपंदीनस्यापापत्तेः। ननुपदन्निति सूत्रस्यनस्थान्यादेश वोधकत्वंकिंतुव्यवस्थार्थत्वंकिंचस्थानेन्त
रतमे इतिसप्तम्यंतपाठस्यभाष्येदूषितत्वेनविसदृशादेशनिवृत्तिमात्रार्थकत्वेपितादृशस्यानिनिवृत्त्यर्थक। एम. १२
त्वाभावेननेदमुदाहरणमित्यस्वरसादाह। नृत्वन्क्रोष्टुरितिचेति। नन्वेवमपीति। अर्थवद्ग्रहण। । । ।

परिभाषमासर्वथानर्थकस्यवारणोपीत्यर्थः॥ अमहान्महान्भूतः महद्भूतः च्व्यंतस्योर्यादिच्विडाचश्चेत्यनेनगतित्वे
कुगतिप्रादयइतिसमासः गौणार्थबोधकत्वेनशब्दस्यापितत्त्वंबोध्यं। सुज्ञोर्दिरिति। अत्रकर्मण्यानश्चोपसर्गेइत्यइ
आदिनाअनुकरणपरिसंग्रहः। यद्वासंज्ञाआदिः प्रथमबोधकोयस्यससंज्ञोत्यर्थः। अत्रपक्षेपिरनुकरणसमुच्चायको
बोध्यः। महान्तौबाहूयस्यसमहाबाहुरित्यत्रान्वायोपसर्जनत्वस्यगौणत्वस्याग्रहणमावश्यकं। अतएवसमानाधि
५५ करणोत्तरपदे आत्वविधानंसफलमुपसर्जनप्रतिषेधश्च। एवंचेदंप्रयोजनंनासाधारणपदकार्यविषयत्वस्येतिहृदि
निधायाह। किंचेति। यत्तुपदोद्देश्यकंकार्यमेवनतत्कार्यमितितन्न। आन्महतइत्यत्रोत्तरपदाधिकारेणतेनपूर्वपदास्
दि॰न्या॰ ५ विरणयथाकथंचितत्त्वसत्वेपिराजश्वशुराद्यदितद्धितविधौसुवंतात्तद्धितइत्यस्यसत्वेपिस्वमतेप्रकालतनेनोष्वतिज्ञा
पकादुत्पद्यमानः प्रातिपदिकान्त्यः स्वपः परस्मात्। सर्वंचगर्गादिभ्यइत्यादौनलक्षणेत्यर्थसत्वेनतद्धितानांपदोद्देश्य
कत्वाभावेनप्राप्नोतिरितित्यादौयदापत्तेः। गोभवदित्यादौप्रगृह्यत्वापत्तेश्च। नापिपदसंबंधित्वंतत्त्वंप्राशुभिरित्यादाव
नश्नोनापत्तेः। त्वद्वतीत्यत्रत्वाद्यादेशानापत्तेश्च। तस्माद्वस्तुतः पदव्यपदेशरहितानिमित्तत्वंतत्त्वंतद्धितविधौप्राति
दिकाधिकारस्यसत्वेपिवस्तुतः पदव्यपदेशरहितनिमित्तकत्वसत्वात्। नन्वेवंप्रत्ययोत्तरपदयोश्चेत्यस्यापिपद। ।

शांक· कार्यत्वापत्तिः। तथा च त्वद्भवतीत्यत्र त्वादादेशो न स्यादिति वाच्यं। उत्तरपदे पदव्यपदेशनिमित्तकत्वेपि च्विप्रत्यया
१३ दौ वस्तुतः पदव्यपदेशरहितानिमित्तकत्वाभावात्। अत एव नञ्द्वयोपादानं। त्वद्भवतीत्यादौ च्विप्रत्यये स्वादि
ष्विति पदत्वसत्त्वेपि सुबंतत्वाभावात्। सुप्तिङंतमिह पदत्वं विवक्षितं। तत्र पदस्याप्रयोगेणेत्यादिना ग्रंथकृ
तैव ध्वनितं। यदितु राजश्वशुराद्यदित्यादौ उपजनिष्यमाणनिमित्तोप्यपवाद इति न्यायेन प्रकल्प्येति न्यायेन च
भविषयत्वेन पदत्वबाध इत्युच्यते तेन दापदव्यपदेश इति त्यक्त्वा सुबंतव्यपदेश इति पाठो बोध्यः। उपात्तमित्या
दीति। एतेन विशेषणत्रयस्यापीदमेव कृत्यमिति ध्वनितं तथाहि। यदुपात्तमत इति न तद्विशिष्टरूपं यद्विशिष्ट
रूपं प्रातिपदिकादिनं तद्विशिष्यार्थोपस्थापकं यद्विशिष्टार्थोपस्थापकं श्वशुर इति न तदुपात्तमिति ध्वनितं
। नन्वेवमोत्सूत्रस्य भाष्यासंगतिः। तत्र ह्यदोभवद्भोभवदित्यादौ प्रगृह्यत्वं गौणत्वेन परिहृतं। निपातपदस्य प्रा
तिपदिकतुल्यत्वादत आह। निपातपदं त्विति। निपतंत्याख्यातार्थं प्रति विशेषणीभवंतीति व्युत्पत्त्या निपातपद
स्य चादिषु योगरूढत्वमिति भावः। प्रातिपदिकपदं तु शुद्धरूढमिति वैषम्यं बोध्यं। वस्तुतस्तु अनुगतव्यक्तिका राम·
नां संज्ञानां व्यक्तिरेव प्रवृत्तिनिमित्तं। डित्थादिषु व्यक्तिरेव तत्र प्रत्ययार्थ इति न डित्थत्वडित्थयोर्भेदः। कादिसंज्ञा १३

नामपि व्यक्तिरेव न तत् अनुगता नां तासां तत्त्वबुद्ध्या एव। एवं च निपातसंज्ञाया अनुगतव्यक्तित्वेन व्यक्तिरेव प्रवृत्तिनिमि
त्तमिति चादित्वेन चादीनामुपस्थितिः। प्रातिपदिकशब्दस्य तु शब्द एव प्रवृत्तेर्निमित्तमिति प्रातिपदिकपदवत्त्वेनोप
स्थितिरिति युक्तमनयोर्वैषम्यं। ध्वनितं चेदं वैषम्यं कुत्वं कस्मान्न भवति भवत्वादित्यादिना वृद्धिसूत्रे भाष्ये स्पष्टं चेदं क
लृक्सूत्रे विवरणे। संज्ञाशब्दस्वरूपं वा प्रत्ययैस्त्वतलादिभिरित्युक्तिस्तु न त्वनुगतविषया लक्षणया तत्त्याव्याख्यानप
रकैयटस्तु चिंत्य एव। कुत्वं नेत्यस्य ककारो नेत्यर्थस्तु प्रकृताभिप्रायेण। तत्रांतरतम्यात्तस्यैव प्राप्तेः। एवं च णत्वं प्रा। ग्र
मित्यादावपि लक्षणांविनैव स्वरसतो निर्वाह इत्यलं। ननु नायं न्यायः पदकार्यविषयः किंतु विशिष्टरूपोपादानवि
षयोऽन्यथा गां वाहीकमानयेत्यादौ त्वदुक्तहेतोः सत्त्वेनात्वादिप्रवृत्तावपि गां पाठयेत्यादौ पाठनक्रियान्वयायवि
भक्त्युत्पत्तेः प्रागेव गौणत्वप्रतीत्या उक्तहेतोस्तत्राभावेन चात्वादिन स्यान्न मम तु विशिष्टरूपोपादानाभावान्न दो
ष इति कौस्तुभोक्तं स्मृतमित्याह। गांपाठयेत्यादाविति। ननु वोढृणां पद एव प्रतीतावपि वक्तॄणां तु ततः पूर्वमेव प्रती
तिसत्त्वेन विनिगमनाविरहो तत आह। भाष्यप्रयोगेत्वाद्यादेशकरणेन चेति। सांतेनिदीर्घ आदिशब्दार्थः॥ क्वचित्त
ग्रैव पाठः। तदनापत्तिरिति। अत्वं त संपद्यते। अमहान्महान्भूत इत्येतेषु त्वाद्यनापत्तिरित्यर्थः। त्वद्भवती॥ ।

शां·कौ· न्यत्रतु पदसंस्कारपक्षेपि दोषो बोध्यः। एतत्सर्वं वक्तुस्तन्मूलमेव तत्र घावोध इत्यभिप्रेत्य वस्तुतः स एव नेत्याह। किं चेति॥
१४ कर्तृक्रिये चानिर्दिष्टाविति पाठः। पुमान्स्त्रियेत्येकशेषात्। अत एव भाष्येपि तथैव पाठः। गामेवेत्यस्य तन्नन्दवाच्यमेवे
त्यर्थः। भाष्यस्यानुकरणमिदमन्यथा गौरेव निवदेत्॥ एवं चाग्रे देवदत्तैवेति पाठः भाष्ये संबुद्ध्यंतस्य तस्य दर्शनात्। ह्नु
नन्वं तु न वाक्यान्तत्वाभावात्। भाष्येपि गामभ्याज देवदत्त शुक्लामिति पाठेन तस्य वाक्यान्तत्वाभावाच्चेति बोध्यं। श्लोक
इति। अभिव्यक्तपदार्था ये स्वतंत्रा लोकविश्रुताः। शास्त्रार्थः स कर्तव्यः शब्देषु न तदुक्तिषु स्वितन्यर्थः। आरभतेनिकाचि
त्कोपपाठः आरभमाणो नेनिपाठः। तस्यात्मनेपदित्वात्। नन्वेवमोस्सूत्रस्य भाष्यासंगतिरेवोक्तरीत्या न्यायस्य पदकार्य
विषयत्वलाभेन न तथैव वक्तव्ये॰ न्यथासमाधिकरणान्तमनुचितस्तु तद्विशिष्टरूपोपादानविषयत्वमितो लभ्यत इत्याह। आ
श्रीश्रय इत्यादि। एवं च न्यायस्य पदकार्यविषयत्वंस्य स्पष्टमेवोक्तमिति भावः। तथापि मदुक्तरीत्यैव इदं भाष्यं व्याख्येय
मित्याह। गोनइति। एवं च तदुक्तविशिष्टरूपोपादानसाधकमिदं नेति भावः। तस्मात्स्फुवंत व्यपदेशरहितानिमित्तके
कार्ये यत्र विशिष्यार्थोपस्थापकसुपानं विशिष्टरूपं तत्रैवायं न्यायः सिद्ध इति बोध्यं। नन्वेवं मगोमतो गोमतो संपन्न गो राम·
मतो भूता इतिमन्ययलोपसूत्रभाष्यप्रयोगे स्त्रियाः पुंवदित्यस्यापत्तिः। अमहती महती संपन्ना इत्यत्रे। १४

वतत्त्वविशिष्टरूपोपादानाभावात्। एवंचास्यन्यायस्याप्रवृत्तिरितिचेन्न। गोमतीत्यस्य नद्यर्थेनाभाषितपुंस्कत्वेना-
दोषात्। स्पष्टं चेदं प्रत्ययलोप इत्यत्र विवरणे। यद्यपि तत्रैकपदे नञ्चंते क्वचिद्विकृतेः कर्तृत्वं क्वचित्प्रकृतेरेवं च गोम-
तीसंपन्ना इत्यत्र प्रकृतेः कर्तृत्वेन विकृतेः गोमतीत्यस्य भूतेत्यनेनैव वैयधिकरण्यान्न पुंवत्वं महद्भूत इत्यत्र तु विकृ-
तेः कर्तृत्वेनास्ति सामानाधिकरण्यमिति समाहितं तथापि गोमतीत्यस्यारोपेण अगोमतीत्यर्थकत्वेन सामाना-
धिकरण्यस्य सत्वादिति विवरणे न दूषितत्वादिति दिक्। सुपथाः स्रुघ्नोतना इत्यादाविति। स्रुवोभ्यां तु इत्येतयोरणा-
दिकोस्ति। आगमसमभिव्याहारे विशिष्टस्यैवार्थवत्वनियमेनासोत्रानर्थकत्वमिति भावः। नन्विदं सुक्तं। अ-
वयवानर्थकत्वेपि विशिष्टस्य तद्ग्रहणेन ग्रहणान्नानर्थकत्वं। न च निर्दिश्यमानेस्य सावयवषष्ठ्यामपि प्रवृत्त्या-
निर्दिश्यमानासन्तस्योपधाया दीर्घ इत्यर्थसत्वेन प्रकृते निर्दिश्यमानस्तम् अनर्थकावेति वाच्यं। अपि वदि-
त्यादावनर्थकेपि वाच्यादेशकरणेन निर्दिश्यमानस्यार्थवतो ग्रहणे मानाभावात्। स्वमते उणादीनामव्युत्प-
न्नतया सुस्रोतसित्यत्र तन्नमेवेत्यभिप्रायो नवकुंभकाः। सुपया इत्यस्यार्थवत्वस्योदाहरणस्य क्रमेरुत्तङ्गा-
दन्तापत्तेरिति चेन्न। सुस्रोतस्सित्यस्य तत्सप्रत्ययान्तत्वेनादोषात्। भाष्येपीदमेवोदाहरणं द्रष्टव्यं। यद्यपि।

[illegible]

शां.क. भाष्येदंडीवागमीन्तेवीपानंतथापिनतुपलक्षणतयैवव्याख्येयं।अन्यथातत्रमौचेतिदीर्घस्यसत्वेननियमस्यानुपपत्त्यु
१५ क्तत्वेनचतदसंगतिःस्पष्टैवेतिदिक्।अंगादित्तिपरेइति।परेइत्यनेनारुचिःसूचिता।नहीजंतुविभाषेदइत्यत्रार्थैव।
तएवषीध्वमःसंभवोनानर्थकस्येत्यगादित्यस्यानर्थकत्वरूपंतत्रह्लीढइतिनषीध्वमविशेषणमसंभवात्।इटोव
यवत्वेनविशिष्टषीध्वत्वमसत्वेपितद्विहितत्वाभावेनतत्वस्यदुरुपपादत्वात्।किंतुधकारविशेषणं।येननाव्यव न७
धानन्यायेनषोशब्दः।व्यवधानेपि भवतीतिवचनसामर्थ्यात्।इणःपरोयइट्ततःपरस्येतत्संबंधिधकारस्येढो
भवतीतितदर्थः।एवंचतत्राप्यर्थवतएवसंभवेनागग्रहणस्योक्तार्थबोधकत्वंयुक्तमेव परंतुअर्थवद्ग्रहणाद्
न्यस्यतेनानित्यत्वबोधनेपिअनिनस्मन्निन्यस्यनतन्मूलकत्वंभाष्यवचनरूपेणैवतस्यपाठात्।स्पष्टश्चायमर्थःवि
भाषेटइतिसूत्रेशेखरेइतितत्वंबोध्यम्।अस्यानित्यत्वमूलकत्वंवदन्नत्रवविभाषेटइत्यत्रानर्थकस्येवतस्यसंभवेना
त्रापितथाभ्रमःस्यादितिकर्तव्यंत्वयांगादितिः।ममतुनावश्यकंतदितिग्रंथकृताश्रोवोध्यइत्यलं।तावन्मात्रांशेस्वारि
तत्वप्रतिज्ञावलल्लभ्यमिति।अनेनोभयत्रइदमेववीजमितिसूचितं।यद्यपिअर्थाधिकारशब्दाधिकारावेवानयोर्वी राम.
ति १ जमितिकैयटेनोक्तंतथापिपक्षावितिसूत्रेभाष्येकथंपुनरेकयोगनिर्दिष्टयोरेकदेशोनुवर्ततेराकदेशोनेत्युक्तं।एक १५

नेनार्थवद्धातुरित्यतोऽर्थवत्पदानुवृत्तिदर्शनेन च यथाश्रुतभाष्यप्रश्नानुपपत्त्या समासनिर्दिष्टानामित्येवं तदर्थो
वाच्यः न तु परस्परान्वितानामिति। समासे हि वृत्तिस्वभावाद्राजपुरुषइत्येतद्दृष्टकराजपुरुषपदयोरपि राजसंबं
धवत्स्वरूपइत्यर्थेश्च क्वचिन्निर्विवादो न एव नामैकदेशेनामग्रहणमित्युह्याषः। एवं च पाकमूलेइत्येतद्दृष्टक
मूलपदस्य पाकमूलार्थकस्यार्थरहितस्य कथमनुवृत्तिरर्थाधिकारादिति प्रश्नः। शब्दाधिकाराश्रयणेन समाधिः
एकत्रार्थे एकोपस्थितिरूपेणोत्पद्यमानं संबन्धं यत्पदं तेन निर्दिष्टानां पदानामवयवैकदेशोऽर्थरहितोऽप्यनुवर्तते। आ
नुमीयते शब्दाधिकाराश्रयणादित्युक्तार्थः। समुदायाभिधायिद्वन्द्वनिर्दिष्टयोरिति तु प्रकृताभिप्रायेण पूर्वपक्षभाष्य
व्याख्यानपरं वाक्यमिति लभ्यते। तथापि नेदं युक्तं। औतोऽम्शसोरिति सूत्रेऽचिनवामित्यत्रान्वयाख्यानयेवा सुप्यापि
शलेरित्यतः सुपीत्यनुवर्त्यैवानुवृत्तिमुक्तन्यायेनाशंक्यालुगुत्तरपदे इति दृष्टांतेन वारणपरभाष्यासंगतेर्न हि दृ
ष्टांते दार्ष्टांतिके वा समासनिर्देशो लौकिके न तद्युक्तिसामंजस्यं भवेत्। तस्मान्न्यायद्वयस्य मदुक्तमेव प्रवृत्तौ निवृ
त्तौ च बीजं। एकसंबन्धान्वितानां परस्परमिलितानामित्येवार्थः। अत एवालुगुत्तरपदे इत्यस्यावतरणे लेखः। अत एव
पूर्वत्र लोकदृष्टान्तोल्लेखश्च संगच्छते इति कृतं बुद्ध्यपरवविदां कुर्वन्त्र्यादादीयसइति। ननु नेदं ज्ञा।

शां·क· पकंज्ञापितेपिचारितार्थ्याभावात्॥ ॥ ॥ईकारस्याकारेवहोर्लोपइत्यतोलोपइत्यनुवर्त्यापीकारस्यनि
९६ वृत्तावकारविधानसामर्थ्यादेवपररूपंबाधित्वादीर्घोभविष्यतीतिचेन्न।अंगवृत्तपरिभाषायाः सिद्धांतेऽस
त्वेनाकृतसार्वतिदीर्घव्यावृत्त्याकारस्यचारितार्थ्येनापवादत्वेनदीर्घंबाधित्वापररूपापत्तेरित्याशयात् दिवउ
दितीति।नन्वत्रचारितार्थ्याभावाद्ज्ञापकमिदंअर्धमात्रिकव्यंजनस्यैषत्साद्दृश्येनैकमात्रिकाकारेपिदीर्घ
स्याप्राप्तेः।नचव्रस्वेतिसूत्रेवग्रहणाकरणेलाघवेनक्त्वोरित्यत्रक्ङितीत्यननुवृत्तौद्युभ्यामित्यादावृद्धिह्रस्वभ्रन्
णार्थनित्यत्वात्पूर्वंदिवउत्वंतुनअंगत्वात्तस्यैवप्राप्तेरितिवाच्यं।प्रतिपदविधित्वेनशीघ्रोपस्थित्यादिवउत्व
वस्यादितिचेन्न॥ऊरूत्यपिवकारस्यतथात्वेनोभयोःसमत्वादित्याशयात्।पक्षद्वयसाधारणमपितदस्ती
त्याह।कृतउदितीति।नचतपरत्वंक्ष्लोपइतिदीर्घबाधनार्थमितिवाच्यं।सुपत्रराजितावाणाज्वलिताइवपन्नगाः
— ।नैर्ऋतोरःस्यभामंतसविनूरश्मयोयथेतिरा— मायणप्रयोगविरोधात्।उरण्रपरइतिसूत्रेऽणग्रहणाभा
केऊरपरइतिभाष्यविरोधाच्चस्पष्टंचेदंतत्रैवशेखरे।धर्मिग्राहकमानात्सादेशविषयइयंतेनसन्नाशंसतना। राम·
दित्कृजभ्यइत्यादीनदोषः।यद्यपिदीर्घेणार्थस्याभिधानंनास्तिसिद्धानामेवशब्दा। ९६

नामन्वाख्यानमित्यणुदित्सूत्रभाष्यान्न दोषस्तथापि लस्यौकचस्तुष्कानस्मान्यतिप्रवृत्तं शास्त्रमिति निबोध्यं॥
नन्वेवमूदुपधाया गोह इत्यत्र दीर्घनिर्देशो व्यर्थः। उदुपधाया गोह इत्यनेनैवेष्टसिद्धिरिति चेन्न। दोषाणां विस्पष्टत्वेवतदनु
वृत्तावानन्तर्याहूयतीत्यत्र ह्रिमात्रसिद्धये दोष इति विकृतनिर्देशस्य कर्तव्यतापत्तेस्तन्मत्याख्यानपरभाष्यासं
गतेश्च मचदुपद्धत्युक्तावपि गुणो ह्रिमात्रसिद्धौ रुकर्तव्यतेति वाच्यं। नक्रकौडिन्यन्यायेन तदुक्तरंचारितार्थ्येनउ
त्वेन गुणबाधांपत्याद्दूषयतीत्यनिष्टापत्तेः। न चैवं पर्य्यं गुणबाधेन कृतार्थत्वात्। न च तावन्मयोजनत्वेन धातुलोप
इत्यंनतरं पाठेनैव सिद्धाविह करणं व्यर्थमेवेति वाच्यं। लाघवाभावात्। पाठस्याशोकवनिकान्यायेन चरितार्थ्यं।
त्वाच्च। मम तु ऊदित्यनुवृत्तौ व्याख्यानेन तरतम इत्यस्य माप्यमाणानामनंतरतमव्यावर्तकत्वेनाप्रवृत्तौ न दोषो नापि भाष्या
संगतिरिति बोध्यं एतेन ऊ इति ह्रस्वदीर्घप्रश्लेषेण गोह इति विकृतनिर्देशप्रत्याख्यानेन विरुद्धेपमिति केषांचिदुक्तिर
प्यपास्ता। उदुपधाया गुह इत्युक्तौ कौण्डिन्यन्यायेन गुणबाधकत्वापत्तौ गुहयतीत्यनिष्टापत्तेश्च न च क्ङिति विषये क्ङिसंज्ञ न चेति
गुणनिषेधेन तस्य चारितार्थ्यं नोक्तन्यायाप्रवृत्तौ परत्वाद्गुणो इष्टसिद्धिरिति वाच्यं। निषेधेनापि तन्माप्तियोग्यतानानपायात्
तानेनापि न स्प इत्यन्यत। अतएव संबुद्धौ नलोपनिषेधेन कृतत्वस्य चारितार्थ्येपि अपवादो हनै लोपं बाधिष्यतीति

शं·क· संगतिः। किं चोत्तरसूत्रेपि न तत्प्रत्याख्यानस्य चिकीर्षितत्वेन न तदर्थं यत्नांतरस्यावश्यकतापत्तेः। प्रश्लेषे तु दीर्घस्वरि-
९७ तत्वबलादनुवृत्तिसामर्थ्याच्चेष्टसिद्धेः। यद्यपि ह्रस्वोकारकरणेपि भाव्यमानोप्युकारः सवर्णान्गृह्णातीत्यनेनेष्टसि-
द्धिर्भविष्यति। ऊदुपधाया इत्यत्राविवरणे उक्तं तथापि तदुक्तयुक्त्या स्वरसग्रस्तमत एव तत्सूचकमाहुरित्युक्तमि-
ति बोध्यं। स्थाने त्र्यणेतत्प्रत्याख्यानप्रकारस्तु प्रयोजनानामल्पत्वेनादर्शोसरित्यत्र ऊ इति दीर्घपाठ इत्युक्तं प्रागिति
विशदं भाष्यतत्वविदां। गवेहितंमिति। वाक्य इव समासेपि कृतो अवादयो नेति भावः। ननु मतेति निषेधस्तु न प्रत्या-
सत्यालुप्तप्रत्ययनिमित्तकांगसंज्ञोद्देश्यकविधावेव तत्प्रवृत्तेरंगीकारात्। स्थानिवत्सूत्रेण सिद्धेः। ल्विध्यर्थमिद-
मिति। अतृणेड्डित्यादौ आशीरित्यादौ च तृणहइम् शास इदङ्हलोरिति च सिद्ध्यति। सुहृषत्यासादह्नत्यत्र सो।
मनसो अलोमो षसो इति स्वरेः त्वसनस्येति दीर्घश्च न भवति। मनसा हचर्यादमुना साहचर्याच्च श्रूयमाणासंतस्य
वोभयत्र ग्रहणात्। तल्लक्षणमित्येव सिद्धे प्रत्ययलक्षणग्रहणं प्रत्ययनिमित्तकमेवेत्यर्थोपि द्रष्टव्यस्तेन प्रत्य-
यस्येतगविशेषणत्वेपि गोहितमित्यादाववादिन। नचाव्युपश्लिष्टस्येयोयवायावो भवंतीत्यर्थेन प्रत्ययस्ये- रास·
तरविशेषणत्वमेवेति वाच्यं। एवं सति सर्वनामस्थाने चासंबुद्धौ ह्रस्वस्य गुणः त्रिचतुरोरित्यादिविधौ प्रत्यय ९७

लक्षणानापत्तावनिष्टापत्तेः तस्मादितरविशेषणत्वमित्यस्य समानाधिकरणेतरविशेषणत्वमित्यर्थो वक्तव्यः
एवं च प्रकृते तत्त्वमस्त्येवेत्याहुः। वस्तुतो वार्त्तिकमते ऽल्विध्यर्थमेव प्रत्ययलक्षणसूत्रारंभः। अन्यत्र तु स्थानिवद्भावे
नैवेष्टसिद्धिस्तत्रास्य प्रवृत्तेः फलाभावात्। एवं च सर्वनामस्थाने इत्यादावस्याप्रवृत्तावपि क्षत्यभावेन समानाधिक
रणेत्यादेरनुपयोगात्। अन्यथा सुप्ति ङंते सन्यङोः सर्वस्य सुपीत्यादावगत्या तदर्थं यत्नांतरस्य कर्तव्यतापत्तेश्चेति
दा दिक्। देवदत्तश्चिकीर्षतीत्यौविति। आदिना देवदत्तो गार्ग्य इत्यस्य परिग्रहः। सन्नंतत्वादि त्यादिना यजंतत्वपरि
ग्रहः। धातुत्वादित्यादिना देवदत्तो गार्ग्य इत्यत्र प्रातिपदिकत्वस्य संग्रहो बोध्यः। ननु विशेष्यासन्नि धानात्कथं
तेन तस्मि हेः सोत आह। सचेति ननु नित्यं स इत्यत्रुत्तरपदग्रहणेन विशेष्यांतरसत्त्वेपि तत्स्वीकारेणातएव वनोरचेत्या
दौ न दोष इति नेदं च मत्कृतमिति चेत्। अयं भावः। विशेष्यांतरासत्त्व इत्यस्योपस्थि तदादीत्यस्य स्त्रीप्रत्यये चेति निषेध
नासत्त्व इत्यर्थः। तेनातिराजकुमारिरित्यत्र तद्विषयके गोस्त्रियोरिति सूत्रे तदादिनियमाभावेपि तदंतविधौ ह्रस्वासि
द्धिः। तत्रोपसर्जनस्येति तु नोविशेषणं गोशब्देपि तदापत्तौ अतिसुगौरित्यादौ ह्रस्वापत्तेः। यद्यपि तदादेरित्युप
स्थितविशेष्यमादाय तदंतविधिरन्यत्र तु शब्दस्वरूपमिति युक्तं वक्तुं। तथापि तदादीत्यस्यार्थोधि। ९१६।

शं.क. कारानुरोधेन प्रत्ययविधानावधिरूपस्य ग्रहणेन वनो रचेत्यादौ तेन सामानाधिकरण्याभावात् शब्दस्वरूपविशेष्यमा
१८ दायैव तदंतविधेरावश्यकत्वादित्याशयात्। अत एव हलङ्ड्यादिसूत्रे शब्दरत्ने बहुश्रेयसीत्यादौ लोपाय ङ्या
ब्भ्यामुपस्थिततदादीत्यनेन तत् मतमभ्युपेत्य शब्दरूपं विशेष्यमादाय तदंततां संसाध्य स्त्रीति सीत्येतदुपस्थिततत्
दादादौ त्येन हल्लेन द्वितीयस्तदंतविधिः साधितः। अत एव एङ्ह्रस्वादित्यत्रोक्तप्राचीनग्रघटकशेखरादिः संग
च्छते। अन्यथा कुलेमादिसिद्धये व्यधिकरणान्वयस्यावश्यकत्वेन एकदेशविकृतन्यायेन कतरदित्यादौ रफोते
स प्रकृतिनिर्वैत्वेनाकारांततदादित्वस्यापि लाभेन च हलो लोपापत्त्या प्राचोक्तरीतेरावश्यकत्वेन तदसंगतिः। अत्र च ङ
न्तादिप्रतिषेधप्रत्याख्यानभाष्यमपि मानं। धर्मिग्राहकमानात् परिभाषायामपि प्रत्ययप्राग्भवित्वस्य तदादेर्ग्रह
णान्नोक्तदोष इत्यन्ये। एतेनार्थवत्परिभाषयैवेष्टसिद्धेरिति निरस्तं। विशिष्टरूपोपादानाभावात्। न चैवमपि स्त्रा
भ्यां नाधातवदित्यत्रोपस्थिततदादौ तस्यानन्वयादुक्तदोषस्तदवस्थ एवेति वाच्यं। क्वचिदुपस्थिततदादेर्लिंगस
म्यात् तदितरपरत्वेनादोषात् अत एव सुप्तिङन्तमित्यत्रापि दोषो। न्यथा पदसमुदायस्य परत्वापत्तावनिष्टापत्तेरि राम.
तिगूढाकूतं। यत्र प्रत्ययो निमित्तत्वेनाश्रियते तद्‌ इति। केणः लुङ् लङ् लृङ् क्ष्वस्य तासी सुप्चोस्तुपीत्यादौ। एवं १८

चद्वेएतेपरिभाषेइतिबोध्यंयद्यपिप्रत्ययग्रहणेचापंचम्याइत्यस्याविशिष्टतयावक्ष्यमाणत्वेनान्नैतद्व्याख्यानं
नयुक्तंतथापिविशेष्यविशेषणभावस्याव्यवस्थितत्वेननत्रतत्रलक्ष्यानुरोधेनैवेष्टसिद्धौतन्निष्फलमित्यभि
प्रायकत्वेनास्यमाचामनुरोधेधिधित्वाप्र यद्यस्यसर्वस्याव्यवस्थार्थकत्वेनकृतार्थत्वादित्यन्यत्रस्पष्टं।गर्गादिभ्यो
यञित्यादौपूर्वंयञोविधानाभावात्प्रत्ययत्वाभावेनविहितेतुपंचम्याःकृतार्थत्वेनपुनःप्रवृत्तौमानाभावेनचा
स्याविहितप्रत्ययविषयत्वंबोध्यं।नन्वेवंप्रत्ययग्रहणेतदादिनियमेनाधिकव्यावृत्तिर्नतुन्यूनस्येतितेनइस्यन्मा
त्रमित्यादौवत्वंनात्स्वार्थइतिमात्रचःसिद्धिःअस्यापत्यमिसत्दंनाद्यञिञोश्चेतिफक्सिद्धिश्चेत्यनुपसर्जनात
दितिसूत्रविवरणरीत्यासुमनायतइत्यादावुपसर्गस्यपृथक्करणेनजातसमासाभावःकल्प्यतइतितिङन्तोक्त
रीत्या मनःशब्दस्यनविशिष्टस्येतितत्रत्यशेखररीत्याचदेवदत्तश्चिकीर्षतीत्यादावधिकव्यावृत्तावपिइ
षंइत्यस्यधातुत्वापत्त्यायुक्तंदोषापत्तिः।अतएवभाष्यमाकरोदित्यादौदेवदत्तोगार्ग्यःपरमगार्ग्यायणइत्या।
दौचाधिकव्यावृत्तिःफलमुक्तमितिचेन्न॥देवदत्तस्यापत्यमितिविग्रहेऽवयवेपिएकार्थीभावांगीकारेणाघ।
क्यंतात्कृतसंधेरपत्यमित्यर्थेविधीयमानइञ्दत्तशब्दादपिस्यात्।राज्ञःपुरुषइत्यादाववयवस्यइसइ।

शा.कौ. त्यस्य षष्ठ्यंतत्वेन समासः स्यात्। कुद्दस्यराज्ञः पुरुष इति समुदायेन द्व्यावृत्तावपि न्यूनेन तद्भावात्। तस्मादधिक
९९ व्यावृत्तिस्थिवन्न्यूनव्यावृत्तिरप्यवश्यं वाच्या। सा च मुख्यव्यवहारविषये इयन्मात्रमित्यादौ त्वनिर्देशेन तत्त्वमिति
न तत्र दोषः। भाष्यं तूपलक्षणतया नेयं अन्यथाऽनया समुदायव्यावृत्तिसिद्धावपि अवयवव्यावृत्तेरकरणेन न
च न तत्र न्यूनतापत्तेः उद्योतादयस्तु तत्र त्यकैयटानुरोधिन इति न तद्विरोधः सुमनायत इत्यत्र तु उपसर्गस्य पृथ
क्करणे नञा न समासाभावकल्पनेपि सुपः समुदायविहितत्वेन तेनाधिकव्यावृत्तेरशक्यत्वात्तत्र त्यशब्दस्थित्वं त्य
सत्व। तस्मात्तत्र समुदायादनुत्पत्तिरेव पृथक्करणेन वोध्यत इति तत्त्वं। उगितश्चेति सूत्रे भाष्ये इति। ननु प्रत्ययाप्रत्ययग्र
हणे तत्र वनावपि वनो रचेत्यत्रेवोगितश्चेत्यत्रापि उगिदंतात् प्रातिपदिकादित्यर्थे निर्गोमतीत्यादौ न दोषः। न च तदादौ त्यस्या
प्रसिद्धेनोऽगित्प्रातिपदिके तदादित्वाभावान्ङीवनापत्तिरितिवाच्यं। प्रत्ययाप्रत्ययकोटिद्वयस्य सत्वेन तत्र वाक्य
भेदेनोगिदंतादिति व्याख्याने नोगित्प्रातिपदिकेष्वप्यदोषादिति चेन्न हि फलाभावात्तदप्रवृत्तिरित्याशयात् अत
एव संज्ञाविधाविति परिभाषाज्ञापकपरसुप्तिङ्. तमिति सूत्रस्थभाष्यसंगतिः। अन्यथा प्रदेशेन लोपः प्रातिप रम.
दिकांतस्येत्यादौ नदंतविधिसत्वेन प्रत्ययमात्रस्य पदसंज्ञासत्वेपि ज्ञापकस्याचारितार्थ्येनासंगतिः। तस्माम ९९

र्थ्यान्यदेशेतद्भावस्तु न युक्त इति वक्ष्यते। नलोपविधावपि वाक्यभेदांगीकारेऽनुफलाभावस्तुल्य एवेति बोध्यम्
। यत्त्ववयवावयवः समुदायावयव इति न्यायेन निर्यं वमतो त्याहि सिद्धो प्रत्ययाप्रत्ययग्रहणपि तत्प्रवृत्तौ प्र
त्यभाव इति तन्न अवयवावयवत्वान्पूर्वं यत्रावयवस्यानंतरं नैव लोके सिद्धेन ग्रहणबोधनात्। नन्वेवं प्रत्यया
प्रत्ययग्रहणेऽप्येतत्प्रवृत्तौ सनाद्यंताइत्यत्रापि प्रतीषिषतीति प्रतीकस्य शेखरोक्तरीत्या सन इति प्रत्ययाप्रत्ययग्र
हणेन देवदत्तश्चिकीर्षतीति पूर्वोक्तोदाहरणासंगतिः। तत्र हि अभ्यासांत्यस्यान्त्यनेनेति दीर्घो न भवत्यनांगत्वात्सिषे
धेत्यादावुत्तरखंडे सांप्रदायिकोऽशितिवारणायत्नादेवसुप्रसिद्धो येन नः परोसैव च प्रकृतिराद्या आदिग्रहणे च कृतमित्य
गं तु नाम तेन निवेश इत्यर्थकैकाचो हे इति सूत्रस्थभाष्ये एोतरखंडस्य सनः प्रत्ययाधिकारस्थत्वाभावेन प्रत्यय।
त्वाभावात्सन्नन्तत्वं तु स्वरूपतोऽस्त्येवेति तदेतस्य धातुत्वं भवत्येव। सन्यतइत्यस्यांगावयवाभ्यासस्यानइत्या
त्सानिइत्यर्थेनेत्वमपि सुलभमित्युक्तं। तत्र षत्वं तु पूर्वत्रासिद्धमद्विर्वचन इत्युक्तेः षत्वे कृते द्वित्वमित्याशयः। न
च सन्यङोरित्यत्र लिटि धातोरित्यतो धातोरित्यनुवृत्तेः पूर्वं धातुत्व सत्त्वे एव द्वित्वमप्रत्यामनीषइत्यवस्थायामे
व सनाद्यन्ताइत्यस्य प्रवृत्तेः। न च मत्ययाप्रत्ययग्रहणमिति वाच्यं। एवं सति कृतद्वित्वस्य धातु त्वा। ६ ।

शां.क.
२०

भावेनततोलुडाद्यनुत्पत्तेः। षाष्ठद्वित्वस्यद्विरुच्चारणरूपत्वेनविकाराभावेनलक्ष्येलक्षणस्येतिन्यायाप्रवृत्त्या।पुन
र्धातुत्वेतुप्रत्ययाप्रत्ययग्रहणे स्थानीवसत्त्वात्। वस्तुतः पूर्वंधातुत्वेधातोरित्यस्यनिवादिविधौविहितविशेषणे।
त्वेनांतरंगत्वात्तिबाद्युत्तरंसन्नंतसमुदायस्यप्रथमैकाच्त्वादादेश्चसापेक्षत्वेनद्वित्वप्रवृत्तेः। लिटिधातोरित्यत्र।
धातुग्रहणंतिष्ठतुतावत्तस्मान्न्यासिकर्मितिभाष्योक्तेर्धातोरित्यस्यनिवृत्त्याशब्दांतरप्राप्तिकधातुसंज्ञायाअप्रवृत्ते
श्चेतिचेन्न। देवदत्तोगार्ग्यः परमगार्ग्यायणइत्यादेरविवक्षितत्वादादिपदेनसूचितएव। ——— ।प्रत्ययग्रहणे
चापंचम्याइति। यद्यपिभाष्येतदंतविधिप्रयोजनकथनावसरेप्रत्ययग्रहणेचापंचम्याःप्रयोजनमित्यु।
क्तंतथापिप्रत्ययग्रहणेचेतिपूर्ववाक्येनप्राप्ततदंतविधिरेवप्रत्यासत्त्यापंचम्याइत्यनेननिषिध्यतेइत्यर्थ
स्तलभ्यः।विधौतुनास्योपयोगः।तत्रान्यथावारणस्यप्रागुक्तत्वात्।अतःपर्यवसितमाह परिगृह्यतइति।अनु
यतेइत्यर्थः।प्रयोजनांतरमाहाप्यथेति। ननुचरितमित्यादौनत्ववारणायतत्वरदाभ्यामितितकारविशेषणंनिष्ठेति
तत्रलुप्तषष्ठीकमितिनैकदेशान्वयः।सर्वत्रपंचम्यंतात्परप्रत्ययाश्रयणाभावादुक्तदोषस्तदवस्थस्सर्वेतिचेन्न।एम
प्रत्ययावयवेपिप्रत्ययत्वव्यवहारस्यप्रत्ययलोपइतिसूत्रेप्रत्ययग्रहणेनज्ञापितत्वाददतएवादे। ६ । २०

शामन्त्यमयोरिदुदुपधस्येत्यादौ लक्षणाश्रयणं नमान्यदाद्योरिति चरितार्थमिति बोध्यं यद्वास्मन्निर्वैचित्र्येण।
रदाभ्यामिति निष्ठायामित्येकदेशोपि विशेषणं यदागमपरिभाषाया अनित्यत्वादुक्तेन दोषः। लुप्तविभक्त्यं तत्वकल्प
ने गौरवं। निर्दिश्यमानपरिभाषया तु नात्र निर्वाहः। निष्ठापदस्येतच्छास्त्रसंकेतितत्वात्तत्रचेदं भाष्यमपि मानमि
त्युक्तं। यद्यप्यंत्यविकारे ऽन्त्यसदेशस्येत्येवेदं सिद्धं तथापि तीर्णेवानित्यादौ दोषः स्यादेव अनराबेत्यादावित्युक्तं। नदो
बहति। न च नन्नतदंतग्रहणाभावेपि ङ्याब्भ्यांपरस्याश्छन्दस्य हल्लोलोप इत्यर्थेन दोष इति वाच्यं। अनयानदंताश
नुपस्थितावपि तदादौ संज्ञोपस्थित्या नदादेः परो यो ङीत्यर्थे हते सुतिसीनामपि प्रत्ययत्वे नोपस्थितनहि धानादव
धिभूततदादौ त्येतद्विशेष्यनयाङ्याब्वंतानदादेरित्यर्थोपनौ बहुश्रेयसीत्यादौ सुलोपानापत्तेः आहिना स्त्रीभ्यो ढ।
गित्यादेः संग्रहो बोध्यः एतेन तदंतांशस्य निषेधेपि हलङ्याब्भ्य इत्यत्र न दोष इति परास्तं। यत्र प्रत्ययो निमित्तत्वेना
श्रियते एवं यत्रापीत्यनयोरन्यैवोक्तो ङीकारो बोध्यः। तत्र यत्र केण।। सुपि चेत्यादौ पञ्चम्यंतासन्निधानं तत्राध्या।
हृतयोग्यं तत्प्रदमादाय निषेधो बोध्यस्तत्र प्रमाणमप्याह। अत एवेति। तादृशं तत्प्रदमादायापि तत्प्रवृत्ते
र्ङीकारादेवेत्यर्थः कुमारीब्राह्मणीरूपेति। लौकिकवाक्यमिदं रूपं तु कुमारब्राह्मणि।

शां-क रूपेतिकर्मधारयेपुंवत्वविधानात्।यद्वाकुमारीब्राह्मणिरूपायस्यांनगर्यांइतिबहुव्रीहिस्तत्रजातेश्चेतिनिषेधा
२१ त्तपुंवत्वंकुमार्यादिशब्दानांवैकल्पिकजातिकार्यमित्यस्य भाष्यादिसंमतत्वात्॥प्रथमत्यागेवीजंतुधर्मिग्रा
हकमानात्प्रत्ययत्वतद्व्याप्यधर्मावच्छिन्नव्यापकशब्दोपादानेएवैतत्प्रवृत्तिरूपं।अतएवरात्रेः कृतिविभा
षादित्यत्रननिषेधः रात्रेस्तदसंभवस्तुनाचारक्विवंतात्कृजादौतत्संभवात्।उपसर्गस्यघञीत्यत्रतुउपसर्गाद्धञो
ऽसंभवान्ननिषेधः।कुमारब्राह्मणिनरेत्यत्रतुरूपवादिसाहचर्येणह्रस्वोवारणीयः।संज्ञाविधावित्यनेनतुन
सिद्धिः।नत्रसंज्ञाविधावितियदिकर्मषष्ठ्यासमासस्तर्हिनरप्नमपोघइत्यत्रासत्यपितदंतविधौप्रदेशेघरूपे
त्यादौतदंतग्रहणाद्दोषतादवस्थ्यात्।अथवाकरणतृतीययासमासः।घसंज्ञायांतदंतविधौप्रदेशेघरूपे।
त्यादौप्रत्ययग्रहणाभावान्निषेधवैयर्थ्यप्रसंगात्।अथवासंबंधसामान्यषष्ठ्यासमासः संज्ञायाविधौसं
ज्ञयाचविधावितिनिष्ठेतिपूर्वनिपातनविधौनिष्ठामात्रस्यपूर्वनि‾पातापत्तिः।नचकर्मषष्ठ्यासमासेन।
विधौनिषेधएवास्तु॥प्रदेशेतत्सामर्थ्यात्तदभावोस्त्विति शेखरप्रतिपादितमेवेतिवाच्यं।प्रत्ययग्रहणेचापंच साम·
म्यादित्यस्यदृषन्नीरोदित्युदाहरणदानपरत्वेनविधिरितिसूत्रभाष्यविरोधापत्तेः।रात्रेः कृतिविभाषेत्यत्रापितन।९। २१

दभावापत्तेश्च॥निषेधासत्त्वेप्रदेशेतदंतद्वयेगौरपरमब्राह्मणितरेत्यत्रह्रस्वःप्राप्नोतिसत्त्वेतुतस्मिन्विधौतन्नि
षेधेप्रदेशेतदंतविधौगौरब्राह्मणितरेत्यत्रैवप्राप्नोतीतिफलभेदस्ययेनविधिरित्यत्रकैयटेनैवोक्तत्वाच्च॥निष्ठे
त्यत्रोक्तदोषापत्तेश्चतत्रत्यशेखरस्यप्राचामनुरोधित्वमेवेतिबोध्यं।उत्तरपदाधिकारइतितुप्रत्यासत्त्याउ
त्तरपदविशेष्यतयाप्राप्ततदंतविधेरेवनिषेधिका।अतएवघरूपेत्यत्रउत्तरपदाक्षिप्तपूर्वपदेनप्राप्तस्यननि
षेधः अन्यथाभाषितपुंस्कादित्येतत्सामानाधिकरण्येनानेकाचः भाषितपुंस्काद्योङीतस्यह्रस्वइत्यर्थाप।
त्तौयतिरूपेत्याद्यौह्रस्वानापत्तेः।इणःशतरिङीपिचरूपमेतत्।अतएवघ्यङ्इतिसूत्रेघ्यङन्तस्यपूर्वपदस्ये
त्यर्थसिद्धिः।अन्यथायोग्यत्वातदाक्षेपाभावेनातिकारीषगंध्यापुत्रइत्यत्रापिनदापत्तिः।एतेनसुपिचेत्या
दाविवयोग्यस्यपंचम्यंतान्यस्त्वमादायप्रत्ययग्रहणेचापंचम्याइत्यनेनैवेष्टसिद्धावियंव्यर्थेत्यपास्तं॥शब्द
स्वरूपंविशेष्यमादायप्राप्ततदंतस्यतेननिषेधेपिउत्तरपदेइत्यादिविशेष्यत्वेनप्राप्तस्यतदलाभाच्च॥रात्रेः
कृतीत्यादावपितदापत्तेश्च।अतएवलेखग्रहणस्यज्ञापकत्वसंगतिः।अन्यथानेननिषेधेलेखशब्देनतदप्रा
प्ताविध्यंशेनतस्यादितिनदसंगतिरितिदिक्।नन्वेवंपरमकारीषगंधीपुत्रइति।इवशब्दोभिन्नक्रमः।एवंप्र। १ ।

शां·क न्ययग्रहणादितिपरिभाषास्वीकारेअतिकारीषगंध्यापुत्रइत्यत्रैवात्रापिस्यादित्यर्थः।मरुवद्दर्शनेजलत्वमिति
२२ यथानत्रनतथात्रापिनेतियावत्।यद्वायथाश्रुतमेवष्यङ्इतिप्रत्ययग्रहणेनशब्दरूपविशेष्यमादायतदंत।
विधावुत्तरपदाक्षिप्तपूर्वपदमपिविशेष्यमितिष्यङंतांतइत्यर्थेस्यपरमकारीषगंधीत्याद्यर्थमावश्यकत्वे
नतत्रैवात्रापिस्यादित्यर्थः।ननुविषयसप्तमीत्वस्वीकारेप्रत्ययेगृह्यमाणेसमस्तत्वनुपसर्जनस्त्रीप्रत्ययविष
येतदादिनियमोनान्यत्रतुसोस्त्येवेत्यर्थेनतत्तद्विषयकवाक्योपप्लवसत्वेनानुपसर्जनविषयकवाक्यस्यपर
मकारीषगंधीपुत्रइत्यादौसंप्रसारणार्थंतयासार्थक्येपिउपसर्जनयतष्यङ्तदादित्वंतस्यपूर्वपदस्यसंप्रसा
रणमिस्तुपसर्जनविषयकवाक्यस्यवैयर्थ्यमेवतादृशलक्ष्याभावात्।यद्यपिकारीषगंध्यापतिःस्वामिनीयस्येति
बहुव्रीहौतत्संभवस्तथापिपरिभाषायाप्रत्यासत्तेराश्रयणेनयस्यसमुदाय-पस्त्रीप्रत्ययांतत्वमानेयंतदर्थंप्रत्यु
पसर्जनत्वएवतदादिनियमांगीकारादितिचेन्न।प्रतिलक्ष्यंलक्षणोपप्लवस्यसर्वत्रसत्वेपिविप्रतिषेधेपरमित्या
दिनातत्तद्विषयकवाक्योपप्लवाभावबोधनाम्निवोपसर्जनविषयेपिनतदादिनियमोभवतीतिभनेननतद्विषयकवा। राम·
क्यस्यैवाभावबोधनात्।सामान्यतःप्राप्ततदादिनियमस्यानुपसर्जनविषयेपिनिषेधमात्रार्थकत्वेपिउपसर्ज। । २२

नविषमांशेनान्वयांभावाच्च।केचित्तुकारीषगंध्यामतिक्रांताकारीषगंध्यातिनापिप्रत्ययंपूर्वपदस्यलोपः।तस्याः
पतिरितिकारीषगंधीपतिरित्यत्रतत्संभवोप्यस्तीत्याहुः।नन्वेवंदृष्टामालेत्यादौआवंतात्स्त्रीत्वमन्यत्र र्थेङ्याव्ग्रह
णाभावस्यकांतदादितिदिमाभावादेवंचतन्मन्याख्यानासंगतिः नह्यत्रलिंगविशिष्टपरिभाषावसरः।आत्त्रहितेनस्य
दृष्टामालेत्यादेः समुदायस्यप्रातिपदिकत्वाभावात्तस्यआमदृष्टामालादेवदतेत्यादौएकांतरत्वेनएकांतरत्
पातिरितिचेत्सत्यं।मत्याख्यानपरभाष्यप्रामाण्येनप्रातिपदिकसाहचर्येणचपृथग्योपस्थापकविभक्त्युनवय
वकङ्आवंतस्यैवग्रहणात्।प्रत्येकमपिपदत्वसत्वेनैकांतरत्वाभावाच्चादोषादितिस्पष्टआपसूत्रेशब्दरत्नेइति
बोध्यं।इवाचानिक्येवेति।केचित्तुप्रत्ययग्रहणेयस्मादितिपरिभाषाग्राहकेपूर्वोक्तयस्मात्प्रत्ययविधिस्तदादीतिये
गविभागेनङ्याप्ङ्वङ्इत्यतोस्त्रीत्यनुवर्त्यशब्दाधिकाराश्रयणादर्थपरत्वेसंपाद्यस्त्रीप्रत्ययइत्यर्थेपूर्वस्मा
त्याविमतः स्त्र्याख्येत्यनुवर्त्यतेनस्त्रीप्रत्ययस्यैवविशेषणात्प्रधानस्त्रीवाचकस्त्रीप्रत्ययभिन्नप्रत्ययग्रहणेन
दादिविधिरित्ययौदिर्यलब्धेत्याहुः।तच्चभाष्यानुग्रहोविचार्यः।यत्तुष्यङ्इतिसूत्रेअनुपसर्जनस्येत्येवास्तु
तत्सामर्थ्यात्तदादिनियमाभावः।एवंचष्यङ्ङनस्यानुपसर्जनत्वाव्यभिचारात्ष्यङोविशेषणंतत्।अनुपसर्जे

रां॰कु
२३

न्यङ्कुतदंतस्य संप्रसारणमित्यर्थः। निकारीषगंध्यापुत्र इत्यादौ न दोषः। गोस्त्रियोरित्यत्रापि शब्दरूपं विशेष्यमा
श्रयलभ्यतदंते नोपसर्जनस्य विशेषणात्स्त्रीप्रत्ययांतं नयदुपसर्जनं तदंतस्य प्रातिपदिकस्येत्यर्थे नातिराजकु
मारिरित्यादावपि न दोषः। अतिकुमारिरित्यादौ तु व्यपदेशिवद्भावो बोध्यः। एवं च प्रयोजनानामन्यथासिद्धत्वे
न नैषा लक्ष्यसाधिकेति चेन्न। अतिगोवष्कयणीत्यादौ वष्कयणीशब्दस्य गुणशब्दत्वाल्लौकिकोपसर्जनत्वेपि
तदंतस्य गोस्त्रियोपसर्जनत्वसत्वेन ह्रस्वापत्तेः। न च सिद्धांतेपि तत्र तदंतद्वयेबाधकाभावेनेष्टापत्तिरिति वाच्यं।
गोस्त्रियोरिति सूत्रे भाष्येऽतिराजकुमारीत्यत्र ह्रस्वत्वमाशंक्योक्तपरिभाषया कृतसमाधेरेव तद्बाधकत्वसत्वात्।
अन्यथा परिभाषाया अस्वीकारेपि त्वदुक्तरीत्या दोषस्य दुष्परिहारत्वेन तदसंगतिस्स्पष्टैव। उपसर्जनस्य विशेष
णत्वे गोशब्दांशोपि तदंतविधौ शोभनागौः सुगौः नगौरगौः नपूजनान्नञ्जस्त्सुरूपादित्याभ्यां समासांताभावः। प
रमासु गौरगौर्वायस्य परमसुगौः परमागौरित्यादावपि न दोषापत्तिश्च। सुसह्यायेव्यपदेशिवद्भावाप्रवृत्त्यातिमालं
चित्रगुरित्यादावगतेश्चेत्यलं। नन्वेवं तरप्तमपाविति। अत्र यद्वक्तव्यं तदुक्तं कर्मणि क्तांते इति। केचेत्त नः। राम॰ २३
केइति नृतौ या कर्मणीत्यतः कर्मणीति चानुवर्तत इति भावः। पदान्तरत्वाभावेन चेति। न च कुन्सेनेच सुपी। ।

त्यतः प्राक्कडाराधिकार इति स्वयमेव पदादिति सूत्रे स्थापितत्वेन गतिरनंतर इत्यस्य ततः परत्वेनाप्युक्तमिदमिति चे-
न्नेह नौ च शब्दः यतः पदादिस्थत्वमतः पदान्तरत्वाभाव इत्यर्थः। छंदोवद्वाकोपयग्रपादादिस्थत्वं तत्र पदान्तरत्वा-
भावस्यानुमानेन यत्रापदादिस्थत्वं तत्रानन्तरस्येति नान्यत्रातिप्रसंग इति भावः। इत्थमेव व्याख्येयं यथाश्रुते त्वसं-
गतिः स्पष्टैवेति बोध्यं। एवं चाभ्युदितमित्यस्य यदि पादादिस्थत्वं तदानंतरग्रहणस्य फलमिति तज्ज्ञापकत्वमि-
ति बोध्यं। यद्यपि भाष्येऽनंतरग्रहणमनर्थकं गतिर्गतावितिवचनादित्युक्तं तथापि तदेकदेश्युक्तमयुक्तमयुक्तेः।
अत एवाग्रे भवत्येषा परिभाषा कृद्ग्रहणे गतिकारकपूर्वस्यापीति। यदयमनंतरग्रहणं करोतीत्युपसंहृत-
मिति तेन तदधिकारबाध उचित इति बोध्यं। ननु तत्प्रामाण्यात्तदनधिकार एवास्तु। एवं च नाभ्युदितमि-
त्यनंतरग्रहणस्य फलं ज्ञापकपरभाष्यं त्वन्यथा योजनीयमित्याह। न चेत्यादि। अयं भावः। बहुव्रीहौ-
प्रकृत्येत्यतः पूर्वपदग्रहणमत्रानुवर्तते। उत्तरत्रानुवृत्त्यर्थमन्यथा मद्रकृत्स्नुत्यापत्तिः। एवं चाभ्युदितेति कृत-
शब्दस्याभिनाभासमासे प्राप्तस्य सतिशिष्टत्वात् थाथादिस्वरस्यापि बाधनार्थमनंतरस्योदो पूर्वपदत्वेपि॥ आ-
भ्युदितत्वायानंतरग्रहणं तत्परिभाषामंतरा न संभवतीति ज्ञापकमिति भाष्याशयः। एवं च भाष्ययोरैक्य-

शां·कौ मेवनैकदेशयुक्तित्वकल्पनमपीति। नन्वेवमभ्युद्धृतमित्यत्रैव दूरादागत इत्यत्रापि प्राप्नोति। न च कारकाद्दत्त।
२७ श्रुतयोरित्यत्र कारकादिति योगविभागेन कारकात्परं गतिपूर्वं पदं क्तान्तमन्तोदात्तमित्यर्थकेनादोष इति वा।
च्य एवं तर्हि कारकादेव परं गतिपूर्वपदं क्तान्तमन्तोदात्तमिति नियमार्थकयोगविभागेनैवाभ्युद्धृतमित्यादौ दोषा
भावादिस्वरामाभ्याकृद्गुत्तरमकृतिस्वरेणान्तोदात्तत्वसिद्धावनन्तरग्रहणस्य ज्ञापितत्वचारितार्थ्यात् भाष्यासंग
तेश्च। तस्मादुक्तन्यायाज्ज्ञापकपरं भाष्यं प्रामाण्याच्च पूर्वभाष्यस्यैकदेशयुक्तित्वेनाभ्युद्धृतमित्यादौ व्यवहित
निवृत्त्यर्थमेव अनन्तरग्रहणमिति ज्ञापकमेव। वस्तुतो भाष्येऽनन्तरग्रहणस्य प्रयोजनत्रयमुक्त्वा ज्ञापकार्थ।
मेवस्थापितं न तु प्रयोजनान्तरमपीति न तत्र व्यवहितनिवृत्त्यर्थं न तु गतिर्गतावितिपरत्वाद्बाधात्। नाप्यपूर्वप
दत्वेस्वरार्थं कारकादिति योगविभागेनैव सिद्धेः। तस्मात् ज्ञापकार्थमेवैतत्। तत्रान्यत्रैवात्रापि ज्ञापकत्वं किं तु बाध
कमात्रमिति लभ्यते इति बोध्यं। यत्रेति। ननु यत्र गतिकारकसमभिव्याहृतं कृदन्तं तत्र नहि विशिष्टस्यैव ग्रहणं इ राम·
देवदत्तेन कृतमित्यादौ कृतमित्यादेः प्रातिपदिकत्वं न स्यात्। समुदायस्य तत्त्वेपि समासग्रहणं कृतनियमेन। २७
परत्वाद्बाधात् अवयवस्य च कृदन्तत्वाभावादिति चेन्न। विधुदेश्यतावच्छेदकाक्रान्तस्य तस्य समभिव्याहारे

त्यर्थात्। अतएवगतिकारकोपपदानामित्यस्य सांकूटिनमिति फलमुक्तं भाष्ये। अन्यथाऽत्यंतस्वार्थिकत्वेनसु
बुत्पन्नः प्राक्प्रवृत्तावप्यनयापरिभाषयाविशिष्टादेवाणोसिद्धेोनदसंगतिस्स्यष्टैव। तत्रापिप्रातिपदिकाधिका
रेणवाक्यस्यांतत्वेनविशिष्टाद्दृश्यत्वाभावात्। परत्वादिति। उत्कृष्टत्वादपवादत्वादित्यर्थः। तत्रकौण्डिन्यत्या यादि
निभावस्त्रीप्रत्ययेचेतिनिषेधविषयेव्यावक्रोशीत्यादौचारितार्थ्येपितत्प्राप्तियोग्यतायास्तत्रापिसत्वात्। यद्य।
पिप्राचस्त्रियामित्यत्रतद्रादिनियमेनिषिद्धेसमुदायादेवभविष्यतीतिनास्यफलंतथापिअवयवात्तद्धित्तानुत्पन्न
यफलस्यसत्वादितिभावः। अन्यथेति अतएवभाष्येगतिकारकेत्युक्त्वाएवमप्यवयवादुत्पत्तिप्राप्नोतीत्याशंक्या
नयासमाहितं। नन्विति। तत्फलंतु अणिनियुक्तेइतिस्वरविधायकेअस्यानुपस्थित्याछत्रधारइत्यादौस्वरसिद्धिरि
तिबोध्यं। तेनेष्टकाचितमिति। इष्टकेषीकेतिसूत्रेउत्तरपदाधिकारेणपूर्वपदाक्षेपात्तदंतविधिरितिभावः। सचाव
श्यकोन्यथापक्वाश्वइष्टकाश्वचिनाश्चेतिसमाहारेपूर्वपदत्वाभावेपिह्रस्वापत्तेः। पक्वेष्टकाचितमितिचेष्यते
इतिभावः। एतेनतदाक्षेपेफलाभावादितिमंदः परास्तः। यत्तुपार्थवानितिआद्यंतवदितिसूत्रेभाष्येतत्प्रत्या
ख्यानायापिततलोकसिद्धन्यायमयोजनमित्यायजहारेत्यादिप्रदर्शितं। तत्रकैयटेनेत्थं वर्णितं। अर्थवान्

शां·के· दवयवएकोजिति। यद्यपितत्रभेदाभावादवयवत्वासंभवस्तथापिश्तन्मायवशाद्बोद्धुंतदस्तीतिइयायेत्यादौ॥
२५ एकाल्वोपपत्तिर्गौणी।अन्यपदार्थत्वेनविवक्षितेऽर्थस्योपादानंवर्तिपदार्थत्वेननत्यागःप्रतिलक्ष्यंलक्षणोपप्लु
वादनर्थकसमुदायविषयकऊर्णुनावेत्यादौनदोषस्तद्विषयकलक्षणांतरस्यकल्पनादितिकैयटादयः।मुख्य
व्यवहारत्वादित्ति। अयंभावः।एवंसतिइयायेतिन्यायप्रयोजनंभाष्योक्तंविरुद्धंस्यात्।एकपदाऽऽगित्यादावि
वार्थविशिष्टधातोरन्यपदार्थतयाइकारादेर्वर्णस्यतदवयवतयाचमुख्यव्यवहारस्यैवसत्वात्।नचभाष्येव्यव
हारस्येयायेत्यादौउकरीत्यासंभवेनसकृत्तोनाशिश्रियत् इतिवाच्यं।द्वित्वविधावर्थविशिष्टस्यान्यपदार्थत्वेनैका
व ५ च्त्वमितिबहुव्रीहावनर्थकेऊर्णुनावेत्यादावगत्यातत्रप्रथमत्वस्याप्यतिदेशेनैववाच्यतयाचार्धजरतीयस्यानौचि
त्यादित्यादिनतत्रमुख्यव्यवहारमौद्रियदितिवोध्यं।एकपदाऽऽगित्यत्रहिन्यायस्यास्यालौकिकसिद्धत्वप्रति
पादनावसरेयद्वर्णसमुदायःपदंपदसमुदायश्चवाक्यइत्युच्यतेएकस्मिन्नपितत्प्रयुज्यतेएकपदाऽऽगित्युक्ता
अर्थवत्प्रयुक्तोऽव्यपदेश्यःपदंनामार्थःनामइतिप्रातिपदिकार्थश्चान्यपदार्थइतिमुख्यएवव्यवहारइत्युक्तापुत्र राम
तिदृष्टान्तेनन्यायःसाधितोभाष्ये।तत्रान्यकैयटोक्तप्रकारस्तुनयुक्तइति।स्वयंभाष्यार्थमाह।कृत्वेरिति।असहा २५

निर्दिश्यमानधर्मवत्त्वसमभिव्याहारे त्वर्थः। ननु घटादिशब्देऽपि जराशब्दत्वातिदेशस्स्यात्। व्यपदेशहेत्वभावेना
विद्यमानव्यपदेशेन चेयायेत्यादाविव न्यायप्रवृत्तिरिति चेन्न। स्वस्वजातीयावधिव्यवहारस्य भेदनिबंधनस्य
चानेनातिदेशात्। अतएव दृष्टांतद्वयोपन्यासः। अस्ति चेयायेत्यादौ एकाच्त्वावयवावयवित्वस्य प्रथमत्वे सजा
तीयनिष्ठधर्मस्य चातिदेशः। साजात्यं च तत्तद्विधिविधेयकार्यनिरूपितोद्देश्यतावच्छेदकधर्माक्रांतसमुदायघ
टकत्वरूपमिति बोध्यं। नन्वेवमपि स्वस्मिन्स्वाव्यवहितपूर्वत्वस्यातिदेशः प्राप्नोति ततश्च दधिमधु इत्यादौ यणा
दिः स्यादिति चेन्न। तत्तद्विधौ तेन तन्निमित्तोपादानवैयर्थ्येन तदनतिदेशादिति दिक्। ननु वांतो यीत्यादाविति। नन्वं
तरेणापि परिभाषासामर्थ्यात्तदादेर्लाभः। अन्यथा तदंतविधौ यांते इत्यर्थोपत्त्या सूत्रानर्थक्यं स्यादेवेति चेन्न। ग
व्यितानाव्यितेत्यादौ अल्लोपे कृते यांतप्रत्ययसंभवात्। न चाल्लोपस्य स्थानिवत्त्वं नकारेपरे कुत्वविधानेन नश्रोता।
व्यवधानस्यैव यांते वांतविधानेनापि श्रौतयांतत्वस्य विवक्षणात्। न पदांतेति निषेधस्तु ननः क्येइति नियमेनाप
दत्वात्। आदेशस्य परपदस्यत्वाभावाच्च। किंच गोमयमत्तनीति गोमयान् क्विप् तमाचष्टे णिच् टिलोपे ज्यल्लादे
शत्वेन स्थानिवत्त्वाभावेन प्रत्ययस्य यांतत्वापत्तेः अतएवाह। यस्मिन्विधिरिति। सप्तम्यंतपदार्थैकस्य स्वत्वं।

प्रां·कु· त्रस्य सर्वनाम्नो निर्देशः। सति सप्तमीनन्वधिकरणे औपश्लेषिके वांतो यीत्यादौ तत्संभवेपि नेड्वशीत्यादौ तदभा
२६ वात्। यद्यपि तस्मिन्निति वद्यस्मिन्नित्यस्यापि सप्तम्यंतार्थे इत्यर्थस्तु वचनस्तथापि इतिशब्दाभावेनासाध्वेति व
स्य मारणविरोधेनाल्ग्रहणे इत्यनेनान्वयेन न तथा नाश्रितः अल्ग्रहणे इत्यस्य हि अधिकरणे स्पष्टमुच्चा
रणे इति नार्थः प्रत्याहाराग्रहणे तस्मान्नुड्चीत्यादौ दोषापत्तेः। इकोचि व्यंजने मा भूदित्यत्र व्यंजनादावितिव्या
ख्यानपरभाष्यविरोधापत्तेश्च। किंतु बाहुलकात् कर्मणि ल्युट् अलः प्रतिपादकशब्दे सतीत्यर्थः। तदादाविन्यत्र।
तच्छब्देन सप्तम्यंतार्थः परामर्शनीयः। एवं च सप्तम्यंतेन विशेषणीभूतेऽल्प्रतिपादकशब्दे सति यद्विधानं तत्तदादौ वो
ध्यमित्यर्थः फलितः इति वोध्यं। घञजपः पुंसीत्युक्तेरपवादइयमित्युक्तं। वचनेन निर्वृत्ता वाचनिकी। इयं चेति। न।
त्वार्थे धातुकस्येड्वलीत्युक्तौ सामानाधिकरण्याभावाद्यस्मिन्निति परिभाषाया अप्रवृत्तौ तस्मिन्निति परिभाषाप्र
वृत्त्या वलस्य रक्षार्थं धातुकस्येडित्यर्थे भविष्यतीत्यादावेव प्राप्नोति न तु भवितेत्यादावपीति नेड्वशीत्यादिनिषेधस्तु
सुषामो देवदत्त इत्यादौ चरितार्थः। एवं चादिग्रहणं सफलमिति चेन्न। बहुलस्य संस्कारानुरोधेन तस्मान्नुड्ची राम·
त्यादाव चोत्यस्यैव वलीति सप्तम्याः षष्ठ्यर्थत्वांगीकारेण तस्मिन्नित्यस्याप्रवृत्त्या सामानाधिकरण्यस्यापि स। २६

त्वेन परिभाषाप्रवृत्तेर्निर्विघ्नत्वादित्याशयात्। नेनड्ःसीति। ननु तदंतविध्यभावाय पदस्येत्यस्य वैयधिकरण्यस्या
वश्यकत्वेन सामानाधिकरण्याभावादेव न तदादिविधिरत एव शेखरे पदावयवस्येत्यर्थ इति व्याख्यातं। अ
न्यथा नेन न तदभावेपि तदंतविधिर्दुर्वारः स्यादिति चेद्यथभावः पदस्येत्यधिकारेपि श्रुतत्वाड्ङकारेणाविशिष्यंते
। नतत्र न तदादिविधौ षष्ठ्यंतसंनद्र्यात्याज्यवकाशत्वेपि तदंतविधौ शास्त्रबोधिताज व्यवहितहलसमुदायस्य सुड्डि
यामित्यादिनिर्देशेन साधुत्वबोधनेन सकारस्य संयोगांतलोपे न चङकाराव्यवहितपरोयः सकारस्तदंतस्य पद।
स्येत्यर्थे सूत्रस्याचारितार्थ्येन संयोगांतलोपबाधापेक्षयाल्पप्रवृत्तस्य श्रुतान्वयस्य बाधापेक्षया च मातुपधायाइत्यादे
स्वीकृतपदस्येत्यस्यावयवषष्ठ्यंतस्यैव सामर्थ्यात्स्वीकार इत्यभिप्रेत्यैव शेखरे न था व्याख्यातमिति बोध्यं। के
चित्तु चिंत्यमिदं। लक्ष्यानुरोधेन शास्त्रप्रत्याख्यानस्याचमत्कारावहत्वेनादिग्रहणस्यावश्यकत्वात्। ननान्य
र्थकमेव तदादिग्रहणमित्यस्य वक्तुं शक्यत्वात्। ड्ःसोधुडिति न्यासेन न तत्र दोषाच्च। यथान्यासेपि अंतेरंङ्गा
विबाहृ श्वेदादावेव वक्तुं तो नहि तिन्यायेनानंतरो लक्ष्यानुरोधस्यावश्यकत्वेनादावेव तत्स्वीकारे दोषाच्च। नो
पसहस्रमिति चीन्यादावेकदेशान्वयात्क्लेशस्याप्यनावश्यकत्वाच्च। न च न कारा। । । । । । ।

शं·क व्यवहितपरकेऽवृत्त्यादेः परस्य बलाद्यार्धधातुकस्येडित्याद्यर्थेन नैकदेशान्वय इति बोध्यं। एवं हि सति वांतो यीत्या
२ दाववप्लुतरीत्याथकाराव्यवहितपरकयोरोदौतोः वांतादेशः व्यवहितप्रत्यये परे इत्यर्थे थ्यो द्यादि प्रत्ययलाभे
परिभाषोच्छेदापत्तेः। माचां ह लादाविन्यादिग्रहणेन परिभाषानित्यत्वलाभेन ङःसीन्यादावदोषाच्चा एवमप्येक
देशान्वयाकरणेन लाघवमनरा बहुस्थल्यमिति सूत्रस्थं भाष्यमपि स्वरसतः संगच्छत इत्याहुः। ननु क्षियइतीति क्षि
यो दीर्घादिति नत्वविधायके शास्त्र इत्यर्थः। ननु क्षिय इति दीर्घविधायके निष्ठायामण्यदर्थे इति दीर्घविधायके च
तत्र दीर्घोनानुकरणस्याप्रयोजकत्वेनाचक्षियनुरित्यादौ अजादौ यदृपंतस्यक्त्वे नेयङः कस्यानुकरणत्वात्। ह्रस्वा
न्तस्य तु नानुकरणं। विपराभ्यां जेरित्यादाविव परत्वादियङ् बाधित्वा गुणः स्यात्। न च नत्वविधावपि तथैवास्तु अ
त एव दीर्घादिति सार्थकमन्यथा दीर्घान्तस्यैवानुकरणे तद्वैयर्थ्यमेवेति। अत एव तत्र शेखरे सुक्त्वे नेयङः कस्यानु
करणाद्दीर्घग्रहणमन्यथानिर्देशेनैव सिद्धमित्युक्तमिति वाच्यं। दीर्घादित्यस्यासत्त्वे हि तत्र दीर्घानानुकरणं न दभा राम
विक्त्वे नेयङः कस्यानुकरणमिति संभाव्येत। तेन हि दीर्घानानुकरणस्यैव बोधनादित्याशयात्॥ अतो न शेखरवि २१
रोधो। तत एवाह ज्ञापक इति। ननु नत्वविधायके क्षियइति इयङ् निर्देशोऽपन्नाक इत्यर्थः। एतेनात्रापि क्त्वेनेयङः कस्या

नुकरणात्कथं ज्ञापकमित्यपास्तं। नन्वेवमाविति। यथोद्देशेतु नैतदुपयोगः। तत्र भविष्यतीति किंचिदनेन
प्रयोजननिमित्तेत्या येन नित्यमप्येकादेशम्बाधित्वा परनिमित्तकत्वेनांतरंगत्वात्परत्वे एकादेशोपि आनुमानिक
स्थानिवत्वेन तस्य सौलभ्यात्। अत एव हेरामेत्यादौ परत्वसिद्धिः। अन्यथा नित्यत्वात्सुलोपे सुबंतत्वस्याशास्त्रीय
त्वेन विशेषणतया ऽलाश्रयणेन च स्थानिवत्वाप्रवृत्त्या तन्न स्यात्। तत्र सुविभक्तपरिमाणग्रहणे नन्यायाप्रवृत्तेः
निरपि पाठस्तु युक्त एवातः तत्र सामान्यतस्तदसिद्धिर्नोक्ता। कार्यकाले तु सुबंतत्वस्याशास्त्रीयत्वेन औ इति सुत्वस्य
स्थानिसंबंध्यलधर्मत्वेन च स्थानिवत्वाप्रवृत्त्या तदसिद्धिरेव। यद्यपि आकडाराधिकारस्य भपदसंज्ञादिविषये।
यथोद्देश एवेत्युक्तं तथापि तत्संज्ञाद्वयप्रसक्तावेव तत्रैवातिप्रसंगात्। प्रकारांतरमपि तत्रैव निरूपितं। वस्तुतस्तु इदं
सर्वं प्राचीनरीत्या। स्वमते उभयत आश्रयणेपि तत्स्वीकारेणाभीयादित्यत्राव्ययपवर्गाभावेनोपसर्गात्परत्वस्यैणा
ऽभावेन दोषाभावेपि प्रकृते यस्माद्विहितस्तदादितदंतत्वस्य तेन लोपेन पदत्वासत्तेः। भाष्ये उभयत आश्रय
णेनानादिवदित्युक्तेस्तु एकदेशिनः निस्पृहेश्वरादौ। स्वमते अवतरणं तु चिकीर्षतीति विद्वत्सतीत्यादौ उ
रदत्वे हलादिः शेषः सन्यत इतीत्वं च न स्यात् द्विरुक्तधातुपूर्वभागत्वाभावेन पुनरभ्यासत्वाप्रवृत्तेः। ४।

अशास्त्रीयत्वेनस्थानिवत्त्वाप्रवृत्तेरितिबोध्यं।शुद्धोदकमित्यत्रानेनडकारांतेपूर्वपदत्वेनएकादेशविशिष्टेउदक
शब्दत्वेनोदकेकेवलेइतिस्वरसिद्धिर्नास्यफलं।उपसर्गस्येतिलत्वेप्लायतेइत्यत्राचःपरस्मिन्नितिस्थानिवत्त्वेव
त्रापिव्यपवर्गस्यसुलभत्वात्।अजीगणदित्यत्रईचगणइत्यपिनासाधारणंतत्रैतत्सामर्थ्येनापिइत्वंफलभ
मितिबोध्यं।अर्थस्यायमार्थः समाजस्समुदायस्तेनग्रसंग्रथितं अर्थसंबंधिसमुदायांतर्भूतमित्यर्थः।अर्थवत्त्वव्यव
हारःअर्थवत्त्वप्रयोजकोव्यवहारइत्यर्थः।अनुकरणमिति।अष्टाध्याय्यांतातदाव्यच्छब्दस्यादर्शनादितिभावः।ए
कदेशविकृतन्यायेनदीव्यतिशब्दैकदेशस्यतदर्थबोधकस्यदीव्यच्छब्दस्योच्चारणमित्यर्थः। यथाश्वनंतुनसाधु॥
अनुकरणस्यशब्दपरत्वेनार्थस्यावधित्वंनस्यात्इतिस्पष्टमुद्योते।किमर्थमिदमि— तीति।एवंहिलाघवात्प्राग्दीव्य
तेरणइतिवक्तव्येनत त्यक्त्वाप्राग्दीव्यतइतिनिर्देशःकिमर्थइत्यर्थः।ननुमास्तुसूत्रेऽनुकरणतानातस्यैवावधि
त्वमस्त्वितिचेन्न।अवध्यवधिमतोःसाजात्यमितिनियमादर्थस्यइष्टमवधित्वंनस्यात्।तथाचातइञित्यत्राणिओः
पर्यायेणविधानंस्यादित्याशयात्।अनेनैकदेशविकृतोप्यर्थबोधकएवेतिसूचितमितिबोध्यं।विकृतावयवेति।अ
तएवमघवतःराजकीयमित्यादौसंप्रसारणाल्लोपेन।अन्यथानेनन्यायेनानंतत्वात्।श्वयुवेतिसंप्रसारणंस्या

रान्तः कचेति का देशेप्यनंतत्वाद्दल्लोपो नद्वीति स्यात्। मघवतश्छांदसत्वेनानद्धत्यपकर्षे लोपफलाभावेन च तत्र न दोष इ
त्यन्ये।अक्तपरिमाणइति।लोकेदृष्टस्यपरिमाणत्वस्यात्रासंभवाच्छब्दानुपूर्वीविशेषरूपंगृह्यते।उक्तयुक्तेरिति।
यथालोकेपंचद्रोणादिशब्दानांपरिमाणार्थवाचकानांन्यूनाधिकयोः प्रवृत्तिस्तेषांपरिच्छिन्नपरिमाणार्थकत्वाद्दु
रुपपादा।एवंसर्वाद्यानुपूर्वीविशेषोपादानेनक्रियमाणसर्वनामसंज्ञान्यूनेधिकेवासर्वकारीयत्नंविनादुरुपपा
दाइत्युक्तयुक्तेरित्यर्थः। नन्वेवमंतादिवच्चेत्येतत्प्रयोजनेगुडोदकमित्यादावुदकेकेवलेइतिपूर्वपदांतोदात्तत्वम
नेनदकशब्दस्योदकशब्दत्वमाश्रित्यसाधितंभाष्योक्तंविरुध्येत।तत्रोदकइत्युक्तपरिमाणग्रहणान्मागदीप्यत
इत्युक्तपरिमाणग्रहणेनैतज्ज्ञापकपरंभाष्यंचविरुध्येत।भाष्यांतरंचनादृशंनोपलभ्यतएवेत्यतआह।।एत
दिति।नत्रहिपंचद्रोणादिदृष्टान्तेनउक्तस्थलेतदभावमाशंक्यज्ञापकेनतदेकदेशभूतइतिन्यायेनसमाहितायदि
तत्रैतन्नप्रवृत्तिस्तर्हि अधिकगड्वादिसत्वेपिशुनश्वत्ववदकजधिकस्यसर्वकस्यसर्वशब्दत्वमसतमेवेतिभाष्यासंग
तिरलसंख्यानदाकृतमितिभावः।एतेनानेनन्यायेनपूर्वपदत्वंभाष्याभिप्रेतंनतूदकशब्दत्वमितिनत्तहिरोधइत्य
पास्तं।अन्तादिवच्चेत्यत्रपूर्वांतवत्वेएतत्प्रयोजनस्योक्तत्वेनतदभिप्रेतत्वस्यसुमेरुशृङ्गीढत्वात्।उकारांतत्वेपूर्व

शां.क. पदत्वेउकारस्यैतदापत्याफलभेदापत्तेश्चपरत्वादुदात्तत्वेएकादेशेनतत्सिद्धेस्तदुनरभाष्येएवस्पष्टत्वेननसैकदे।
२९ श्युक्तित्वाच्च।अतएवतत्त्र्यायाश्रयणं।अन्यथानेनैवगतार्थत्वात्तदनर्थकमेवस्यात्।यदागमाइतितुनगतार्थोआ
गमस्याविकारत्वात्।अतएवलोपागमवर्णविकारज्ञोहीतिभाष्येआगमस्यविकारात्स्थयुक्तिः।घुसंज्ञायायुक्तपरि
माणत्वाच्च।एवंचयेनविधिरितिसूत्रभाष्यविरोधेनोदकेकेवलेइतिसूत्रभाष्यमेकदेश्युक्तंज्ञापनपरंभाष्यंतन्न्या
येनदीव्यतीत्येनतत्त्वरूपालाभेपिदेवनकर्तृरूपार्थलाभेनसुयोजमितिवोध्यं।उच्चंस्वलास्तुयेनविधिरितिसूत्रभा
ष्यमेकदेश्युक्तिरेवोक्तहेतोः।अंगसंज्ञासूत्रे अंगसंज्ञायाअप्युक्तपरिमाणत्वस्यभाष्येउक्तत्वेना चः परेतिसूत्रेश्रा
यसावित्यत्रानेनांगत्वातिदेशकरणेतद्विरोधाच्च लोकन्यायेनैवसिद्धेज्ञापकानुधावनपरभाष्यविरोधाच्च।
तदेकदेशभूतमितिन्यायेनलोकेआगमस्यापिविकारव्यवहारसत्वाद्यदागमाइतिन्यायोपिमास्तु।अनेनैवगतार्थ
त्वादित्यपरमनुकूलमित्याहुः।विकृतानलरूपेति।तेनयशश्शब्दाशिणचिटिलोपेअनेनासंततत्व लाभेनस्थानि
निवत्वेननतत्त्वमाश्रित्यास्मा यामेधास्रजेविनिरितिविनिसिद्धिः।आभीयादितीति।अन्नत्यंतत्वंसर्वमदादिप्रकर राम.
णेशेखरेस्पष्टं।नन्वेवंभिंधीत्यत्रेति।नन्विदमनुपपन्नंतदभावेहेतोरनुक्तत्वात्पूर्वंसकृद्धतिन्यायोपन्या।। २९

मस्यैवप्रसक्तत्वात्। किंचनानङ्भावपक्षे भिन्धीत्यत्रधिभावस्य स्थानिवत्सूत्रे भाष्ये साधितस्यासंगतिस्तत्र ध्यादेशेपिता
तङ्प्रवृत्तेनतदसंगतिरेव। किंचनानङ्धिभावयोर्यौगपद्यासंभवेन परत्वानानङपिनानङ्धिभावयोर्यौगपद्या-
संभवेन को विरोध इतिचेत्। अयंभावः। विप्रतिषेधसूत्रस्य नियमार्थत्वे वृक्षेभ्य इत्यादौ स्वौयस्त्रीयोद्देश्यतावच्छे-
दकाक्रान्तायाः सुपि च बहुवचने झलीत्यनयोः प्राप्तयोः पर्यायतया विप्रतिषेधे परमित्यनेन न पूर्वशास्त्रस्य झला-
दिबहुवचनविषयेविषयत्वेनाभावो बोध्यते। अन्यथा शास्त्रद्वयप्रामाण्याद्विकल्पापत्तिः। ईयतुरित्यादावपि द्वि-
त्वसंप्रसारणयोः प्राप्तयोः परं संप्रसारणं भवतीत्यनेनौपदेशिकयजादिधातोः द्वित्वाविषयत्वं बोध्यते। तिसृणा-
मित्यत्रापि स्त्र्यर्थकत्रिशब्दस्य त्रयादेशाविषयत्वं। एवं चानायासेनैव सकृद्गतिन्यायः सिद्धः। तेनाशीरर्थस्य हे-
र्द्धेविषयत्वेन भिंतादित्यत्र तातङा बाधितो धिः॥ भिंधीत्यत्र तद्भावेन स्यादिति। एवं च पुनः प्रसंगन्यायेन तत्प्राप्त-
तात्पर्यसंकोचस्याभावो बोध्यत इति यत्तल्लभ्योयं। तेन पूर्वं तदनुक्तावपि न क्षतिरिति सूचितं। न चैवं भिंतादित्य-
त्रापि ध्यादेशापत्तिस्तद्विषयकनानङ्शास्त्रोपप्लवानर्थक्यापत्तेः तेन तद्विषये सकृद्गतिन्यायस्य बलस्यानुसा-
रादाश्रयणत इति सूचितं। विकल्पस्याभावांशेपि तात्पर्यसत्वे नोभयलक्ष्यकत्वादिसुद्धोषस्याप्युक्तमेव बीजं॥

शा·कौ· ३०

मन्यथा विभाषा श्वेरित्यत्र भावाभावाभ्यां संप्रसारणस्य पाक्षिकत्वे लब्धे नवेति विभाषेति सूत्रस्य लक्ष्यानुरोधमंगीकृ
त्य मतद्वयव्याख्यानासंगतेः। मम तु वचिस्वपीत्यस्य शुशुवुरित्यादौ चारितार्थ्येन विभाषा श्वेरित्यस्य शश्वावेत्यादौ चारितार्थ्येपि
उभाभ्यां सूत्राभ्यां लिट्यनंतरे किन्त्यनंतरे संप्रसारणं साधित्यर्थकाभ्यां संप्रसारणस्यैव विधाने न विरोधाभावान्नियमार्थक
विप्रतिषेधसूत्राभ्यामकृत्या चारितार्थ्यात्। अत एवाग्रे वक्ष्यति एतन्नियमवशादेव तत्तल्लक्ष्यविषयकपूर्वशास्त्रानुपपन्नवर
वेति। कैयटोक्तप्रकारस्तु न युक्त इति स्पष्टं गदायां। द्वयोः कार्ययोरिति। नावश्यं द्विकार्ययोग एव विप्रतिषेधः किन्तर्हि अ
संभवोपीति भाष्ये द्विकार्ययोगत्वाभावे केवलेप्यसंभव इति हितेनोक्तं। तथा सुपि च बहुवचने झल्येदित्यनयोः वृक्षे
भ्य इत्यादौ युगपदसंभवः यञादिसुप्यनंतरे दीर्घः साधुः। झलादिबहुवचनान्तरे एकारः साधुर्भवतीत्यर्थात्। यद्य
पि विधेयानिपात्यात्तद्विशेषणत्वं तु रूपपरं। एवं च सुप्यनंतरस्यादंतस्य दीर्घ इत्याद्यर्थे युगपत्संभवेन नास्ति विरो
ध इति शक्यते वक्तुं तथापि प्राञ्चो नानिमत्त्वाद्व्याकरणस्य साध्वनुशासनतया साधुत्वस्यैव विधेयत्वेनैवमेवोचि
तमिति स्पष्टमिको गुणेत्यत्र विवरणे। शिष्टादित्यत्राप्येवमेव। यद्यपि तत्रादेशात्पूर्वं तदुत्तरं वा स्थानिवत्त्वाद्दिस्यैव तन् राम· ३०
न्निमितानन्तर्येण तथापि तन्मते वृत्त्यवच्छेदकेकाले विरोधोस्त्येवेति वोध्यं। अत्रेदं वोध्यं। अन्यतरस्यां सुनिमित्ता। ।

नंतर्यसत्वेऽन्तरङ्गसत्वे नास्ति विप्रतिषेधः। यथा राजेत्यादौ दीर्घस्येतन्निमित्तनासत्वेपि हलङ्यादिलोपस्य तत्सत्वे
नविप्रतिषेधः किंतु प्रतिपदोक्तत्वाद्दीर्घ एवेति स्पष्टं शब्देन्दुशेखरे। यत्राप्येकमेवकार्यं सुभ्याम्यामपि बोध्यं तेन तत्रापि
विरोधाभावान्न विप्रतिषेध इति स्पष्टं संबुद्धौ शाकल्यस्येति सूत्रे शब्देन्दुशेखरे। यथानंतरे नामि यञादौ सुपि च दीर्घः॥ साधु
भवतीत्यर्थकयोः सुपि च नामीत्यनयोः रामाणामित्यत्र प्रवृत्तयो नीस्ति विरोध इति तत्रैव शेखरे स्पष्टं। विप्रतिषेधश
ब्दस्य विरोधार्थकत्वात्। परस्परलब्धावकाशयोरिति फलितार्थपरं। अन्यतरानवकाशत्वेऽपवादत्वापत्तेः। एवं भि
धीत्यत्रेति भिनद्धि इत्यत्रेत्यर्थः। भिंतादिति लक्ष्य इति यावत्। यथाश्रुतेन त्वसंगतिः स्पष्टैवेति बोध्यं। राधनेड्न्यादावि
ति। आर्धधातुके नियमस्य चानशि विकरणस्य च चारितार्थ्येन परत्वमिति भावः। ननु परत्वादित्ययुक्तं। कृताकृत
प्रसंगित्वेन विकरणानां नित्यत्वादिति चेन्न। अनुदात्तङित इत्यादीनामिदानीं नियमार्थत्वेन एधतेरित्यादावनुपपत्त्य
भावेपि एधनीत्यादि निवृत्तिमात्रफलकत्वे न तत्र च नियमशास्त्रप्रवृत्तौ तद्रूपस्यैवाभावेन विकरणप्राप्त्या कृताकृ
तप्रसंगत्वाभावात्। तङ्विधानमिति। ननु ज्ञापितेप्यचारितार्थ्यमेव विकरणात्प्रागेव नियमप्रवृत्त्यात दानीं स्वप
रत्वाभावेन नियमे वाधायोगात्। न च तदुतरस्य परत्वसंभवे न परिभाषामात्रे बोधनन चारितार्थ्येन। ११

सामर्थ्याभावेपितत्र कौंडिन्यन्यायेनापवादस्योपजनिष्यमाणत्वेनतद्वाधेपूर्वं विकरणेपुनः प्राप्तस्यनियमस्य
बाधनेनचरितार्थं नदितिवाच्यं।तत्रकौंडिन्यन्यायेनबाधितस्योत्सर्गस्यपुनरप्रवृत्तौसामान्यशास्त्रेणोभय
सिद्ध्यापुनरपिवैयर्थ्यस्यतदवस्थत्वात्।अतएवेदृशेविषयेप्रथमयोः पूर्वसवर्णइतिसूत्रस्यकैयटोक्तरी
त्यान्यायानाश्रयणमतएवस्यूनासिभ्यांतिवादिबाधोनएवंचकथंचारितार्थ्यमतआह। विषयसप्तमीति।
एवंचनियमबाधनेनचारितार्थ्यंस्पष्टमितिभावः।विषयसप्तमीत्वस्वीकारेगौरवमत्रपक्षेऽतोलाघवादाह।वि
करणाव्यवधानेपीति।एवंनित्यांतरंगयोरिति।अनयोःपरापेक्षयाबलवत्त्वमपियौगपद्यासंभवएवबोध्य।
मित्यर्थः।विप्रतिषेधसूत्रेणपरस्यतत्रैवबलवत्त्वबोधनेनतत्रानयोरर्थाद्यौगपद्यासंभवोस्त्येवेतिभावः।अ
नयोःपरस्परबाधकत्वेइत्यर्थेइतितुनयुक्तंमानाभावात्। धनंवनमित्यत्रार्थवत्सद्भावेऽतरंगत्वादवयवा
नांप्रातिपदिकत्वेसुपिचकृतेसमुदायस्यप्रातिपदिकत्वात्तदवयवत्वेनसुपोलुगितिनतत्रसुपः श्रवणमि
त्यर्थवत्सूत्रस्यशब्दरत्नविरोधाच्चेतिदिक्।असिद्धंबहिरंगमंतरंगे। अंतः शब्दार्थमाह। मध्यइति। अधि
करणशक्तिप्रधानस्याप्यंतः शब्दस्यबहिः शब्दस्यचशक्तिमत्परत्वेनभूतशब्देनगतिसंज्ञस्यतस्य।।

समासेनांतर्भूतशब्देनवाबहुव्रीहिः।तत्रमध्यमत्वस्यसापेक्षत्वादाह।बहिरंगेति।निमित्तसमुदायेत्यध्याहारल
भ्यां।एवंचयदीयनिमित्तसमुदायांतर्भूतं।तांगकंशास्त्रंतदंतरंगं।एवंयदीयनिमित्तसमुदायाद्बहिर्भूतंतांगकंशा
स्त्रंतद्बहिरंगमितिवाच्योर्थइतिनान्योन्याश्रयः।मूलंतुफलितार्थपरमितिबोध्यं। अतएवेति।अंतरंगत्वात्त्र
यादेशेतस्यस्थानिवत्वात्त्रिशब्दत्वेनतिस्रादेशप्राप्तावपितनोपिपूर्ववदंतरंगत्वान्नुटिदीर्घेचलक्ष्येलक्षण।
स्येतिन्यायेनतिस्रादेशेपिदीर्घोमाप्त्यानिषेधवैयर्थ्यंस्पष्टमेवेत्यर्थः।एतेनस्थानिवत्वात्तिस्रादेशेपिअंतरंग।
दीर्घेतस्यासिद्धत्वेननतद्वैयर्थ्यमित्यपास्तं।असिद्धत्वस्याहार्यारोपबोधकत्वेनकार्यस्यस्थानिबुध्यादेशप्रवृ।
त्तामिषेधस्योज्जीवनात्।विकारकृतलक्ष्यभेदस्यानाश्रयणस्यान्यत्रप्रपंचितत्वादितिबोध्यं।अपरनिमि
त्तकत्वेनेति।अतएवपचावेदमित्यादौएत्वंन।चुंचुप्रणपोस्त्विदंइतीत्वंचनेतिभावः।इदमंतरंगत्वंचनापूर्वंतदी
यनिमित्तानांतर्भूतत्वनिमित्तत्वेनतत्वंबोध्यं।अतएवहेज्ञानेत्यादौनित्यत्वात्पूर्वंरूपेकृतेलोपसिद्धिरन्यथापरनिमि
त्तत्वेनांतरंगत्वाल्लोपेऽ तोगुणइतिपररूपेतत्सिद्धेर्भाष्योक्तव्यधिकरणान्वयस्यतत्रत्यशेखरस्यचासंगतिः।
एतएडइत्यत्रतदादेरित्युपस्थितावपितदीयनिमित्तांतर्भूतत्वेनतत्वमक्षतं।संबुद्धौपरत्वाद्गुणोभवतीत्युक्ते।।

शां·क· कस्मादितिनियताकांक्षायास्तुपस्थितत्वांदंगादित्यस्यावधित्वेनान्वयेनसप्तम्यंतपंचम्यंतयोरपिनिमित्तत्वसत्वा
३२ त्।हरेविह्नोइत्येतदवतरणोक्तशेखरविरोधोपीतिध्येयं।अपरेतुतत्सूत्रस्यानित्यत्वसूत्रस्थभाष्यप्रामाण्यादुद्धरणेग्र
हणेपितत्प्रवृत्तेरंगीकारात्लाक्षणिकत्वादेवपचावेदमित्यादावदोषः।षःप्रत्ययस्यतुइडित्येकयोगएवकर्तव्येष्ट
प्र गकरणेनउत्तरस्यक्वाचित्कत्वबोधनेनचकारस्यप्रत्ययादित्वभावायप्रश्लिष्टयकारवैयर्थ्येनत्वंत्तुवादावप्य
दोषेणानेदृशांतरंगत्वस्यफलंभवतीत्याहुः।तस्माहिसत्यांवहिरंगसंप्रसारणस्यासिद्धत्वाह्वःलघूपधगुणोनस्या
दिति॥नन्वतएववहिरंगत्वदुरुपपादं।संज्ञाकृतत्वस्यैकैयदोक्तस्यानुपदंसूचितत्वेनभसंज्ञायावृषस्वस स्व
योरित्यादौशसाद्यनपेक्षत्वेनाश्रितत्रस्यशाब्देऽन्वयाभावस्यस्वयंसिद्धांतितत्वेनचपरस्यशानिमित्तत्वाश्रयणेमाना
भावस्यानुपदोक्तत्वेनचभपदसंज्ञाविषययथोरेशस्यैवाश्रयणेनचायुक्तमेतदितिचेन्न।भाष्येएकदेशस्यत्वो
क्त्यासंज्ञापरिभाषयोरैक्यस्यान्यत्रस्पष्टतयैकवाक्यत्वलाभेनवहिर्हृतशसादिनिमित्तत्वेनतत्वस्यसुलभत्वात्।५
स्थलविशेषभाष्यप्रामाण्येनपरस्यशानिमित्तत्वांगीकारात्।अतएवपदद्वयनिमित्तकसमासनिमित्तत्वेनलुको शम·
वहिरंगत्वमित्यंतरंगानपीतिज्ञापनपरसकलभाष्यादिसंगतिः।अतएवाभ्यासनिमित्तनिमित्तत्वेनह्रस्वस्य। ३२

वहिरंगत्वमितिह्रस्वइतिसूत्रेभाष्ये।इयङुवंङोश्चवहिरंगत्वमितिवारणादंगमितिज्ञापनपरदाश्वानितिसूत्रेचभा।
ष्येस्पष्टं।एतेनानेनसंज्ञाकृतंतत्वंसूचितमित्यपास्तं।त्वदीयकैयटोक्तरीत्यागुणस्यैववहिरंगत्वेनएवमप्यनुपपत्तेश्च
।नचैवमपिपरनिमित्तत्वस्यउभयत्रतुल्यत्वेनकथंतत्वंसंप्रसारणीयनिमित्तानंतर्भूतनिमित्तत्वस्यगुणेसत्वात्मचा
वेदमित्यादौनुप्रत्ययग्रहणेनोपस्थिततदादेःपरस्यविधीयमानस्येत्वस्यगुणीयमदद्वयनिमित्तान्तर्भूतनिमित्तक
त्वसत्वेननदोषइतिवाच्यं।भसंज्ञकांगानयवस्यनिर्दिश्यमानवाहावनस्ययणः संप्रसारणमित्यर्थस्यविशा।
ह्यवयवयणलब्धात्यर्थमावश्यकत्वेनांगत्वस्यचवाहांतसत्वेनगुणनिमित्तस्यतदंतर्भूतत्वेनतत्वमित्याश
यात्।नचैवषष्ठ्यंतस्यनिमित्तत्वांगीकारेप्रागुक्तयेनविधिरितिसूत्रभाष्यविरोधः।तत्रहिऊनशब्दमाश्रित्यगु
णइत्यंतरंगत्वाद्गुणएवस्यादित्युक्तं।त्वद्रीत्यागुणेपिइगंतांगस्यार्धधातुकस्यनिमित्तत्वेनोभयोःसमत्वान्नतद
संगतिरितिवाच्यं।अर्थवत्येवस्थान्यादेशविश्रांतिरितिसिद्धांतेनानुमानिकस्थान्यादेशभावस्यसतिसंभवेसर्वस।
त्वेनसिऊइत्यस्यौदंतादेशइत्यर्थलाभेनचतस्यकार्यितयानिमित्तत्वाभावादित्याशयात्।प्रकृतेनुनतथासूत्रेउच्चार्य
माणस्यवाहइत्यस्यार्थवत्वेनानुच्चारितांगस्यस्थानित्वकल्पनेमानाभावेनतस्योपसंजातमर्थ्यैवव्याख्यानस्योचितत्वेनका

॥ र्थित्वाभावात्। अतएवसन्यङ्ङोरित्यत्रसन्नंतस्योद्देश्यत्वेपिऊर्णुनविषतीत्यत्रनुशब्द
स्यैवद्वित्वरूपकार्यित्वेनेसोद्देत्वनिमित्तत्वंसिद्ध्यति। त्वेदुक्तरीत्याषस्यंतस्यकार्यिनयातद्वैद
कस्येसोनिमित्तत्वाभावेद्विर्वचनेचीन्येतदप्यत्रैतोतदसंगतिरित्यलंकृतबुद्धिना॥ इतिश्रीशां
करीटीकासमाप्ता॥ मितीजेष्ठसुक्ल ३ शनिवासरे सम्वत् १९५६ ॥ ॥ राम ॥ ॐ

अथाभावरहस्यग्रन्थस्यप्रारम्भः ॥

अ०
१

ॐ॥ विघ्नेश्वरं विघ्नविनाशनार्थं वाग्देवतां वाक्प्रवैभवार्थम्॥ मान्ये गुडमारोग्यकृते गिरीशं सर्वार्थसिद्ध्यै शिरसाऽभिव
न्दे॥१॥ परमेश्वरगुणरसिकान्दशदशादिग्व्यापिशुभ्रतरयशसः। श्रीगुरुनानकमुख्यान्सततं स्मरामामि च भजामि॥२॥
श्रेष्ठो गुरून्स्मरणाम्यादोषद्रुदर्शनहरीन्पुनः। श्रीमद्गुलाबसिंहाख्यान्सद्गुरूनभिवादये॥३॥ श्रीगुरून्भिक्षुपन्नाख्यान्सर्वशास्त्रार्थ
दर्शिनः। नत्वाऽभावरहस्याख्यो ग्रन्थोऽयं क्रियते मया॥४॥ विद्वन्मनःप्रमदकारिनिजार्थतत्त्वप्रव्यक्तभावविषये स्खलनं यदि स्यात्तत्स
न्तः कृपार्द्रहृदयास्तदिदं क्षमन्तां स्वल्पावबोध इह कस्तदुपेक्षितैर्वा॥५॥ परोपकाराय मम प्रयत्नः कुर्वन्तु विज्ञास्तु फलं कृपातः। मान्य
न्यमुत्सार्य्य जनोऽस्ततोऽन्यैः साधारणं वृत्तिमयाख्यपत्त्राम्॥६॥ अथ षड्भावपदार्थज्ञानस्य सुलभत्वात्तमुपेक्ष्य अभावज्ञानस्य
वैशास्त्रेषूपयोगात्। अभावस्य बहुवादिसम्मतत्वात् दुरूहत्वाद्विदुषां जिज्ञासोदयात्। अभावत्वलक्षणं तत्सन्निकर्षतद्ग्राहकप्रमाणे
षु बहुवादिविवाददर्शनाच्च न्यायपरीत्या प्राचीननवीनोक्तयुक्तिसङ्ग्रहमात्रेण निर्मलेनोडुवसिंहेन यथामति नानामतनिरसनाय सपरि
कराभावो निरूप्यते॥ तथाहि॰ तावन्निषेधप्रतीतिविषयत्वमभावत्वम्। अस्ति हि भूतले घटो नास्ति घटः पटो नेत्यादि
प्रतीतिविषयताऽभावानामिति। उत्पन्नानुयायिनस्तत्र उक्तप्रतीतिविषयत्वस्य प्रतियोगिनि घटेऽपि सत्त्वादतिव्या
प्तेः। नचैतन्मते भावानामपि लक्ष्यत्वमेव। घटाधिकरणे घटाभावो नास्तीत्यादिप्रती ॥ ॥ ॥ ॥

न्तेः। तात्पर्य्यटीकायामाचार्य्यवाचस्पतिना· नोखल्वभावाभावोनामकश्चिदन्योऽभावान्नापिभावाभावोऽन्योऽभावादित्युक्त
त्वाच्चेतिवाच्यम् अभावत्वस्याभावाभावसाधारणतयाषट्पदार्थातिरिक्तत्वेनाभावविभागानुपपत्तेः विभजनीयव्या
प्तिमात्रवृत्तिधर्मनिष्ठव्यापकतानिरूपितव्याप्यताश्रय परस्परासङ्कीर्णधर्मेणधर्मिकथनस्यैवविभागपदार्थत्वात्
अन्यथाऽभावोभावभिन्नोनिषेधप्रतीतिविषयत्वादित्यादौहेतौ भावावृत्तित्वेनव्यभिचारितयेतरभेदसाधकत्वरूपलक्षण
प्रयोजनंनसिध्येत नचकाश्यपमहर्षिकणादेन· उत्क्षेपणमपक्षेपणमाकुञ्चनम्प्रसारणंगमनमितिकर्माणि· इतिसूत्रे
उत्क्षेपणादिसाधारणगमनत्वेनविभजनात्क्वचिद्व्यापकधर्मेणविभागोपिनस्यादितिवाच्यम् ऋषेर्नियोगपर्यनुयो
गानर्हत्वेनतद्विभागसम्भवेप्यन्यत्रानभ्युपगमात् अत्रशङ्करमिश्रास्तु गमनत्वमपिकर्मत्वव्याप्यापञ्चमीजातिरेव· तेनभ्र
मणरेचनादिष्वेवगमनप्रयोगोमुख्यः। उत्क्षेपणापक्षेपणादिषुयद्गमनप्रयोगस्तद्भाक्तः स्वाश्रयसंयोगविभागास
मवायिकारणत्वमेव गौणमुख्यसाधारणोधर्मस्तत्प्रयोजकः। गमनत्वजातेस्त्वनियतदिग्देशसंयोगविभागासमवायिकारण
त्वमेवव्यञ्जकम् नत्वभ्रमणरेचनादिषुसर्वत्रेतिगमनग्रहणेनैवतेषांग्रहणमितिनसूत्रेपिव्यापकधर्मेणविभागइत्यूचुः
नचैवमपिप्रतियोग्यमिश्रितत्वेतिप्रतीतिविषयत्वंतल्लक्षणमस्त्वितिवाच्यम् प्रतियोग्यनुयोगिविनिर्मोकेणाभावप्रतीत्य

आदिनास्यन्दनोर्ध्वज्वलनतिर्य्यग्गमनानांकर्मणांग्रहणम् २

अ॰ ननुभवात् नचभावान्यत्वे सति निषेधप्रतीतिविषयत्वं तदिति प्रकृतम्‌ विशेष्यभागवैयर्थ्यापत्तेः। लक्षणघटकभेदेऽव्याप्तेः। अभा
२ वलक्षणस्याभावघटिततत्वेनात्माश्रयापत्तेश्चेति १ वादीन्द्रमानमनोहरकारास्तु समवायान्यत्वे सत्यसमवायित्वमभावलक्षणम्‌
अत्र समवायेतिव्याप्तिवारणाय सत्यन्तम्‌ प्रतियोगितानुयोगितान्यतरसम्बन्धेन समवायवति द्रव्यादिपञ्चकेऽतिव्याप्तिवारणा
य विशेष्यदलमित्याहुस्तन्न रूपसमवायी घट इत्यत्र रूपसमवायस्य स्वात्मकस्वरूपसम्बन्धेनानुयोगितया घटे प्रतियोगितया समवा
ये चास्तीति समवाये उक्तासमवायित्वाभावादेवानतिप्रसक्तया सत्यन्तवैयर्थ्यापत्तेः नच समवायीत्यत्र समवायस्य समवायत्वेने
व निवेशः नतु स्वरूपत्वेनेति नोक्तदोष इति वाच्यम्‌ प्रत्युत गौरवात्‌ लक्षणघटकाभावेऽव्याप्तेः। उक्तलक्षणस्याभावघटि
ततयात्माश्रयापत्तेश्च। २। यत्तु संसर्गारोपजन्यप्रतीतिविषयत्वमभावत्वम्‌ अत्र संसर्गारोपः। संसर्गेण प्रतियोगिता
वच्छेदकेन आरोपः प्रतियोगिनो भ्रमः तज्जन्याया कपाले घटः संयोगादिसंसर्गेण घटवत्स्या— त्तदा तद्वत्तयोपलभ्ये
त न चोपलभ्यतेऽतः कपाले घटाभाववदित्याकारप्रतीतिस्तद्विषयत्वमभावानामिति लक्षणसमन्वयः। नास्ति घ
टो गेह इति सतो घटस्य गेहे संसर्गप्रतिषेधः। इति कणादसूत्रमप्युक्तार्थे प्रमाणम्॥ अस्यायमर्थः। सतः।
देशान्तरे वर्त्तमानस्य। तत्रैव संसर्गान्तरेण वर्त्तमानस्य। तत्रैव पू ॥ ०॥ रामरामराम राम राम रामरामरामराम राम रामराम

वैान्नरकालेवर्त्तमानस्यवाघटस्य।गेहसंसर्गप्रतिषेधः।गेहेसंसर्गेणप्रतियोगिनः प्रतिषेधोऽभावः। नास्तिघटोगेहेइ
तिप्रतीतिविषयइति॰ येतु गेहसंसर्गप्रतिषेधइतिसूत्रभागस्यगेहेघटस्ययः संसर्गःसंयोगादिस्तस्यप्रतिषेधःसच
त्रयदिकदाचिदपिनघटसंसर्गः तदात्यन्ताभावएव।भविष्यतोघटसंसर्गस्यप्रागभावः।भूतस्यतत्संसर्गस्यप्र
ध्वंसाभावउक्तप्रतीतिविषयः।नतुतत्संसर्गेणघटाभावइतियथाश्रुतार्थंवर्णयन्ति तन्नसम्यक् नास्तिघटोगे
हइतिसूत्रोक्तप्रतीत्यनुपपत्तेः।नास्तिघटसंसर्गोगेहे इति प्रतीत्यापत्तेश्च ननुनास्तिघटोगेहइत्यत्रघटपदंल
क्षणयाघटसंसर्गपरमेव·भवन्मतेप्रतिषेधपदंप्रतियोगिप्रतिषेधपरमिवेतिनोक्तप्रतीत्यनुपपत्तिरितिचेन्नउ
क्तरीत्यासर्वत्राभावप्रतीतीनांसम्बन्धाभावविषयत्वेनैवोपपत्त्याघटाद्यभावविलोपापत्तेः।ग्राह्याभावानवगाहि
तयानास्तिघटोगेहेइतिप्रतीतिकालेप्यस्तिघटोगेहेइतिप्रतीत्यापत्तेः। घटोघटसंसर्गोनेतिवद्दृष्टोघटोनेतिप्रती
त्यापत्तेश्चेत्यन्यत्रविस्तरइतिकणादानुयायिनामभावलक्षणं तदपिनसम्यक्।तथाहिअभावज्ञानमात्रउक्तसंस
र्गादिघटितलक्षणज्ञानाधीनम् १ तज्ज्ञानञ्चतद्घटकसंसर्गत्वज्ञानाधीनम् २ संसर्गत्वज्ञानञ्चविशिष्टधीजनक
त्वरूपतल्लक्षणज्ञानाधीनम् ३ तज्ज्ञानञ्चजनकत्वज्ञानाधीनम् ४ तज्ज्ञानमप्यनन्यथासिद्ध्यादिज्ञानाधीन

अ० मित्येवं रीत्या चक्रकादिदोषापत्तेः अतीन्द्रियप्रतियोगिकातीन्द्रियाभावेऽव्याप्तेः तत्तदधिकरणोपच्यत्र परमाणुः
२ स्यात्तद्ध्युपलभ्येतेत्यारोपयितुमशक्यत्वाच्चेति ३ मुक्तावलीकारास्तु अभावत्वं द्रव्यादिषट्कान्योन्याभाववत्त्वम् अ
त्र च द्रव्यत्वादीनां न प्रतियोगितावच्छेदकत्वम् न्यूनवृत्तित्वात् अननुगमाच्च किन्तु तत्तत्षट्कत्वसंख्यैव द्वि
प्रतियोगिताकभेदस्य द्वित्वमिवेत्यभावलक्षणमाहुः तन्न घटपटोभयभेदस्य प्रत्येकं घटपटयोरिव षट्त्वावच्छि
न्नभेदस्याभावत्वे द्रव्यं द्रव्यादिषट्कन्नेत्यादिप्रतीत्या तस्य प्रत्येकं द्रव्यादावपि सत्त्वेन तेष्वतिव्याप्तेः न च पर्याप्तिस
म्बन्धेन षट्त्वावच्छिन्नभेदस्य द्रव्यादेः सत्त्वेऽप्यपेक्षाबुद्धिरूपषट्त्वस्य विषयतयावच्छेदकत्वान्न द्रव्यादिष्वति
प्रसङ्ग इति वाच्यम् व्यासज्यवृत्तिधर्माणां पर्याप्तिसम्बन्धेनैव प्रकारत्वनियमेनान्यसम्बन्धेन प्रकारत्वासम्भवा
त् अन्यथा द्वित्वस्य समवायेन प्रत्येकमपि सत्त्वेनैको द्वाविति प्रतीत्यापत्तेः। एको न द्वाविति प्रतीत्यनुपपत्तेश्च
न चैको द्वाविति प्रतीतिविरहेऽपि एको द्वित्ववानिति प्रतीतेरिष्टतया समवायेनापि व्यासज्यवृत्तिधर्माणां प्रकारत्वमा
वश्यकमिति वाच्यम् द्वित्ववानिति प्रतीतौ मत्वर्थसमवायस्यैव प्रकारत्वात् द्रव्यादिषट्कं नेति प्रतीतौ पर्याप्तिस
म्बन्धेनैव षट्त्वस्य प्रकारत्वानुभवात् अथ पर्याप्त्याख्यविलक्षणसम्बन्धस्यैवाप्रसिद्धेः दुर्निरूपत्वात् अतिरि

क्तकल्पनेगौरवाच्चेतिचेन्नद्वित्वादिस्वरूपस्यैवद्वित्वादिपर्याप्तिरूपतयानिरुक्तदोषानवकाशात् तदुक्तंगदाधरभट्टा
चार्य्यैः द्वित्वादेरेवलाघवेनद्वित्वादिसम्बन्धतोवित्यादिति उक्तंचदीधितिकृतापि पर्याप्तिश्चायमेकोघटइमौ द्वा
वित्यादिप्रतीतिसाक्षिकः स्वरूपसम्बन्धविशेषइति प्राभाकरादिमतेतु द्वित्वादिसमवायएवद्वित्वपर्याप्तिः ननु
स्वरूपमतिरिक्तपदार्थोवा तन्मते व्यासज्यवृत्त्येकत्वादीनांसमवायस्याव्यासज्यवृत्तिः व्यासज्यवृत्तिद्वित्वादीनां
समवायोपिव्यासज्यवृत्तिः समवायस्यनानात्वाभ्युपगमादित्येवं द्रव्यादिष्वतिव्याप्तेर्ध्रौव्यात् प्रथमलक्षणोक्तदोषा
नुद्धाराच्चेदमपिलक्षणंनसम्भवतीत्यन्यत्रविस्तरः ४ यत्तु भावेभावभेदस्यासत्त्वाद्वेवातिव्याप्तेर्वारणात् भावभि
न्नत्वमभावानांलक्षणमस्त्विति कस्यचिन्मतंतदपिनविचारसहम् अत्राभावत्वस्यभावभेदरूपत्वे अभावोन
भावइतिवाक्याच्छाब्दबोधानुपपत्तेः घटोघटइत्यादावभेदसंसर्गकशाब्दबोधे उद्देश्यतावच्छेदकविधेयताव
च्छेदकयोरैक्यस्येवभेदसंसर्गकशाब्दबोधेउद्देश्यतावच्छेदकविधेययोरैक्यस्यापिनिराकाङ्क्षतानाप्रयोजक
त्वात् अतएवगम्यतेग्रामइतिवत्कर्मगम्यतइत्यादयोनप्रयोगाः कर्मत्वावच्छिन्नेउद्देश्येआख्यातार्थकर्मत्व
स्यविधेयतयान्वयेउद्देश्यतावच्छेदकविधेययोरैक्यादिति ५ अत्रनव्याः समवायेकार्थसमवायान्यतरसम्बन्धे

यद्विशिष्टाभावीयप्रतियोगितानविशेषणेनदानुसत्त्वेनत्त्रणानवच्छिन्नत्वंप्रतियोगित्वेदेयम् ५

श्र· नसत्ताभाववत्त्वमभाववत्त्वम् अत्रोभयत्रसमवायस्योभयत्वेननिवेशेजातिगगनादावतिव्याप्तिरतोऽन्यतरत्वेननिवेशः स
४ त्ताभावः सत्तात्वसमनियतप्रतियोगिताकोग्राह्यः तेनसत्तावतिसत्तागगनोभयाभावादिमादायनातिव्याप्तिः नचस
त्तात्वसमनियतप्रतियोगिताकस्यघटत्वेनसत्ताभावस्यकेवलान्वयितयाद्रव्यादावपिसत्त्वात्तत्रातिव्याप्तिरिति
वाच्यम् समानाधिकरणयोरेवावच्छेद्यावच्छेदकभावस्वीकारेणसत्तानिष्ठप्रतियोगित्वासमानाधिकरणघट
त्वस्योक्ताभावप्रतियोगितानवच्छेदकत्वात् नचलक्षणघटकसत्ताभावेऽव्याप्तिस्तत्रस्वस्मिन्स्ववृत्तित्वासम्भवे
नोक्तसत्ताभाववत्त्वलक्षणाविरहादितिवाच्यम् सत्ताभावेपिसत्ताभावान्तरसम्भवात् नचैवमनवस्थापत्तिरि
तिवाच्यम् तत्रतत्रसत्ताभावस्यैकरूपस्यैवसम्भवादित्याहुः तन्न जात्यखण्डोपाधीतरस्यसत्ताभावरूपाभावत्व
स्यस्वरूपतोभानासम्भवेनाभावत्वेनैवतस्यप्रकारतावाच्या तच्चसत्ताभावरूपंतदपिपुनः सत्ताभावरूपाभा
वत्वेनप्रकारइत्येवंतत्रतत्राप्यङ्गीकरणीयतयाविषयतानवस्थापत्त्याऽभावप्रतीत्यनुपपत्तेः नचसत्ताभावरू
पाभावत्वस्यस्वरूपतएवप्रकारत्वोपगमान्नदोषइतिवाच्यम् जात्यखण्डोपाधीतरस्यापिस्वरूपतोभानाङ्गीका
रेघटादीनामपितथात्वापत्तेः सत्ताभावरूपाभावत्वस्यस्वरूपतःप्रकारत्वोपगमेपिसत्तोपस्थितिशून्यकालेप्र

ठेनास्तीत्यादिप्रतीत्यनुपपत्तेश्च अभावज्ञाने प्रतियोगिज्ञानस्य हेतुतया सत्ताज्ञानं विना सत्ताभावरूपाभावत्वभा
नासम्भवात् न चाभावज्ञाने प्रतियोगिधियो न हेतुत्वम् तेजोज्ञानं विनापीदन्तम इति प्रतीतिदर्शनादिति वाच्य
म् यतः प्रत्यक्षविषय — तमस्त्वं न तेजोभावत्वरूपमपि तु तेजोभावनिरूपितवृत्तित्वमेव नातस्तेजोज्ञानं विना
तादृशप्रतीत्यनुपपत्तिः नन्वेवमपि प्रकृते सत्ताया वाक्याजन्याभावत्वप्रकारकशाब्दबोधादौ पदजन्यार्थो
पस्थित्यादीनां हेतुत्वेपि प्रतियोगिज्ञानस्य न तत्त्वेन पृथग्घेतुत्वं पदाजन्यप्रतियोगिज्ञानसत्त्वेपि प्रतियोगिनोऽभानात्
अपित्वभावत्वप्रकारकप्रत्यक्ष एव प्रतियोगिज्ञानस्य तत्त्वेन हेतुत्वमिति नोक्तदोष इति वाच्यम् सर्वत्र खण्डवाक्या
र्थबोधानन्तरमेव महावाक्यार्थबोध इत्यङ्गीकर्तृनवीनमते सर्वत्र विशिष्टवैशिष्ट्यावगाहिबोधे विशेषणतावच्छे
दकप्रकारकनिर्णयस्य हेतुत्वे न सत्तात्वप्रकारकसत्ताविशेष्यकनिर्णयं विना सत्तात्वावच्छिन्नप्रतियोगिताक
त्वसम्बन्धेन सत्ताविशेषिताभावरूपाभावत्वविषयकशाब्दस्याप्यसम्भवात् न च खलेकपोतन्यायेन केवलं वि
शेष्ये विशेषणमिति रीत्या शाब्दाङ्गीकारेन तादृशविशेषणधियो हेतुत्वमिति वाच्यम् प्रतियोगिविशेषिताभा
वबुद्धेर्विशिष्टवैशिष्ट्यावगाहित्वनियमात् तदुक्तं गदाधरभट्टाचार्येण प्रतियोगिविशेषिताभावबुद्धेश्च प्र।

अ॰ तियोगिप्रकारीभूतधर्मविशिष्टवैशिष्ट्यावगाहितया नीलत्वादिना नीलादिविशेषिताभावे नीलत्वाद्यवच्छिन्नप्रति-
५ योगिताकत्वरूपवैशिष्ट्यस्यैव भानात् अन्यथा विशिष्टवैशिष्ट्यबोधत्वानुपपत्तेः प्रतियोगिविशेषिताभाव —
ज्ञानं तु विशिष्टवैशिष्ट्यबोधमर्य्यादान्नातिशेत इति दर्शनात् केवलं विशेष्ये विशेषणमिति रीत्या न कश्चिदभ्युपे-
तीति प्राचीनमतेऽपि सत्ताज्ञानं विना सत्ताभाववद्रूपाभाववत्त्वशाब्दो सिद्ध एव । एतन्मते घटाभाववद्भूतलमस्तीत्या-
दिमहावाक्यार्थबोधप्रति खण्डवाक्यार्थबोधस्याहेतुत्वेऽपि तावत्पदार्थस्मरणस्य हेतुताभ्युपगमात् तदुक्तंमु-
क्तावलीप्रकाशे आशुतरविनाशिनीनां क्रमिकाणां पदजन्यपदार्थोपस्थितीनां मेलनासम्भवात्तत्र शाब्दबोधे
पदजन्यपदार्थोपस्थितिः समूहालम्बनात्मिकैव कारणम् एवञ्च सर्वत्र युगपदेव सकलपदार्थानां विशेष्ये वि-
शेषणमिति न्यायेनैव शाब्दबोधो न तु विशिष्टस्य वैशिष्ट्यमिति रीत्यापि तज्जनकविशेषणतावच्छेदकप्रकारक-
निर्णयस्य पूर्वं — सर्वत्रासम्भवादिति तथा च सत्ताज्ञानं विनाऽभावबोधकतत्पदात्सत्ताभावरूपाभावत्वप्रकार-
कज्ञानमत्र दुर्लभम् यद्यप्यत्र शाब्दप्रक्रियायाम्प्राचीननवीनमतभेदेन बहुतरविचारोऽस्ति तथापि विस्तरभियेह
नोच्यते विद्वद्भिरन्यत्रान्वेषणीयमिति ६ यत्तु सङ्ग्रामभावो निरूप्यत इति वचनात् प्रतियोग्यादिसापेक्षप्रतीतिविषय-

त्वमभावत्वमित्याहुः तन्न ह्रस्वदैर्घ्यसादृश्यपरत्वापरत्वनारत्वएकपृथक्त्वाधारतादिषु बहुषु भावादिनिव्याप्तेरतीन्द्रियाभावेषु चाव्याप्तेश्च ७ परे तु उक्तव
वनात् प्रतियोग्यनुयोगिविशिष्टबुद्धिविषयत्वाभाव प्रत्ययोदयात् निर्विकल्पकबुद्ध्यविषयत्वमभावत्वमित्याहुस्तन्न ब्रा
ह्मणत्वद्विजातित्वनीन्द्रियभावेषु चातिव्याप्तेः नहीन्द्रियसन्निकर्षेण शिखासूत्रदर्शनेनैव ब्राह्मणत्वादिज्ञानं सम्भवति स्त्र्या।
दीनामपि तत्सम्भवात् अपि तु वेदपाठब्रह्मचर्य्यमातापितृसन्दर्शनाद्वा वाक्यादिव्यञ्जकविशेषप्रतीत्यनन्तरमेवते
षां विशिष्टप्रतीतिविषयत्वसम्भवात् उक्तं च वार्त्तिककृता ब्राह्मणत्वादिज्ञानं जन्मतः क्वचिदाचारतश्चापि सं
म्यग्राजानुपालितात् तैलाहुतं विलीनं च गन्धेन च रसेन च ज्ञायते इत्यादिना अस्यायमर्थः यथा विलीनं घृतं
गन्धेन रसेन च तैलादिभेदेन ज्ञायते तथा ब्राह्मणत्वादिजातिरपि जन्मतः अविप्लुतब्रह्मचर्य्यो ब्राह्मणस्यादित्यादि
वचनात् आचारदर्शनादिनश्च क्षत्रियत्वादितो भेदेन ज्ञायते इति संक्षेपः ८ वादिविनोदकारास्तु समवेतत्वस
मवायित्वसमवायत्वानधिकरणत्वमभावत्वम् समवायादिसम्बन्धाधिकरणतानुयोगिन्येवास्ति न तु प्रतियोगि
नि घटे रूपमिति वद्रूपे घट इत्यदर्शनात् सामान्यादावतिव्याप्तिवारणाय समवेतत्वेति नित्यद्रव्येषु तद्वारणाय समवा
यित्वेति समवायेन तद्वारणाय समवायत्वेति असम्भववारणाय नञिति न चानधिकरणत्वमित्यत्राभावनिवेशाने

अ· नैव तन्निरूपणमित्यात्माश्रयः अभावस्याज्ञातत्वात्· अन्यथा लक्षणस्यैवाश्रयासिद्धत्वमापद्येत· तथा चोक्तं टीकाकृ
६ ता· सर्वथाऽप्युत्पन्नप्रतिलक्षणप्रणयनानवकाशात् अन्यथा लक्षणेऽपि लक्षणान्तरवचनेनानवस्थापत्तेः तेन लक्ष्यं
लक्षणं च विशकलितं ज्ञातं येन तं प्रत्येतस्येदं लक्षणमिति लक्ष्यधर्मतामात्रप्रदर्शनार्थमेव लक्षणवचनमिति न
कश्चिद्दोषः न च लक्षणस्य नञ्पदार्थाभावे लक्षणागमनेऽस्य नात्माश्रयोऽगमने वाऽव्याप्तिरिति वाच्यम् तस्य स्वरू
पत एव स्वस्मिन्व्यवहारजनकत्वात्· प्रमेयत्वप्रमेयत्वादिवद्गत्यात्माश्रयस्वीकारादित्याहुः तन्न आत्माश्रया
देर्दोषत्वेऽनुभावलक्षणारहितत्वस्वप्रतियोगिविरोधित्वाभाववृत्तिपदार्थविभाजकोपाधिमत्त्वभाववृत्तिधर्मव
त्त्वभावभिन्नत्वभावत्वशून्यत्वसत्ताशून्यत्वसमवायशून्यत्वभावपदावाच्यत्वाभावपदवाच्य त्वादिलघुलक्ष
णासम्भवेन गुरुभूतलक्षणप्रणयनस्यायुक्तत्वादिति सुधीभिर्विभावनीयम् ९ दीधितिकारास्तु अगत्याखण्डोपाधि
रेवाभावत्वमिति प्राहुः १० महादेवास्तु तादात्म्यसम्बन्धावच्छिन्नभावत्वावच्छिन्नभावनिष्ठप्रतियोगितानि
रूपितानुयोगिताविशेषवत्त्वमभावानां लक्षणमिति प्राहुः अत्राभावबोधकपदप्रवेशो नास्ति· अभावज्ञानं विना
तादृशानुयोगिताज्ञानं भवति न वेत्यस्तु विद्वद्भिः परामर्शः इति दिक् ११ ननु लक्षणानां किं प्रयोजनमिति चेत् अभावव्ः

ननु भावभेद एवेदृशानुयोगितावत्त्वं नाभावमात्र इत्यव्याप्तिरिति चेन्न स्वरूपघटितसामानाधिकरण्येनोक्तानुयोगिता विशेषो यत्राभावत्वे तद्वत्त्वस्य·
प्रागभावादिचतुष्टयं नाभाव इत्यभावाधिकरणकभेदसामानाधिकरण्याभिन्नतये दृश्यानुयोगितावत्त्वस्य वाऽभावमात्रे सत्त्वादित्यादि ऊहनीयम् ॥२॥

न्तरेभ्योभिद्यते॰ अभाववदितिव्यवहारविषयोवा॰ अखण्डोपाधिमत्त्वात्॰ उक्तानुयोगितावत्त्वाद्यन्यैवतान्नैवंय
थायघटादिरित्येवंव्यावृत्तिव्यवहारयोरनुमितिरेवप्रयोजनमित्येवहि अतएवलक्ष्यतावच्छेदकसमनियतत्वरूप
लक्षणालक्षणा भूत्यानान्धर्माणामभावलक्षणत्वन्नसम्भवति अव्याप्यधर्माणांप्रागभावत्वादीनांभागासिद्धेः ति
व्याप्यप्रमेयत्वादीनांव्यभिचारिण्यसम्भवद्दूषितभावत्वादीनांस्वरूपासिद्धेः नभोवादेवोक्तप्रयोजनासाधकत्वात्
अथात्रपक्षतावच्छेदकाभावत्वस्याखण्डोपाध्यादिरूपत्वेतस्यैवहेतुत्वेचपक्षतावच्छेदकहेत्वोरैक्यप्रसङ्गः
नचपक्षतावच्छेदकहेत्वोरैक्येकोदोषइतिवाच्यम्व्याप्तिग्रहदशायामेवपक्षतावच्छेदकीभूतहेतौसाध्यसामा
नाधिकरण्यासिद्धेःसिद्धसाधनस्यैवदोषत्वात्नचहेतुःसाध्यसमानाधिकरणइतिव्याप्तिग्रहस्यपक्षःसाध्यवानित्यनु
मितितोभिन्नाकारत्वात्समानाकारसिद्धेरेवानुमितिप्रतिबन्धकत्वान्नोक्तदोषइतिवाच्यम्उद्देश्यतावच्छेदकहेत्वै
रैक्येनथाचायमित्युपनयवाक्याच्छाब्दबोधानुपपत्तेरेवदोषत्वात् नचनवीनमतेविधेयांशेऽधिकावगाहिनःशा
ब्दबोधस्योपगमेनपक्षतावच्छेदकहेत्वोरैक्येपिसाध्यव्याप्यहेतुमानयमित्याकारकस्योपनयवाक्यजन्यशाब्दबोध
स्यनानुपपत्तिरितिवाच्यम्प्राचीनैरुदाहरणवाक्यादेवव्याप्तिलाभादुपनयेनार्पितत्वप्रतिपादनेपौनरुक्त्यमितियक्षे

अ॰ हेतुमत्तामात्रमेवोपनयेनबोधनीयम् तथाचायमित्युपनयवाक्यस्यहेतुमान्पक्षइत्येवार्थइत्यङ्गीकारादेतन्मतानु
७ सारेणोपपक्षतावच्छेदकहेत्वोरैक्यप्रसङ्ग इतिदूषणाभिधानादितिचेन्न अन्वयव्याप्तिग्रह एवोक्तदोषाणाम्प्रस
क्तिसम्भवात् प्रकृतेतुलक्ष्यमात्रस्यपक्षतयान्वयव्याप्तिग्राहकदृष्टान्तासम्भवेनव्यतिरेकव्याप्तिमादायैवस
कललक्षणानांलक्ष्येतरभेदादिसाधकत्वेनसिद्धसाधनाप्रसक्तेः नन्वाचार्य्यमतेव्यतिरेकव्याप्त्यभावेनान्वयव्या
प्तेरेवसर्वत्रानुमितिहेतुतयाकथन्नदोषः नचव्यतिरेकव्याप्त्यस्वीकारेत्रिधानुमानविभागानुपपत्तिरितिवाच्य
म् अन्वयसहचारमात्रेणगृहीतान्वयव्याप्तिकत्वंकेवलान्वयित्वंव्यतिरेकसहचारमात्रेणगृहीतान्वयव्याप्तिक
त्वंकेवलव्यतिरेकित्वमुभयसहचारेणगृहीतान्वयव्याप्तिकत्वमन्वयव्यतिरेकित्वमित्याचार्य्यमतेनविभागा
सम्भवादितिचेत्· एवमप्युभयव्याप्तिज्ञानस्यानुमितिकारणतावादिमणिकारादिमतेव्यतिरेकव्याप्तिमादाये
तरभेदानुमितिसम्भवात्· नवीनमतेसाध्यव्याप्यहेतुमान्पक्षइतिबोधस्यैवोपनयवाक्यजन्यत्वोपगमेनविधेयां
शेधिकावगाहितयानत्सम्भवात्· परार्थानुमितावेवन्यायप्रयोगस्यापेक्षणीयतयास्वार्थानुमितिमादायैवसर्वम
तेनापिलक्षणप्रयोजनसम्भवाच्च नलक्षणलक्ष्यतावच्छेदकयोरैक्येपिकिञ्चिद्दोषइत्यन्यत्रविस्तरः सचाय

भूतलं संयोगेन घटाभाववत् ३ संयोगादिसम्बन्धेन यत्र घटः स्यात्तर्हि तेनैवोपलभ्येतेत्याद्याकारस्य ४

मभावो द्विविधः संसर्गाभावान्योन्याभावभेदात् ननु किमिदं संसर्गाभावत्वमन्योन्याभावत्वं च अत्र केचित् भेदसंसर्गारो
पजन्यप्रतीतिविषयाभावत्वं संसर्गाभावत्वम् अभेदसंसर्गारोपजन्यप्रतीतिविषयाभावत्वमन्योन्याभावत्वम् तद्धर्मि
विशेष्यकतत्सम्बन्धावच्छिन्नतद्रूपावच्छिन्नप्रतियोगिताकाभावप्रत्यक्षे तद्धर्मिकतत्संसर्गिकतद्रूपावच्छिन्नप्र
कारकज्ञानस्य हेतुत्वाल्लक्षणसमन्वयः नन्वधिकरणज्ञानप्रतियोगिज्ञानयोरभावबुद्धिहेतुतया तत एवोपपन्नाव
पदर्शितातिरिक्तकार्य्यकारणभावे मानाभावः न च प्रतियोग्यधिकरणयोः स्वतन्त्रज्ञानसत्त्वेधिकरणे प्रतियोगि
मत्ताज्ञानाभावदशायामभावप्रत्यक्षवारणायोक्तकार्य्यकारणभाव आवश्यक इति वाच्यम् तदानीमभावप्रत्यक्षे
बाधकाभावात् अधिकरणानुपरक्तस्य प्रतियोग्यनुपरक्तस्य चाभावस्य लौकिकबुद्धेरनुभवविरुद्धतयाधिकरणप्र
तियोगिज्ञानशून्यतादशायामेवाभावलौकिकप्रत्यक्षानङ्गीकारादिति चेन्न प्रतियोग्यारोपस्याहेतुत्वेऽनेकाधिकरण
सन्निकर्षदशायां स्वतन्त्रतज्ज्ञानसत्त्वेपि क्वचिदेवाधिकरणे उपस्थितानां प्रतियोगिनां कस्यचिदभावः प्रतीयते न तु
सर्वत्र सर्वेषामित्यत्र नियामकाभावः। एवं भूतलाधिकरणे कदाचि द्घटादेरत्यन्ताभावः। कदाचिदन्योन्याभावः। अ
त्यन्ताभा— वोपि कदाचित्संयोगावच्छिन्नप्रतियोगिताकः कदाचित्समवायाद्यवच्छिन्नप्रतियोगिताकः प्रतीयत इत्या।

न तु तयोः स्वातन्त्र्येण ज्ञानसत्त्वेपि ४

बाधज्ञानकालीनेच्छाजन्यंज्ञानमाहार्य्यम् २ अनुमित्यादि ५

अ° त्यत्रापिनियामकाभावः। अनियमेचसर्वैरेवाभावः सर्वत्र प्रतीयेरन्नित्यनुविरोधः। प्रतियोग्यारोपस्यहेतुत्वेचयत्राधि
८ करणेयस्ययेनसम्बन्धेनयदारोपः तत्रतस्यतत्सम्बन्धावच्छिन्नाभावप्रत्यक्षंतदेतिनियमउपपद्यते अथप्रतियोग्या
रोपस्यसमानधर्मिकस्याभावबुद्धौविपरीतज्ञानत्वेनप्रतिबन्धकतयानहेतुत्वसम्भवः नचाहार्य्यएवप्रतियोग्यारोपो
हेतुः सचनप्रतिबन्धकइतिवाच्यम् आहार्य्यज्ञानस्यपूर्वंबाधबुद्धिमन्तरेणासम्भवात् प्रतियोग्यारोपस्याहार्य्यतानिर्वा
हार्थंतत्पूर्वमभावबुद्ध्यन्तरोपगमेतत्रापिप्रतियोग्यारोपस्यहेतुतयानवस्थाप्रसङ्गात् नचारोपात्पूर्वम्परोक्षरूपाभावबुद्धि
रेवस्वीकार्य्यातत्रचनारोपान्तरापेक्षेतिनानवस्थेतिवाच्यम् लिङ्गपरामर्शशब्दज्ञानादिघटितपरोक्षधीसामग्र्याअनि
यतत्वादितिचेन्न अभावेलौकिकप्रत्यक्षआहार्य्यप्रतियोग्यारोपस्यहेतुत्वेप्यन्यत्रानपेक्षणादनवस्थानुपपत्तेः तथाहि
घटाभाववद्भूतलमित्याद्यभावलौकिकप्रत्यक्षेयद्यत्रतत्स्यादित्याहार्यारोपस्यहेतुत्वेप्यत्राहार्य्यतानिर्वाहकेतत्पूर्वमुपनी
तभानात्मकेघटाभाववद्भूतलमित्यादिबाधज्ञानेपुनरप्यत्रयदिस्यादित्यादितर्कानपेक्षणात् यथाचात्रापाद्यापादकव्या
प्तिमूलकस्यैवतर्कस्योपयोगस्तथाग्रेवक्ष्यतइत्याहुः तदसत् अतीन्द्रियसंसर्गान्योन्याभावयोरुक्तलक्षणाव्याप्तेः नचतादृ राम
शप्रतीतिविषयत्वस्याभावविभाजकोपाधिमत्त्वविवक्षणान्नोक्ताव्याप्तिरितिवाच्यम् तथाप्यभावाधिकरणकाभावस्या ८

नतिरिक्ततयात्यन्ताभाववत्त्वमन्योन्याभावस्यात्यन्ताभावरूपतयाऽन्योन्याभाववत्त्वमत्यन्ताभावस्य चान्योन्याभावरूपतया।
संसर्गाभावलक्षणस्यान्योन्याभावेऽन्योन्याभावलक्षणस्यात्यन्ताभावेऽतिव्याप्तेर्दुर्वारत्वात् अन्ये तु भेदसंसर्गावच्छि
न्नप्रतियोगिताकाभाववत्त्वं संसर्गाभाववत्त्वमभेदसंसर्गावच्छिन्नप्रतियोगिताकाभाववत्त्वमन्योन्याभाववत्त्वमित्याहुस्तद
प्यसत् ध्वंसप्रागभावयोरन्योन्याभावस्य च प्रतियोगितावच्छेदकसम्बन्धे मानाभावेनाद्यलक्षणे ध्वंसप्रागभावयोरव्या
प्तेरन्त्यलक्षणे चासम्भवात् यत्तु अत्यन्ताभावप्रतियोगितावच्छेदकसम्बन्धे मानाभावादाद्यलक्षणेऽप्यसम्भवः न च
तेन सम्बन्धेन तत्प्रकारकबुद्धौ तत्सम्बन्धावच्छिन्नतन्निष्ठप्रतियोगिताकाभाववत्तानिर्णयस्य प्रतिबन्धकतयात्यन्ता।
भावप्रतियोगितावच्छेदकसम्बन्धसिद्धिरिति वाच्यम् विषयितया प्रमेयं नास्तीति प्रतीतौ यया विषयितया वृत्त्यनियामक
त्वेन न तत्सम्बन्धावच्छिन्नप्रमेयत्वावच्छिन्नप्रतियोगितायाः प्रसिद्धा प्रतियोगितायां विषयितावच्छिन्नत्वादेर्भ्रमः तथा तेन सम्ब
न्धेन तत्प्रकारकबुद्धौ तत्सम्बन्धावच्छिन्नतन्निष्ठप्रतियोगिताकाभाववत्तानिर्णयत्वेन प्रतिबन्धकतायां तत्सम्बन्धावच्छिन्नत्व
निष्ठसांसर्गिकविषयतानिरूपितप्रति

अ· योगित्वनिष्ठसांसर्गिकविषयतानिरूपिताभावप्रकारतायानिवेशनीयतयाप्रतियोगितायांसम्बन्धावच्छिन्नत्वादे
९ र्मस्वीकारेणाभावस्यप्रतियोगितावच्छेदकसम्बन्धासिद्धेः। गुरुधर्मस्थलेप्येवंबोध्यमित्याहुस्तदसत् वृत्त्यनिया
मकसम्बन्धस्याप्यभावप्रतियोगितावच्छेदकत्वेबाधकाभावेनतदप्रान्तासिद्धेरितिनोक्तलक्षणयोःसम्भवइतिचेन्न
अतिरिक्ताखण्डोपाधीसंसर्गाभावत्वान्योन्याभावत्वेइत्यस्यसुवचत्वात्· प्रतियोग्यवृत्तिनित्याभावत्वमन्योन्याभावत्वम्
भेदान्याभावत्वंसंसर्गाभावत्वमित्यस्यापिसुवचत्वाच्चेतिसंसर्गाभावःपुनस्त्रिविधः प्रागभावध्वंसाभावात्यन्ताभावभेदात्· तत्राना
दिसान्तःप्रागभावः सचेहकपालेघटोभविष्यतीत्यादिप्रतीतिसिद्धः स्वरूपसम्बन्धेनस्वप्रतियोगिसमवायिदेशए
ववर्त्ततेनत्वन्यत्र· सादिरनन्तः प्रध्वंसः सचेहकपालेघटोध्वस्तइत्यादिप्रतीतिसिद्धः स्वरूपेणस्वप्रतियोगिसमवायि
देशएववर्त्ततेध्वंसप्रागभावयोः प्रागभावध्वंसोतुस्वरूपेणतदधिकरणएवकालभेदेनवर्त्तेते तयोःसमवाय्यसत्त्वात्
नचध्वंसोविनाशीकृतकत्वात्· एवंप्रागभावः सादिःविनाशित्वात्· घटवदित्यनुमानयोः सम्भवान्नोक्तलक्षणसम्भव
तइतिवाच्यम् उभयत्रभावत्वस्योपाधित्वात्· एकैकध्वंसप्रागभावाभ्यांव्यवहारोपपत्तावननन्तध्वंसधारादिकल्पनेगौ
रवात्· प्रागभावध्वंसयोः प्रागभावध्वंसानन्तरानङ्गीकारेणनवस्थाप्रसङ्गात्· उत्पत्तिविनाशरूपविरुद्धधर्मवत्त्याः

ज्वालाप्रत्यभिज्ञायाः त्यक्तुंशक्यत्वेपि तद्धर्मेष्टत्वायाः स एवायंप्रागभावः स एवायंप्रध्वंस इत्याबाधितप्रत्यभिज्ञाया
अपलपितुमशक्यत्वाच्च· नित्यत्वे सति संसर्गाभावत्वंभेदान्यत्वे सति नित्याभावत्वं प्रतियोगिनिष्ठाभावत्वंवा अत्यन्ताभाव
त्वम् स च कपाले समवायेन पटो नास्तीत्यादि प्रतीतिसिद्धः स्वप्रतियोग्यनधिकरण एव वर्त्तते अथात्यन्ताभावस्य नि
त्यत्वे यत्र पूर्वोत्तरकालयोर्मण्यादि अन्यदेशे मध्ये मण्यादिरानीतस्तत्र मण्याद्यानयनोत्तरमपि दाहादिकार्य्यापत्तिः ^
एवं तत्र मण्याद्यानयनकाले मणिर्नास्तीत्यादि प्रतीत्यापत्तिश्च तत्र मण्याद्यत्यन्ताभावस्य नित्यतया तदानी‾मपि स एवंरूपध्वंसः
त्वादिति चेत्· अत्र प्राञ्चः उक्तस्थले न मण्याद्यत्यन्ताभाव उक्तदोषात्ः अपितु दाहादिकार्य्यकादाचित्कत्वप्रयोजकः प्र
तियोगिसमानाधिकरणउत्पत्तिविनाशशाली चतुर्थः सामयिकाभावव्यपदेश्यः स्वीक्रियते· सामयिकत्वंच· समयवि
शेषे उत्पत्तिविनाशशालित्वम् एवं चोक्तस्थले मण्याद्यानयनात्पूर्वं परतश्च सत्तोपि तस्य मण्याद्यानयनोत्तरं नाशेन न
दाहाद्यापत्तिर्नवा प्रतीत्यापत्तिश्चेत्याहुः॥ लीलावतीकारानुयायिनस्तु उक्तसामयिके संसर्गाभावान्तरे मानाभावः उक्ता
पत्तेः प्रकारान्तरेणैव वारणात् तथाहि मण्यादिसंयोगत्वेनैव दाहादिप्रतिबन्धकतया तदवच्छिन्नाभावस्तद्धेतुः स
च यत्राधिकरणे कदापि न मणिसंयोगस्तत्रात्यन्ताभाव एँ हेतुः अन्यत्र ध्वंसप्रागभावावेव तथाविधौ हेतू तयोरपि सामा
व

अ· न्यधर्मावच्छिन्नप्रतियोगिताकत्वोपगमात्· अतो मणिसंयोगदशायां मणिसंयोगत्वावच्छिन्नध्वंसप्रागभावयो
१० रसत्त्वान्न दाहः। मणिसंयोगाभाव एव च संयोगसम्बन्धावच्छिन्नप्रतियोगिताकमण्यभावसम्बन्धोपीत्यतो मणि
संयोगदशायां न तत्र मण्यभावप्रतीतिः। अस्तु वा मण्यभावस्य स एव कारणतावच्छेदकः सम्बन्धोपीति मणेः प्रतिब
न्धकत्वमपि भवतु· मणिसंयोगसमये कारणतावच्छेदकसम्बन्धविरहान्न दाहः· अस्तु वा वस्तुगत्या योयः प्रतियो
गिविरहकालस्स एवाभावाधिकरणयोः संसर्गः कारणतावच्छेदकः प्रतीतिनियामकश्च नातउक्तापत्तिसम्भव
तः। सामयिकत्वं च· समयविशेष एव सत्त्वरूपमिति ध्वंसप्रागभावयोरेव सामयिकतया ताभ्यामेव सामयिकाभा
वव्यपदेशोपीत्याहुः तदसत् मणिसंयोगध्वंसोत्तरं कियत्कालएव पुनस्तत्संयोगाद्यनन्तरोत्पन्नावपि दाहाद्यापत्तेः
पूर्वकाले दाहाद्यनुरोधेनावश्योपेयस्य मणिसंयोगत्वाद्यवच्छिन्नध्वंसस्याविनाशिनः पूर्वकाल इवात्रेपि स
त्त्वात्· ध्वंसप्रागभावयोरैकैकप्रतियोगिकत्वसामान्यधर्मस्यातिप्रसक्ततया प्रतियोगिनावच्छेदकत्वासम्भवः। सक
लप्रतियोगिकत्वे ध्वंसे प्रतियोगिनो हेतुतया युगपत्सकलप्रतियोगिनामसत्त्वेन तदसम्भवदुभयथापि ध्वंसप्रागभावयोः सामा

न्यधर्मावच्छिन्नप्रति

योगिताकत्वस्यासम्भवाच्च · मणिकारानुयायिनस्तु मण्यादिशस्य भूतलादौ मण्याद्यानयनोत्तरमपि मण्याद्यत्यन्ताभावोऽ
स्त्येव · अन्यथा तस्य त्रैकालिकत्वानुपपत्त्याऽत्यन्ताभावत्वस्यैवानुपपत्तेः परं तु तत्तत्कालविशेषावच्छिन्नतत्तद्भूतलादि
स्वरूपस्य दाहादिकारणतावच्छेदकसम्बन्धत्वं मणिर्नास्तीत्यादिप्रतीतिनियामकसम्बन्धत्वं चोपेयत इति नोक्तदोषा
पत्तिः सामयिकत्वं च · समयविशेषसम्बद्धत्वमित्यत्यन्ताभाव एव सामयिकाभाव इति व्यपदिश्यत इति वदन्ति ॥
दीधितिकृतस्तु संसर्गकल्पनातो लाघवाद्दाहादिकारणतावच्छेदकमभावस्य वैशिष्ट्यं संसर्गान्तरमेवोपेयत इति
नोक्तापत्तिः न च तस्य नित्यत्वे उक्तदोषानिवृत्तिरनित्यत्वे तु तदुत्पत्तिविनाशकल्पने गौरवमिति वाच्यम् फलमुखगौर
वस्यादोषत्वात् · अन्यथा रूपवान्घट इत्यादावपि स्वरूपेणैव निर्वाहेऽतिरिक्तसमवायकल्पनं न स्यादिति प्राहुः यत्तु प्रतियो
गिदेशान्यदेशत्वमेवाभावाधिकरणयोः सम्बन्ध उपेयते · तेनैव सम्बन्धेनाभावः प्रतीयते कारणं चेति नोक्तदोष इत्याहुः
तन्न अन्योन्याभावस्याव्याप्यवृत्तित्वे मण्याद्यानयनात्प्राग्दाहाद्यनुरोधेन तदधिकरणे प्रतियोगिदेशान्यदेशत्वस
त्त्वेन मण्याद्यानयनेऽपि दाहाद्यापत्तेः । वृक्षादावव्याप्यवृत्तिसंयोगाद्यत्यन्ताभावप्रतीत्यनापत्तेश्च · तस्याव्याप्यवृ
त्तित्वे त्वन्योन्याभावस्यापि नित्यनिष्क्रियत्वेन प्रतिबन्धकसमवधानात्पूर्वं सत्त्वस्य तत्समवधानेऽप्यनपायेन दाहादि

अ॰
१९

कार्य्याभावप्रतीत्योर्द्वैरूप्याच्च तथा च साधकाभावानङ्गीकारान्न त्रिविधसंसर्गाभावविभागानुपपत्तिरिति । अत्र
घटाद्यभावाभावोऽपि घटादिस्वरूप एव न त्वतिरिक्तः गौरवादिति वाचस्पतिमिश्राः दीधितिकारास्तु अभावाभावोऽतिरि
क्त एव । ननु भावरूपः तथा हि घटादीनां ध्वंसप्रागभावयोः प्रागभावध्वंसो न घटादिरूपः । तयोरनाद्यनन्तत्वघटितलक्ष
णानुपपत्तेः ननु न हि लक्षणानुरोधेन लक्ष्यं कल्प्यमपि तु लक्ष्यानुरोधेन लक्षणान्तरं कल्पनीयमिति चेत् । एवमपि
ध्वंसप्रागभावयोरनधिकरणदेशप्रतियोगिमत्त्वनियमेन घटादिध्वंसकाले तत्प्रागभावस्य घटादिप्रागभावकाले तद्ध्वंस
स्य चोन्मज्जनापत्तेः न च घटादिप्रागभावस्य घटादितद्ध्वंसाभ्यां घटादिध्वंसस्य घटादितत्प्रागभावाभ्यां च विरोधकल्पनान्न दो
ष इति वाच्यम् एतत्कल्पनापेक्षयानतिरिक्तयोर्ध्वंसप्रागभावयोरनन्तानादित्वकल्पनस्यैव युक्तत्वात् । ध्वंसप्रागभावप्राग
भावध्वंसयोः प्रतियोगिरूपत्वे घटादिसत्त्वकाले तन्नाशो न ध्वंसप्रागभावो न नष्ट इत्यबाधिताभावत्वप्रत्ययानुपपत्तेश्च यदि
चात्यन्ताभावविषयकत्वेनैवोपपत्तेरुक्तप्रत्यययोर्न तादृशध्वंसप्रागभावातिरिक्तत्वसाधकतेति विभाव्यते तदा घटादिध्वं
सो भविष्यति घटादिप्रागभावो नष्ट इत्यादिप्रत्ययस्तादृशध्वंसप्रागभावयोरतिरिक्तत्वसाधक इति ॥ प्रागभावस्त्वेव
तयोरतिरिक्तानतिरिक्तत्वचिन्ता । स एव नास्ति । साधकाभावादिति नव्याः ॥ एवं द्वितीयात्यन्ताभावस्याभावत्वे घटादिप्रति

एम
१९

अभावविरहत्वं वस्तुनः प्रतियोगित्वमिति विदन्तः ।
उदयनाचार्य्यास्तु मतेऽपि नातिरिक्तः ॥२॥

तन्त्वादौपटाद्यभावोनास्तीत्यबाधिताभावत्वप्रत्ययानुपपत्तेः। भावेऽभावत्वविरहात्· अभावत्वस्यभावाभावसाधारणत्वेपदा।
र्थविभाजकोपाधितानुपपत्तेरुक्तत्वात् नचतस्याप्यत्यन्ताभावतयानित्यत्वेनपटकालइवपटनाशकालेपीहतन्तौपटात्यन्ता
भावोनास्तीत्यादिप्रतीत्यापत्तिरितिवाच्यम् पटादिप्रतियोगिकालस्यप्रतियोगिविशिष्टाधिकरणस्यैवतादृशाभावप्रत्य
पादिनियामकसम्बन्धत्वोपगमात् नचैवंतृतीयतुरीयाभावादीनामतिरिक्तत्वेऽनवस्थास्यादितिवाच्यम्प्रथमपटाद्य
भावस्यैवस्वाभावाभावरूपत्वेनोक्तदोषानवकाशात् एवंभेदसामान्यभेदस्तुद्वितीयोपिनातिरिक्तः अपितुभावत्वंसंस
र्गाभावत्वमित्युभयस्वरूपमेव· पटभेदोनेत्यादिविशिष्टद्वितीयभेदस्तुस्वभिन्नाभावत्वंभावत्वंचेत्युभयस्वरूपमेवा। उक्त
भावान्यतरत्वंवा· अतिरिक्तत्वेनवस्थापातात् अत्रभावत्वंद्रव्यादिषट्कान्यतमत्वमभावभिन्नत्वंवा· नतुसत्तावत्त्वम्।
भेदस्यभावत्वापत्तेरितिप्राहुः॥ अत्रभेदस्यभेदोप्यतिरिक्तएव नचैवमनवस्था· तस्याःप्रामाणिकत्वेनादोषत्वात् अन्या।
याऽन्योन्याभावमात्रस्यैवानतिरिक्तत्वंप्रसज्येत· सर्वत्रतदधिकरणमात्रवृत्तिधर्मएवतत्स्वरूपत्वकल्पनसम्भवादित्यपि।
केचित्॥ अत्रपृथिव्यांगन्धसत्त्वेपिपृथिवीजलयोर्नगन्धइत्यादिप्रतीतिसिद्धद्वित्वाद्यवच्छिन्नानुयोगिताकस्य· घटसत्त्वे
पिघटपटोभयंनास्तीत्यादिद्वित्वाद्यवच्छिन्नप्रतियोगिताकस्य· पूर्वक्षणविशिष्टघटोनास्तीत्यादिक्षणाद्यवच्छिन्नप्रतियो

गिताकस्य चवह्न्यादिसम्मतगन्धाभावादेरत्यन्ताभावेनर्भावान्नसंसर्गाभावाधिक्यमितिध्येयम्· अत्रसोन्दडोपाध्यायास्तु पटा
दिद्रूव्याधिकरणेद्रव्यसामान्यंनास्तीतिप्रतीत्यसत्त्वेपिघटत्वेनद्रव्यंनास्तीत्यबाधितप्रतीतिविषयस्यविशेषरूपेणसा
मान्याभावस्य· एवंतत्रैवद्रव्यत्वेनघटोनास्तीतिप्रतीतिविषयस्यसामान्यरूपेणविशेषाभावस्यचसत्त्वा न्कथंवि
भागोपपत्तिः प्रतीतीनामसाक्षिकत्वेत्वभावमात्रासिद्धिप्रसङ्गः नतुघटत्वेनद्रव्यंनास्तीतिप्रतीतिर्घटमात्रप्रतियोगि
काभावमवगाहते नतुद्रव्यसामान्यप्रतियोगिकम्· घटवतिघटोनास्तीतिप्रतीत्यसत्त्ववद्घटत्वेनद्रव्यसामान्यन्ना।
स्तीतिप्रतीतेरप्यनुत्पत्त्याघटमात्रवृत्तिप्रतियोगिताकाभावावगाहित्वस्यावश्यकत्वात्· तादृशातिरिक्ताभावाङ्गीका
रेतुद्रव्यमात्रेतदीयप्रतियोगिताकल्पनेगौरवाच्च· एवंपटाधिकरणेद्रव्यत्वेनघटोनास्तीतिप्रतीतिरपिघटवत्यनुत्पत्त्याघ
टमात्रवृत्तिघटत्वावच्छिन्नप्रतियोगिताकसामान्याभावमवगाहते नतुद्रव्यत्वावच्छिन्नघटनिष्ठप्रतियोगिताकम्· द्रव्यत्व
स्यातिप्रसक्तत्वेनतादृशप्रतियोगितानवच्छेदकत्वात्· अत्रावच्छेदकत्वार्थकतृतीयानुपपत्तिरितितुनशङ्क्यम्· तृतीयाया
वैशिष्ट्यमात्रार्थकत्वात्उक्तंचव्यधिकरणेद्रव्यत्वेनवह्निर्नास्तीतिप्रतीतौवह्नित्वस्यैवप्रतियोगितावच्छेदकत्वंभासतेद्रव्यत्वस्यतुवैशिष्ट्यमात्रंविषयइतितथाचा
भावाधिक्यप्रसङ्गोनेतिचेन्न एवमपिघटत्वेनपटोनास्तीतिप्रती[ति]विषयव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्य· संयोगेनद्रव्यत्वान्नास्तीतिप्रतीति विष ॥

विशिष्टपक्षेऽनुभयवतिसामानाधिकरण्यसम्बन्धेनजलविशिष्टघटस्यघटविशिष्टजलस्यचासत्त्वंबोधयितुमशक्यत्वात् ॥ जलघटोभयत्वावच्छिन्नेपृथिवीत्वेवैशिष्ट्यानवप्रसि
रूपत्वेति

यव्यधिकरणसम्बन्धावच्छिन्नप्रतियोगिताकस्य· जलघटोभयाधिकरणेऽपिपृथिवीत्वेनजलघटोभयंनास्तीतिप्रतीतिविषयनृ
सिंहाकारस्यचानतिरिक्ताभावस्यसत्त्वात् नचोक्ताभावस्यनृसिंहाकारस्यकथमतिरिक्तत्वमिति वाच्यम् उक्ताभावेष्वन
न्तर्भावात् तथाहितादृशाभावोनसामान्याभावरूपः। पृथिवीत्वस्यजलनिष्ठप्रतियोगित्वासमानाधिकरणत्वात्· नापिव्य
धिकरणधर्मावच्छिन्नप्रतियोगिकः। घटनिष्ठप्रतियोगित्वसामानाधिकरण्यात्· नापिविशिष्टाभावोभयाभावरूपः। ज
लेघटोभयवत्त्वसत्त्वप्रसङ्गात्· नापिसामान्यरूपेणविशेषाभावविशेषरूपेणसामान्याभावरूपः। पृथिवीत्वेजलनिष्ठ
प्रतियोगित्वव्यापकत्वव्याप्यत्वयोरभावादित्याहुः तन्न अतिरिक्ताभावकल्पनेगौरवात् नचसमनियताभावैक्येननि।
खिलव्यधिकरणधर्मावच्छिन्नाभावादीनांगगनाभावात्मकतयागगनाभावस्वीकर्तॄणांचिन्तामणिकारादीनांतदनङ्गी
कारानुपपत्तिरितिवाच्यम् तथापितादृशाभावानामतिरिक्तप्रतियोगिताकल्पनेगौरवात्· तदुक्तं प्रतियोगित्वंहिस्वरू
पसम्बन्धविशेषः सचघटोनास्तीत्यादिसामान्याभावस्थलेप्रतियोगितावच्छेदकघटत्वादिस्वरूपएव· ननुप्रतियो
गिस्वरूपोऽननुगमात्· अभेदेऽधाराधेयभावानुपपत्तेश्च· घटत्वेनपटोनास्तीत्यादिव्यधिकरणधर्मावच्छिन्नाभावादि
स्थलेचप्रतियोगितावच्छेदकादिस्वरूपेणप्रतियोगित्वंकिंत्वतिरिक्तमेव· अन्यथाप्रतियोगितावच्छेदकविशिष्टप्र

ग्र· त्तियोगिनैव सार्धमभावानां विरोधात् तदवच्छिन्नवत्तितादृशाभावासत्त्वप्रसङ्गात्· विवादोप्यतिरिक्तायां प्रतियोगिता-
१२ यामेवेति· एवमेव विशेषरूपेणसामान्याभावादिस्थलेपि प्रतियोगितायामेव विवादो बोध्यः किंच विशिष्टवैशिष्ट्यावगाहि-
बोधे विशेषणतावच्छेदकप्रकारकनिर्णयस्य हेतुत्वात्पूर्वं घटत्वविशिष्टपटनिर्णयं विना घटत्वेन पटो नास्तीत्या- ग·
दिप्रतीतेरेवासिद्ध्या कथं तयाव्यधिकरणघटत्वादिविशिष्टपटादिविशेषिताभावसिद्धिः यच्चत्र घटत्वविशिष्टपटः
स्यात्तदोपलभ्येतेत्येवं कृत्वाप्यापादयितुमशक्यत्वात् नच घटत्वेन पटो नास्तीत्यादौ घटत्वविशिष्टपटनिर्णयं विनापि
घटत्वपटाभाववानिति विशेष्ये विशेषणमिति रीत्यैव विशकलितोपस्थितिसत्त्वे चक्षुःसन्निकर्षादिघटितविशिष्टप्रत्यक्षा-
दिसामग्रीसत्त्वे चाभावप्रत्यक्षादिकमुपेयत इति नोक्तदोष इति वाच्यम् रक्तः पीतः पटः कट इति समूहालम्बनानन्तर-
मपि रक्तपटो नास्तीत्यादिप्रत्ययापत्तेः यत्तु विशिष्टवैशिष्ट्यावगाहिबुद्धित्वावच्छिन्नं प्रति विशेषणतावच्छेदकप्रका-
रकज्ञानत्वेन हेतुत्वं न तु निर्णयत्वेनेति मतं तन्न दण्डो रक्तो न वेत्यतीतो दण्डवान्न वेत्यादिरक्तत्वप्रकारकसंशयात्मक-
विशिष्टज्ञानानन्तरमपि रक्तदण्डवानतीतो नास्तीत्यादिबुद्ध्यापत्तेः नच उक्तनिर्णयत्वेन हेतुत्वेपि घटत्वसमवायि पट इति
भ्रमनिर्णयसम्भवाद्घटत्वेन पटो नास्तीति प्रतीत्युपपत्तिरस्त्विति वाच्यम् पटो न घटत्वसमवायीति विशेषदर्शिनम्प्रतिभ्र-

मत्त्वासम्भवात् न चैतत्प्रत्ययेपि पटो घटत्वसमवायि यद्यत्र सः स्यात्तर्ह्युपलभ्येतेत्युभयांशव्याहार्यारोपस्य सर्वज्ञानाप्रतिब-
ध्यस्य सम्भवान्नोक्तनिर्णयानुपपत्तिरिति वाच्यम् भ्रमस्य व्यधिकरणधर्मनिष्ठप्रतियोगितावच्छेदकत्वादिरूपार्थासाधकत्वे
न व्यधिकरणधर्मावच्छिन्नाभावादेस्तथाप्यसिद्धेः यत्तु अभावज्ञाने प्रतियोगिज्ञानस्य कारणतया घटत्वविशिष्टपटा-
दिज्ञानं विना न घटत्वेन पटाद्यभावसिद्धिरिति मतं तन्न तेजस्त्वप्रकारकतेजोज्ञानं विनापीदन्त्वमश्वलतीत्यादाविदन्त्वत-
मस्त्वादिना अभावप्रत्ययसम्भवेनोक्तकार्यकारणभावे व्यभिचारात् न च प्रतियोगिविशेषिताभावज्ञानत्वस्य कार्यतावच्छे-
दकत्वान्न व्यभिचार इति वाच्यम् एतादृशज्ञानत्वस्य विशिष्टवैशिष्ट्यावगाहित्वरूपतया तदवच्छिन्नं प्रति विशेषणताव-
च्छेदकप्रकारकनिर्णयत्वेन क्लृप्तहेतुतयैव सकलापत्तिवारणसम्भवे प्रतियोगिज्ञानस्य पृथक्कारणताकल्पने माना-
भावात् यत्तु विशिष्टबुद्धित्वावच्छिन्नं प्रति विशेषणज्ञानस्य कारणत्वेन प्रतियोगिरूपविशेषणज्ञानं विना न घटत्वेन प-
टो नास्तीति प्रतियोगिविशेषिताभावबुद्धिः सम्भवतीति मतं तदपि न सम्यक् तादृशाभावबुद्धौ विशेषणतावच्छेदकप्र-
कारकनिर्णयस्य हेतुत्वेनैव सकलापत्तिवारणे विशेषणज्ञानस्य पृथक्कारणताकल्पने मानाभावात् न चैवं विशिष्ट-
बुद्धौ विशेषणज्ञानस्य कारणताप्रवादो न स्यादिति वाच्यम् घटादिना चक्षुः संयोगाद्यनन्तरं कदाचिद्घट इत्याकारकं स्व

श्री रूपतो घटत्वादिप्रकारकं ज्ञानं कदाचिद्रूपमित्याकारकं स्वरूपतो द्रव्यत्वादिप्रकारकं ज्ञानं जायत इत्यनुभवसाक्षिकं तन्निर्वाहाय स्वरूपतो घटत्वप्रकारकविशिष्टबु
१५ द्धौ तादृशघटत्वज्ञानत्वेन स्वरूपतो द्रव्यत्वप्रकारकविशिष्टबुद्धौ च तादृशद्रव्यत्वज्ञानत्वेन विशेषणधियो हेतुत्वस्यावश्यकत्वात् नह्यत्रापि विशेषणता।
वच्छेदकप्रकारकनिर्णयत्वेन घटत्वादिज्ञानस्य हेतुता सम्भवति घटत्वादौ विशेषणतान्तरस्याभानात् न चाभ्रान्तानाम एम एम एमम
शब्द पि घटत्वेन पटो नास्तीति व्यवहारमूलकप्रतीतिसत्त्वेनार्थसिद्धौ सर्वमते प्रतीतेरेव शरणत्वेनागत्या व्यधिकरणधर्मावच्छि
न्नाभावादिविषयकज्ञाने युक्तनिर्णयस्य हेतुतानङ्गीकरणीयतया व्यधिकरणधर्मावच्छिन्नाभावादिसिद्धिर्निष्प्रत्यूहै
वेति वाच्यम् घटत्वेन पटो नास्तीत्यादौ घटत्वाभाववान् पटः संयोगेन रूपं नास्तीत्यत्र संयोगाभाववद्रूपं पृथिवीत्वेन ज
लघटोभयं नास्तीत्यत्र पृथिवीत्वाभाववज्जलघटोभयं घटत्वेन द्रव्यं नास्तीत्यत्र घटत्वाभाववद्द्रव्यम् शशशृङ्गं ना
स्तीत्यत्र शशीयत्वाभाववच्छृङ्गमस्तीति रीत्या सर्वत्र सामान्याभावप्रकारकप्रथमान्तविशेष्यकबोधाङ्गीकाराद् न
व्यधिकरणाभावाद्यसिद्धिः न चैवमपि द्रव्यत्वेन घटो नास्तीत्यत्र कथं प्रथमान्तार्थे द्रव्यत्वाभावसिद्धिः तस्य व्यापका
त्वादिति वाच्यम् तत्रागत्या द्रव्यत्वविशिष्टघटाभावस्यैव प्रतीतिविषयत्वोपगमात् न च गवि शशशृङ्गं नास्तीत्यत्रा
नुयोगिवाचकसप्तम्यन्तार्थे एवं तत्र शशीयत्वविशिष्टशृङ्गाभावबोधनाद्व्यधिकरणाभावसिद्धिरिति वाच्यम् शृङ्गे शशी

वत्त्वभ्रमवतां नानेनो बोधसम्भवेऽप्ययथार्थानां बोधानङ्गीकारात् यद्यपि सर्वैरेव घटत्वेन पटो नास्तीत्यादिशब्देन पटे घटत्वाद्यभा
वद्ग्राहकः शाब्दबोधो न शक्यते जनयितुम् अनुयोगिवाचकपदोत्तरसप्तमीविरहेणानिराकाङ्क्षत्वात् तथापि परार्थो।
पस्थित्यादिमूलकतादृशमानसबोधजनने च्छया व्युत्पन्नानामपि तथा प्रयोग इति प्रतियोग्यवृत्तित्वधर्मेण प्रतियो
गितावच्छेदक इति वदतां मणिकाराणामाशयः अयं तादृशाभावसत्त्वे सोन्दडम्प्रति मणिकृता प्रतियोग्यवृत्तित्वे।
त्यादिवाक्यं शाब्दत्वेन परार्थानुमानत्वेन वा प्रमाणं प्रदर्शितम् नाद्यः शब्दमात्रस्य प्रमाणत्वे प्रतियोग्यवृत्तित्वेऽपि प्र
तियोगितावच्छेदक इत्यादिवादिवाक्यस्यापि प्रमाणतापत्तेः न चाप्तवाक्यं प्रमाणम् घटत्वेन पटो नास्तीत्येकस्मा
द्वाक्याच्छाब्दोऽस्ति नास्तीति विरुद्धवदतोः सोन्दडमणिकारयोः कस्याप्तत्वमिति निश्चेतुमशक्यात् अत एव यथो।
यथार्थः ४ नास्तीत्येव प्रतीतिर्न तु पटत्वेनेति यदि तु नरानुभाविकोलोकानां स्वरसंवाही पटत्वेन घटो नास्तीत्यादिप्रत्ययस्तदा तादृशा
भावनिराकरणं गीर्वाणगुरूणामप्यशक्यमिति वदता दीधितिकृतापि तयोराप्तत्वं सन्दिह्यते नापरः प्रतियोग्यवृत्तित्वेत्या
दिवाक्यस्य प्रतिज्ञारूपत्वेऽपि लिङ्गाप्रदर्शनात् व्याप्तिपक्षधर्मताविशिष्टलिङ्गस्यैवानुमानत्वात् मणिकृता प्रतियोग्यवृ
त्तिमात्रे प्रतियोगितावच्छेदकत्वस्य निराकर्तव्यतया पक्षधर्मपदस्य व्यर्थत्वाच्च न च धर्मानुपादानेऽपि प्रतियोग्यवृत्तित्वेन प्रति

अ योगितावच्छेदकः तत्त्वे साधकाभावादिति हेतोरध्याहारेणालाभाद्दोषइति वाच्यम् प्रतियोग्यवृत्तित्वशरीरे साध्यतावा
१५ च्छेदके च सामान्यतः प्रतियोगिप्रतियोगित्वयोर्निवेशे सर्वेषामेव किञ्चिदभावप्रतियोगिनि सम्बन्धतया किञ्चिदभावप्र
तियोगितावच्छेदकतया पक्षसाध्याप्रसिद्धेः न च विशिष्य वाच्यत्वाद्यभावप्रतियोग्यवृत्तित्वावच्छिन्नेवाच्यत्वाद्यभावीय
प्रतियोगितानवच्छेदकत्वं साधनीयमिति वाच्यम् समनियताभावैक्यमते समवायित्वादिना वाच्यत्वाद्यभावस्य घटत्वादि
नापटाद्यभावाभिन्नतया समवायिपटादीनामपि तथाविधवाच्यत्वाद्यभावप्रतियोगितया तद्वृत्तिसमवायित्वादेर्वाच्यत्वा
द्यभावप्रतियोग्यवृत्तितायाद्दुर्घटत्वात् न चात्र प्रतियोगितैव विशिष्योपादाय तत्प्रतियोगितावदवृत्तित्वावच्छिन्ने ।
तत्प्रतियोगितावच्छेदकत्वाभावसाधनमिति वाच्यम् वाच्यत्वादिनिष्ठायाः प्रसिद्धसमानाधिकरणद्वित्वाद्यवच्छिन्ना
भावप्रतियोगिताया उपादाने सिद्धसाधनात् सोन्द्रोपाध्यायैरपि व्यधिकरणसमवायित्वादिधर्मस्य समानाधिकरणधर्मा
वच्छिन्नप्रतियोगितावच्छेदकतानङ्गीकारात् । व्यधिकरणधर्मावच्छिन्नायाश्च प्रतियोगिताया उभयवाद्यप्रसिद्धतया वि
शिष्योपादानासम्भवादिति चेन्न अन्यथैवोपपत्तेः । धर्मपदस्योपलक्षणत्वेन व्यधिकरणसम्बन्धावृत्तिगगनादिसाधार
णपक्षपरतया समवायितया वाच्यत्वं नास्ति घटत्वेन पटो नास्तीत्यादौ विशिष्य समवायित्वादिकं पक्षीकृत्य वाच्य

त्वादिनिष्ठप्रतियोगितावच्छेदकत्वाभावसाधने तादृशप्रतियोगितावद्वृत्तित्वस्यैव हेतुत्वात् । यो यद्वृत्तिः सन्निष्ठप्र त
तियोगितानवच्छेदक इति सामान्यतो व्याप्तिप्रदर्शके प्रतियोग्यवृत्तिघटितहेतुग्रन्थे वीप्सायाभावेपि प्राथम्येन व्याप्तेर्ला
भसम्भवात् न च सोन्दडमते वाच्यत्वाद्यवृत्तिमात्रस्यैव व्यधिकरणत्वेन वाच्यत्वादिनिष्ठप्रतियोगितावच्छेदकतयोभय
सम्मतदृष्टान्तासम्भव इति वाच्यम् अत्रान्वयदृष्टान्तासत्त्वेपि व्यतिरेकेण वाच्यत्वादिनिष्ठोभयत्वादीनां तन्निष्ठप्रतियोगि
तावच्छेदकानां दृष्टान्तत्वसम्भवात् । अवच्छेद्यावच्छेदकमात्रवर्त्तिन्यां यो यद्वृत्तिः स तदनवच्छेदक इति सामा
न्यव्याप्तौ कार्यत्वादिव्यधिकरणत्वेन कार्यत्वाद्यनवच्छेदकपरमाणुत्वादीनां वान्वयदृष्टान्तत्वसम्भवाच्च न च भ्रमज्ञा
नीयविषयतावद्वृत्तिरपि रजतत्वादिकं शुक्त्यादिनिष्ठविषयतावच्छेदकमेवेति व्याप्तेर्भङ्ग इति वाच्यम् विषयताया
यद्वृत्तिरित्यस्यैव युक्तत्वात् न चैवमपि कालिकादिसम्बन्धेन पटादिवृत्तिघटत्वादेः समवायादिना पटादिनिष्ठप्रति
योगितावच्छेदकत्वखण्डनाय तत्तत्सम्बन्धेन प्रतियोग्यवृत्तित्वं तत्तत्सम्बन्धेन प्रतियोगितानवच्छेदकत्वसाधने · पै
स्ततावच्छेदकतया हेतुतया वा विवक्षणीयम् तथा च समवायादिसम्बन्धेन वाच्यत्वादिवृत्तित्वाप्रसिद्ध्योक्तरीत्या सम
वायादिसम्बन्धेन घटत्वादिना वाच्यत्वाद्यभावखण्डनानुपपत्तिरिति वाच्यम् प्रतियोग्यवृत्तित्वमिति ग्रन्थेन वाच्यत्वा

सिंहव्याघ्रापूर्वकल्पेपि दोषमाह ३

समवायेनघटत्वाभाववद्वृत्त्यन्तम्१ वाच्यत्वंसमवायेनघटत्वावच्छिन्नंन२

अ दिप्रतियोगिनिष्ठस्यावच्छेदकताघटक[सम्बन्धावच्छिन्नाभावस्यप्रतियोगित्वंघटत्वादेर्विवक्षणात्ननवाव्याप्यवृत्तेःसंयो
१६ गिसामान्याभावप्रतियोगितावच्छेदकस्यसंयोगात्मकधर्मस्यप्रतियोगिनिष्ठाभावप्रतियोगितयोक्तधर्मस्यपक्षतावच्छेदक
त्वेबाधस्यहेतुत्वेचव्यभिचारस्यदुर्वारतेतिवाच्यम्उक्तधर्मप्रतियोगिनिष्ठभेदप्रतियोगितानिरूपितस्यावच्छेदकताघटकसम्बन्धा
वच्छिन्नावच्छेदकत्वस्याङ्गीकारादिति· इदंपुनरिहावधेयम्· अत्रमूलावच्छिन्नोवृक्षोनकपिसंयोगीतिप्रतीत्यामतभेदेनभेद
स्याप्यव्याप्यवृत्तित्वेसुतरामगतिः उक्तहेतोश्चविपक्षवृत्तितयानसाध्यसाधकत्वम्· हेतुसाध्ययोरत्यन्ताभाववत्तयानियम्यत्वेनका
र्यकारणभावादिघटितव्याप्त्यभावेनशिथिलमूलतयाविपक्षबाधकतर्कोनवकाशात्· एवंघटत्वेनपटोनास्तीत्याकारणा
व्यभावप्रत्ययस्यानुभाविकतया· प्रतियोगिविशेषणतापन्नस्यैवप्रतियोगितावच्छेदकत्वमभावप्रत्ययोऽवगाहतइत्यपिना
नियमः तादृशप्रतीत्यास्वातन्त्र्येणभासमानेघटत्वादौघटनिष्ठप्रतियोगितावच्छेदकत्वावगाहनात्अन्यथाघटत्वेनेत्याका
रतानुपपत्तेः नचतृतीयान्तस्यघटेऽन्वयः खण्डयिष्यमाणत्वात्तथाचघटत्वेनपटोनास्तीत्यादावपिघटत्वादौपटादिनिष्ठप्र
तियोगितावच्छेदकत्वावगाहनंनिराबाधमेवेतिव्यधिकरणधर्मावच्छिन्नाभावसिद्धिर्निष्प्रत्यूहैव नचतत्रव्यधिकर
णधर्मादेरवच्छेदकत्वावगाहनसम्भवेप्यतिरिक्ताभावकल्पनागौरवभयेनतादृशप्रतीतेःपटाद्यधिकरणकघटत्वाद्यभावा

वगाहित्वमेव स्वीक्रियत इति वाच्यम् न ज्ञात्यन्ताभावबोधनेऽनुयोगिबोधकपदोत्तरं सप्तम्यपेक्षणात् · प्रतियोग्युत्तरष
ष्ठीयानुपपत्तेः । असति बाधे तच्छब्दोल्लेखिप्रतीतेः नञ्छब्दप्रतिपाद्यार्थविषयकत्वपरित्यागानौचित्याच्च पटे घट
त्वाद्यभावस्य घटत्वेन पटो नास्तीत्यादिशाब्दात्कथमप्यप्रतीतेः प्रतीतिबलात्सदा—र्थसिद्धौ पदार्थान्तरकल्पनागौ
रवस्य फलमुखत्वेनाबाधकत्वात् न च प्रतियोगितावच्छेदकविशिष्टप्रतियोगिनिर्णयरूपकारणबाधेन तादृशप्रतीतेः
व्यधिकरणधर्मावच्छिन्नाभावावगाहितानसम्भवतीति वाच्यम् पटत्वाद्यवच्छिन्नधर्मिकघटत्वादिप्रकारका
निर्णयत्वेन प्रतियोगिज्ञानस्य हेतुतायां मानाभावात् · चक्षुःसन्निकर्षादिसत्त्वे तादृशनिर्णयं विनैव घटत्वेन पटो
नास्तीत्याद्याकारस्य घटत्वादिविशेषितपटादिवैशिष्ट्यावगाहिनोऽभावप्रत्यक्षस्य स्वीकारात् वस्तुतस्तु तादृशा
भावबुद्धौ स्वातन्त्र्येण प्रतियोगितावच्छेदकविशिष्टप्रतियोगिनिर्णयस्य हेतुता नास्ति · फलाभावात् · न च तदकल्प
ने प्रतियोग्यनुयोगिज्ञानशून्यकाले नास्तीत्याकारकप्रतियोग्यविषयकाभावप्रत्यक्षस्य घटत्वादिनिर्विकल्पकानन्तरं
विशेष्यविशेषणामिति रीत्या घटाद्यभावप्रत्यक्षस्य चापत्तिरिति वाच्यम् प्रतियोगिज्ञानहेतुतामतेऽप्यभावः प्रतियोगिन
या घटवानित्यादिरूपप्रतियोगिज्ञानविरोधिनोऽभावः प्रतियोगिनपाघटाभाववानिति बाधादिरूपप्रतियोगिनिर्णयस्य

अ· सत्वेप्रतियोग्यविषयकाभावप्रत्यक्षापत्तेर्दुर्वारत्वात् यदि च नियमतो धर्मितावच्छेदकताद्यवगाहिज्ञानस्यैव बाधादि
१७ बुद्धिप्रतिबध्यतयातद्प्रतिबध्यनिर्धर्मितावच्छेदककघटीयइत्याकारप्रतियोगिविशेषिताभावज्ञानेबाधकाभावा
त् प्रतियोग्यविषयकाभावप्रत्ययो नापादयितुं शक्यत इत्युच्यते तथापि तादृशबाधदशायां प्रतियोगिनिरूपितध
र्मितावच्छेदकतानापन्नाभावत्वप्रकारकस्य स्वातन्त्र्येण प्रतियोगिविषयकस्य च · नास्ति · घटीयश्चेत्याद्याकार
कसमूहालम्बनप्रत्यक्षस्यापत्तिर्दुर्वारा यदि च प्रतियोगितासम्बन्धेन प्रतियोगिप्रकारतानिरूपितधर्मितावच्छे
दकतापन्नावृत्तिप्रकारतासम्बन्धेन लौकिकप्रत्यक्षं प्रत्यभावत्वभेदस्य पृथक्कारणतां कल्पयित्वा · नास्ति · घटीयश्चेत्या
पत्तिर्वार्यते तदानावत्तैव सकलापत्तिवारणादलं प्रतियोगिज्ञानहेतुतया न चैवमपि प्रतियोग्यविषयस्याभावत्वाप्र
कारकप्रत्यक्षस्यापत्तिर्विना प्रतियोगिज्ञानहेतुतां न शक्यते वारयितुमिति वाच्यम् प्रतियोगिज्ञानं विना प्रतियोग्यविष
यकस्येदन्त्वप्रमेयत्वादिनाऽभावप्रत्यक्षस्य · इदन्त्वादिरूपतादृशविशेषणज्ञानासत्त्वे तु तादृशाभावनिर्विकल्पस्यैवे क २
ष्टत्वात् किंचाभावनिर्विकल्पकानुपगमेऽपि प्रतियोगिज्ञानहेतुतयापीदन्त्वादिनाऽभावप्रत्यक्षवारणासम्भवः। इदन्त्वा
दिनाऽभावप्रत्यक्षे व्यभिचारवारणाय तत्तत्प्रतियोगिविशेषिताभावत्वप्रकारकाभावप्रत्यक्षं प्रत्येव तत्तत्प्रतियोगिज्ञान

अभावाभाववत्ते इत्याकारस ४

१५ स्वहेतुतायावाच्यतयाप्रतियोग्यविशेषिताभावप्रत्यक्षेतद्विरहस्याकिञ्चित्करत्वात् यदिच विशेषणानवच्छिन्नविषयतास
म्बन्धेनप्रत्यक्षम्प्रत्यभावभेदस्यहेतुतांस्वीकृत्यनेत्याकारकाभावनिर्विकल्पकंवार्य्यतेतदाममापितस्यतथैववारणीय
त्वादलंप्रतियोगिज्ञानादीनांहेतुत्वेनवस्तुतस्तु यादृशफलस्य क्वचित्प्रसिद्धंतस्यैवापत्तिः सम्भवति क्लृप्तसामग्रीबलात्त
ननुसर्वथाप्रसिद्धस्याभावनिर्विकल्पकस्यापादकाभावात् अन्यथागोरिवाश्वादीनामपिशृङ्गमापद्येत। अत्रघटत्वा
द्यवच्छिन्नप्रतियोगिताकाभावस्ययदाभानंतदानिर्विकल्पकोपस्थितद्रव्यत्वादेर्विशेष्यविशेषणमितिरीत्या
घटाद्यंशेभानापत्तिरुक्तनिर्णयादिबाधेननशक्यतेवारयितुम्॰ तादृशाभावस्यद्रव्यत्वावच्छिन्नप्रतियोगिताकत्व
विरहेणतज्ज्ञानेद्रव्यत्वादिप्रकारकनिर्णयस्यानपेक्षणादित्यादिदोषनिरसनंमतद्वयेपितर्ककुशलैरूहनीयम् यत्तु।
अनाहार्य्यप्रतियोगितावच्छेदकविशिष्टप्रतियोगिप्रकारकोपलम्भविरहोविशेष्यीभूतधर्मिमत्यासत्त्याभावप्रत्यक्षेहेतुः
तथाचयस्यपुंसोघटत्वादिविशिष्टपटादिप्रकारकभूतलादिविशेष्यकघटत्वेनपटवद्भूतलमित्याकारकोऽनाहा।
र्य्यभ्रमोऽप्रसिद्धः तदीयोऽत्रघटत्वेनपटोनास्तीत्याकारकप्रत्ययोनव्यधिकरणधर्मावच्छिन्नाभावमवगाहितुंशक्यतेनतदी
यतादृशप्रतियोग्युपलम्भाभावरूप¯स्यतत्पुरुषीयतादृशाभावप्रत्यक्षकारणस्याप्रसिद्धेरिति तत्पुरुषीयतादृशंप्रत्यप
पटत्वेनपटोनास्तीति१

आ स्यपटाद्यनुयोगि —क घटत्वाद्यभावविषयकत्वेङ्गीकारे सर्वत्रैव तद्विषयकत्वमुचितम् एकाकारप्रतीतेः पुरुषभे
१९ देन विषयतावैचित्र्यविरहादिति मिश्रोक्तव्यधिकरणधर्मावच्छिन्नाभावनिराकरणपन्थाः सोपि न साधीयान्
तदभावबुद्धौ स्वप्रतियोगितावच्छेदकविशिष्टस्वप्रतियोगिमत्त्वोपलम्भाभावत्वेनैककारणतायाः सत्त्वाननु
गमेन तद्वैवचनया विशिष्येव कारणताकल्पनस्यावश्यकत्वे यत्र घटवद्भूतलमित्यादिरूपतादृशोपलम्भप्रसिद्धिस्त
त्रैव तादृशोपलम्भानन्तरं घटाभाववद्भूतलमित्याद्याकाराभावप्रत्ययवारणाय तदभावहेतुतोपगमाद्व्यधिकरणधर्मा
वच्छिन्नाभावबुद्धौ बाधबुद्धेः क्वचिदप्रसिद्ध्या तदभावहेतुत्वासम्भवेपि सन्निकर्षादिघटितसामग्रीतस्तादृशाभावप्र
त्यक्षोत्पत्तौ बाधकाभावात् यदि चाभावाधिकरणविशेष्यकप्रतियोगिप्रकारकोपलम्भस्य क्वाचित्कप्रतिबन्ध——
कत्ववत् पूर्वोक्तसमूहालम्बनाद्यनन्तरं रक्तपटो नास्तीत्यादिविशिष्टवैशिष्ट्यावगाहिप्रत्ययापत्तिभयेन क्वचित्प्रतियो
गितावच्छेदकप्रकारकनिर्णयस्य हेतुता विभाव्यते तथाप्यधिकाभावबाधकसामान्यकार्यकारणभावानङ्गीका
रान्न दोषः एतन्मते घटः पटत्वेन न घट इति प्रतीत्या व्यधिकरणधर्मावच्छिन्नभेदोप्यतिरिक्तः अत एव व्यधिकरणध
र्मस्यात्यन्ताभावप्रतियोगितावच्छेदकत्ववदन्योन्याभावप्रतियोगितावच्छेदकतायामप्यविवाद इति गदाधरोक्तिः

तथासमवायितयावाच्यत्ववद्भेदोपिदुर्ग्रहमितिपक्षधरोक्तिरपिसंगच्छते॰ एवंसंयोगेनघटत्वेनपटोनास्तीत्यादिप्रतीत्या
संयोगेनघटत्वेनपटवद्भूतलमित्येवंनिर्णयसत्त्वेभूतलेसंयोगेनघटत्वेनपटोनास्तीतिनप्रत्ययः किंतुसमवायेनतन्ना
स्तीतिप्रतिबध्यप्रतिबन्धकभावानुरोधेनचव्यधिकरणधर्मावच्छिन्नाभावादिप्रतियोगितातत्तत्सम्बन्धावच्छिन्नापि
वाच्या तदुक्तंदीधितौ व्यधिकरणधर्मावच्छिन्नोपिचेदभावःप्रामाणिकस्तदासर्वैसम्बन्धैस्तत्प्रतियोगिताऽवच्छिद्य
तामिति॰ एवंसामान्यरूपेणविशेषाभावादयोपितत्तत्प्रतीतिबलेनोक्तरीत्याप्रतिबध्यप्रतिबन्धकभावानुरोधेनचा
तिरिक्ताएवकल्पनीयाः तथाचातिरिक्ताभावानङ्गीकर्तृमणिकाराद्यङ्गीकर्तृसोन्दडादिसूक्ष्मदर्शिभ्यांजल्पेप्रती
तीनामेवमध्यस्थतयायदिपटोनास्तीत्यादिप्रतीतिवद्घटत्वेनपटोनास्तीत्यादिप्रतीतीनांप्रामाण्यंनातदातिरिक्ता
भावाङ्गीकारेपिनदोषः एवमेवोक्तंदीधितिकृतापि अभावप्रत्ययोहिघटत्वादिविशिष्टघटादेः प्रतियोगित्व
मवगाहमानोविशेषणस्यापिघटत्वादेस्तदवच्छेदकत्वमवगाहते॰नस्वातन्त्र्येण॰घटोनास्तीत्येवप्रतीतेर्नतु
पटत्वेनेति यदिपुनरानुभाविकोलोकानांस्वरसवाहीपटत्वेनघटोनास्तीत्यादिप्रत्ययस्तदानादृशाभावनिराक
रणंगौरवाणगुरूणामप्यशक्यमिति नचातिरिक्तप्रतियोगिताकल्पनमेवगौरवमितिवाच्यमननुगतप्रतीतीनांव्य

अ र्थत्वकल्पनापेक्षेदृशगौरवस्याकिञ्चित्करत्वात् — वस्तुतस्तु भेदेप्यवच्छेद्यावच्छेदकभावस्वीकाराच्च घटसामान्या
१९ भावीयप्रतियोगितास्वावच्छेदकस्वरूपानतथानदतिरिक्ताभावस्थले प्रतियोग्यंशे प्रकारीभूतासाधारणधर्मेणैव प्रतियो-
गितारूपतयावच्छिद्यन्तांस्वावच्छेदकधर्मेण नचैवमपि घटवति घटत्वेन पटो नास्तीत्यादिप्रतीत्यनुपपत्तिः अभावानां प्र-
तियोगितावच्छेदकधर्मावच्छिन्नवत्तामात्रेण विरोधादिति वाच्यम् सोन्डुमतेन प्रतीतिबलाद्व्यधिकरणधर्मादेः प्र-
तियोगितावच्छेदकत्वसिद्धौ सत्यां प्रतियोग्यंशे प्रकारीभूतधर्मविशिष्टप्रतियोगितावच्छेदकावच्छिन्नेनैव साधर्मना-
यत्याभावानां विरोधिताङ्गीकारात् अत्रात्यन्ताभावत्वेनान्योन्याभावत्वेन चैतेषां सङ्ग्रहान्न चतुर्धाभावविभागानुपपत्तिरा-
पीति दिङ्मात्रं प्रदर्शितमधिकन्त्वन्यत्रान्वेषणीयं तर्करसिकैरिति॰ पटो नास्ति पटो न पटाभाव इत्यादौ सर्वत्राभावे प्रतियो-
गिनः पटादेरन्वयितावच्छेदकपटत्वाद्यवच्छिन्नप्रतियोगिताकत्वसम्बन्धेनान्वयः न तु प्रतियोगितामात्रेण पट-
वत्यपि पटो नास्तीति प्रत्ययापत्तेः॰ पीतपटो नास्तीत्यादौ तु पीतपटत्वस्यान्वयितावच्छेदकत्वे तादृशधर्मावच्छिन्नप्रतियो-
गिताकत्वमेव संसर्गः न तु पीतत्वादिप्रत्येकावच्छिन्नप्रतियोगिताकत्वं पीतघटस्य नीलपटस्य चाधिकरणे तादृशप्र-
योगापलापापत्तेः॰ पीतोपलक्षितस्य पटत्वमात्रस्यान्वयितावच्छेदकत्वे तु पटत्वावच्छिन्नप्रतियोगिताकत्वमेव तथा॰

संयोगेनपटोनास्तीत्यादौतुतृतीयाविभक्तेर्नावच्छिन्नत्वमर्थः पदार्थः पदार्थेनान्वयइत्यादिव्युत्पत्तिविरोधेनसंसर्गीभू
तप्रतियोगितायांतदन्वयासम्भवात् नाप्यभावान्वयिप्रतियोगिताकत्वम् संयोगेनपटाभावस्यैवसमवायेनपटविशि
ष्टद्रव्यत्वाभाववत्तयासमवायेनतन्तौपटोनास्तीतिव्यवहारापत्तेः वैशिष्ट्यंचात्रसंयोगेनपटाधिकरणेसमवायेनवृ
त्तित्वरूपम् अपितुतृतीयान्तसमभिहारस्थलेतृतीयार्थस्यैवप्रतियोगित्वस्यप्रतियोगिसंसर्गतयापिभानमि
तिनोक्तदोषः समवायावच्छिन्नपटप्रतियोगिताकाभावस्यतन्तौविरहात् यदिचोक्तप्रतियोगित्वस्यतृतीयार्थत्वे
तस्यापिसम्बन्धान्तरभानापत्तिः शाब्दपदार्थसंसर्गभानेनैयम्यादित्युच्यते तदा तु पटत्वावच्छिन्नत्वस्यैवसंयोगा
दितत्तत्सम्बन्धावच्छिन्नत्वस्यापिप्रतियोगित्वांशे संसर्गमर्यादयैवभानम् नचयत्रसंयोगेनपटोनास्तितत्रसमवा
येनतन्तौनास्तीतिप्रमित्यापत्तिः अपदार्थीभूततादृशसंसर्गस्यसर्वत्रैवभानसम्भवादितिवाच्यम् तत्र तृतीयान्तसमभि
व्याहारस्यनियामकत्वादेवसकलापत्तिवारणात् एवमन्यत्रापि गदाधरास्तु घटत्वेनपटोनास्तीतिवाक्यादिवपट
त्वेनपटोनास्तीत्यादिवाक्यान्नशाब्दबोधः गम्यतेकर्मेत्यादिप्रयोगापत्तिभयेनतद्वृत्तितदन्वयासम्भवेनप्रथमान्तार्थप
टत्वाद्यवच्छिन्नेतृतीयान्तोपस्थाप्यपटत्वाद्यवच्छिन्नत्वान्वयासम्भवात् नापिप्रथमान्तार्थेतदभावान्वयः तत्रपट

अ त्वस्यैव सत्त्वात् नापि तृतीयार्थावच्छिन्नत्वस्य संसर्गीभूतप्रतियोगितायामन्वयः। पदार्थतद्रूपसंसर्गस्यैवाकाङ्क्षा
२१ नियम्यत्वात् अपदार्थेन पदार्थस्य योग्यताविरहाच्च न च प्रथमान्तपदोपस्थाप्यतावच्छेदके पटत्वादौ तृतीयार्थाभे
देन पटत्वादीनामन्वयः। धान्येन धनवानित्यादौ तृतीययाऽभेदबोधनादभेदप्रकारकबोधे विरुद्धविभक्तिराहित्यान
पेक्षणादिति वाच्यम् पटत्वादिजातेः स्वरूपत एव पटादिपदशक्यतावच्छेदकतयाऽन्वयितावच्छेदकरूपेणा
नुपस्थितेस्तत्र पदार्थान्तरान्वयानुपपत्तेः। अभेदेन पटपदार्थैकदेशेऽन्वयानुपपत्तेश्च नापि पटवत्त्वान्तन्त्रेण प्र
तियोगितया पटत्वस्याभावेऽन्वयः। एकस्यैव पटाभावस्योभयप्रतियोगिकतया पटत्वेन पटो ध्वस्त इत्यत्र पटत्वन्ध्वस्त
म् पटे समवायेन पटो नास्तीतिवत् पटत्वं नास्तीत्यादिव्यवहारापत्तेः तृतीयार्थान्वयानुपपत्तेश्च किन्त्वत्र विशकलितपदा
र्थोपस्थित्यादिमूलकतादृशमानसबोधजननेच्छया व्युत्पन्नानां तथाप्रयोग इत्याहुः। परे तु यदि संयोगेन पटत्वेन पटो
नास्तीत्यादिवाक्याच्छाब्द एवेत्याग्रहस्तदा तु संयोगाद्यवच्छिन्नपटत्वाद्यवच्छिन्नप्रतियोगिताकत्वमेवाभावे प
टादीनां संसर्गः तृतीयान्तयोरुक्तविलक्षणसंसर्गीभूतप्रतियोगितायां तात्पर्यग्राहकत्वादेवोपपत्तेः एवं पटत्वेन पटो
नास्तीत्यादावपीत्याहुः। पीतः शङ्खो नास्तीत्यादिशाब्दबोधस्तु न शङ्खत्वावच्छिन्नतया प्रतियोगित्वमवगाह

ते· तन्मात्रस्यान्वयितानवच्छेदकत्वात्· शङ्खवन्न वा निश्चितेधर्मिण्यपि तादृशप्रयोगात् परन्तु पीतशङ्खत्वा
वच्छिन्नप्रतियोगितात्वेनसंसर्गमर्यादया प्रतियोगित्वमवगाहते नञादिपदानां यद्धर्मविशिष्टे वैशिष्ट्यावगाहि।
त्वोपस्थाप्याभावधर्मिकान्वयबोधजनकत्वं तद्धर्मावच्छिन्नप्रतियोगितात्वेनप्रतियोगितासंसर्गकान्वयबोध
जनकत्वमिति व्युत्पत्तेः इयांस्तु विशेषः पटो नास्तीत्यादिशाब्दे सांसर्गिकी प्रतियोगितावगाहित्वमप्रसिद्धं न पटत्वा।
द्यवच्छिन्नप्रतियोगितात्वेनैव· पीतः शङ्खो नास्तीत्यादौ तु पीतशङ्खत्वाद्यवच्छिन्नप्रतियोगितात्वेनाप्रसिद्धेनै
वेति कौस्तुभकारास्तु केवलप्रतियोगितासम्बन्धेनाभावे प्रतियोगिनो भानाङ्गीकारे यत्किञ्चिद्घटवत्यपि घटान्त
राभावसत्त्वाद्घटो नास्तीत्यादिप्रतीत्यापत्तिः तेन नञ्समभिव्याहारे न्वयितावच्छेदकावच्छिन्नप्रतियोगितानिरू-
पितानुयोगितासम्बन्धेनैवाभावांशे प्रतियोगिनो भानमिति व्युत्पत्त्यङ्गीकार्य्यम् न च कम्बुग्रीवादिमान्नास्तिप्रमे
यघटो नास्तीत्यादौ गुरुधर्मकम्बुग्रीवादिमत्त्वाद्यवच्छिन्नप्रतियोगित्वाप्रसिद्ध्या नोक्तव्युत्पत्तिसम्भव इति वाच्यम्
त्रगत्या गुरुधर्मस्याप्यनुभवबलेन प्रतियोगितावच्छेदकताङ्गीकारात् न च तथापि पीतः शङ्खो नास्तीत्यादावग
तिः पीतशङ्खत्वादेर्विशिष्टस्यान्वयितावच्छेदकस्याप्रसिद्धत्वादिति वाच्यम् तत्र पीतपदस्य पीतत्वप्रकारकद्या

श्र नविषयेलाक्षणिकतयातादृशज्ञानविषयत्वविशिष्टशङ्खत्वस्यप्रसिद्धत्वेनादोषात् · एवमन्यत्रापि · एतेना
९ पुष्करिणीपांजलंनास्ति चैत्रस्यज्ञानंनास्ति तस्मात्यज्ञेवधोऽवधइत्यादावुक्तव्युत्पत्तिभङ्गोपि परास्तः नत्रजलादिपद
स्य प्रकृष्टजलत्वाद्यवच्छिन्नेनञ्समभिव्याहृतवधशब्दस्यपापसाधनवधत्वाद्यवच्छिन्नेलाक्षणिकत्वोपगमादित्याहुः
केचित्तु नञ्समभिव्याहारभेदेनव्युत्पत्तिभेदात्पीतः शङ्खोनास्तीत्याद्युक्तस्थलेउक्तव्युत्पत्तेरनङ्गीकारेणप्रतियो
गितानिरूपितानुयोगितासम्बन्धेनैवप्रतियोगिनोऽभावेऽन्वयेनलक्षणांविनैवनिर्वाहइत्याहुः अथभूतलेघटो
नास्तीत्यादावत्यन्ताभावबोधोभूतलेनघटइत्यादौचान्योन्याभावबोधइत्यत्रकिंनियामकंवैपरीत्येनापिबोधे बाध
काभावादितिचेन्न नञ्विनिर्मोकेयत्रभेदसम्बन्धेनान्वयबोधस्तत्रनञात्यन्ताभावोबोध्यते यत्रचनहिनिर्मोके
भेदेनान्वयस्तत्रनञान्योन्याभावोबोध्यतेइत्युपगमात् नचनञ्विनिर्मोकेक्वचिद्भेदेनान्वयबोधः क्वचिच्चाभेदे
नेत्यत्रैवकिंनियामकमितिवाच्यम् शब्दस्वभावस्यतत्तदाकाङ्क्षाज्ञानादेरननुगतस्यैवतत्रनियामकत्वाङ्गीकारा
त् यत्तुभेदेनान्वयबोधेविरुद्धविभक्तिमत्त्वमभेदेनबोधेतुविरुद्धविभक्तिराहित्यमेवनियामकं दधिसुन्दरमित्यादौच
लुप्तविभक्तेरनुसन्धानादेवबोधइत्याहुस्तन्न विरुद्धविभक्तिराहित्यस्यतादृशबोधनियामकत्वेनीलादिपदस्यविरुद्ध

विभक्तिमत्त्व भ्रमकालेपिनीलघटमानयेत्यादावभेदान्वयबोधापत्तेः। तज्ज्ञानस्य नघात्वेचविरुद्धविभक्तेरनुपस्थिति
कालेउक्तस्थलेविद्यमानस्यापिविरुद्धविभक्तिराहित्यस्यज्ञानासम्भवेनशाब्दबोधानुपपत्तेः नचविरुद्धविभक्ति
मत्त्वेनाज्ञायमानत्वंतादृशबोधेनियामकमितिवाच्यम्‌उक्तस्थलेमैत्रस्यविरुद्धविभक्तिमत्त्वेनज्ञानेचैत्रस्यापि
तादृशबोधानुपपत्तेः नचचैत्रीयतादृशबोधेविरुद्धविभक्तिमत्त्वेनचैत्रेणाज्ञातत्वंनियामकमितिवाच्यम्‌
तथासतिपुरुषभेदेनाननुगतहेतुतापत्तेः किंचविरुद्धविभक्तिमत्त्वेनाज्ञायमानत्वंनाम वस्तुगत्याविरुद्धायाविभ
क्तिलङ्घनेनाज्ञायमानत्वं विरुद्धविभक्तित्वावच्छिन्नप्रकारकज्ञानाविशेष्यत्वंवा नाद्यः नीलोघटइत्यादौनी
लादिपदोत्तरविभक्तेरमपदत्वादिग्रहदशायामप्यभेदान्वयबोधापत्तेः नान्त्यः नीलोघटमित्यादावमादेर्वि
शेषणवाचकपदानुत्तरत्वरूपविरुद्धत्वविभक्तित्वंचाजानतामभेदान्वयबोधप्रसङ्गात्‌ लोकंपचतिधान्ये
नधनवानित्यादौपाकादौलोकाद्यभेदान्वयबोधेविरुद्धविभक्तिराहित्यासम्भवाच्च अत्रवैयाकरणास्तु नञ
र्थोनाभावः तथासत्यघटइत्यादौघटभिन्नइतिबोधेतत्पुरुषस्योत्तरपदार्थप्राधान्यभङ्गापत्तेः किंचासइत्या
दौसञ्ज्ञोपसर्जनीभूतास्तुनसर्वादयइतिनिषेधात्सर्वनामकार्याभावप्रसङ्गः। अतिसर्वाइत्यादिवत्ताञ्भावे

यश्चार्थार्थो न स चोदनार्थ इत्याहुः शवरस्वामिनः २

अ· प्रतियोगिनो विशेषणत्वस्य सर्वमतसिद्धत्वेनोपसर्जनत्वात् इतरपदार्थविशेषणत्वस्यैवोपसर्जनत्वान्नञ्त्रा दारोप
२२ विषयत्वं नञर्थः। आरोप एव वा। विषयत्वं तु संसर्गः। एवं चाघट इत्यादावारोपितो घट इत्यादिबोधः। असद् इत्यादौ च
तत्पदार्थस्य विशेष्यत्वान्न दोषः। घटो नास्तीत्यादावप्यारोपितघटास्तित्वमित्यादिबोधः। एवं च घटो नास्तीत्यादावार्थि
कोभावमभावज्ञानं चादापनञर्थो विशेष्यको बोधः प्रतियोगिज्ञानप्रतिबन्धकत्वादिकं चाङ्गीकरणीयमित्याहुः।
वैयाकरणनव्यास्तु समास एवारोपितत्वं नञर्थः। असमासे घटो नास्तीत्यादौ त्वभाव एव नञर्थः। अनुभवसिद्धाभावबु
द्धेरपलापे मानाभावादित्याहुः। न द्वयमप्यसत् सर्वत्राभावबोधस्यानुभविकत्वात् आरोपत्वस्याननुगतस्य दुर्वच
त्वेनारोपस्यापि नञर्थत्वे गौरवाच्च न चोक्तदोषः। अर्धपिप्पलीत्यादितत्पुरुषस्य पूर्वपदार्थप्राधान्येन तत्पुरुषस्यो
त्तरपदार्थप्राधान्यनियमस्यैवासिद्धेः नाप्यसद् इत्यादौ सर्वनामकार्याभावप्रसङ्गरूपो दोषः न नञ्तत्त्वस्य सर्व
नामसञ्ज्ञाया एतत्तदोः सुलोपोऽकोरनञ्समासे हलीति ज्ञापकादेव सम्भवात् अन्यथा हल्ङ्याब्भ्य इत्यादिसू
त्रेण सुलोपे सः शिव इत्यादावेतत्सूत्रप्राप्तेरेवाभावात् अकोरित्यकच्सहितत्यादव्यावृत्त्या सर्वनाम्न एवास्य
प्राप्तेः तस्मात्सर्वत्र नञर्थोऽभाव एव एतेन तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता अप्राशस्त्यं विरोधश्च न

अब्राह्मणो वेदपाठकः१ शिवेऽपापम २ गौरनश्वः ३ अनुदरा कन्या ४ राजपुरोहितोऽब्राह्मणः ५ असुरः अविद्या इति क्रमादुदाहरणम् १

ञर्थाः षट्प्रकीर्तिता इत्यपि परास्तम् सादृश्यादिबोधस्य लक्षणयैवोपपत्तावभावमात्रस्यैव नञर्थत्वात् अत्र प्राभाक
रास्तु भूतलादिरूपाधिकरणेनैवाभावव्यवहारोपपत्तावतिरिक्ताभावे मानाभावात् अधिकरणातिरिक्ताभावस्वरूपस्य
दुर्वचत्वाच्च नातिरिक्तोऽभावः तथाहि न तावत्कपालाद्यतिरिक्ते ------ कपालाद्यधिकरणके घटादिध्वंसे प्रमाणमस्ति
कपालाद्यतिरिक्तघटादिध्वंसस्याननुभवात् तदुक्तं दृष्टलावद्ययं घटोऽत्रेयेन न स्फुटं तथा मुद्गरेण हतस्त्वेवपरं संहतिः परिमितोऽभावो न दृ
ष्टः परः तेनाभावरुतिश्रुतिः क्व निहिता किंचात्र तत्कारणं साधीनाकलशस्य केवलमियं दृष्टा कपालावलीति यत्तूक्तमधिकरणाति
रिक्तध्वंसानङ्गीकारे मोक्षस्यासाध्यत्वापत्तिः तस्यात्यन्तिकदुःखध्वंसरूपतया तस्य चात्मरूपतया नित्यत्वेनासाध्यत्वादिति तन्तुच्छम्
नित्यसुखाभिव्यक्तेरेव मोक्षत्वात् भवतु वाऽऽत्यन्तिकदुःखध्वंसस्य मोक्षत्वं तथापि न क्षतिः मोक्षस्यात्मरूपतया नित्यत्वेपि मोक्षत्वा
वच्छिन्नाधिकरणताया एव साध्यत्वोपगमात् नैयायिकमतेप्यधिकरणताया अतिरिक्तत्वात् वस्तुतस्तु यस्य पृथिवीत्वेन दण्डा
द्यसाध्यत्वेपि घटत्वेन तत्साध्यत्ववत् आत्मरूपमोक्षस्यात्मत्वेनासाध्यत्वेपि दुःखध्वंसत्वेन साध्यत्वोपगमान्न दोषः अतएव
घटादिध्वंसस्य कपालादिरूपतया मुद्गरपातादिसामग्रीसाध्यत्वानुपपत्तिः कपालादेः सिद्धत्वादित्यपि निरस्तम् अन्वयव्यतिरे
काभ्यां घटादेः स्वसामग्रीसाध्यत्ववत् अधिकरणात्मकघटादिध्वंसस्यापि ताभ्यां घटादिध्वंसत्वेन मुद्गरपातादिसामग्रीसाध्यत्वे

पदार्थो द्विविधः भावोऽभावश्चेति तर्कामृतकारादिमतेनेदम् ।

ख० पगमेनादोषात् अभावत्वं सादिवृत्ति पदार्थविभाजकोपाधित्वात् भावत्ववदित्यनुमानस्य च विपक्षबाधकतर्का
२२ भावेन तदसाधकत्वात् कपालरूपध्वंसस्यापि सादित्वेन सिद्धसाधनत्वाच्च ननु तत्त्वज्ञानीनामदृष्टोत्पत्तिकारणाय मि
थ्याज्ञानजन्यवासनाध्वंसः आद्यतत्त्वज्ञानध्वंसो वाऽदृष्टे प्रतिबन्धकः कल्प्यत इति ध्वंससिद्धिर्दुर्वारेति चेन्न प्रतिबन्धक
त्वकल्पने गौरवात् उक्तापत्तेर्वासनानामनुगतवासनात्वेन हेतुत्व एव वारणासम्भवाच्च वस्तुतः प्राचीननैयायिकानां घ
टस्यैव स्वप्रागभावध्वंसत्ववत् स्वध्वंसप्रागभावत्ववच्चाद्यतत्त्वज्ञानस्यैव मिथ्याज्ञानजन्यवासनाध्वंसत्वकल्पनसम्भवेन तद्धे
तुत्वेऽपि नातिरिक्तध्वंससिद्धिः । एवं प्रागभावेऽप्यधिकरणातिरिक्ते प्रमाणाभावः । उत्पत्तेः पूर्वं कपालादौ घटो नास्तीत्यादिप्र
तीतेः कपालाद्यधिकरणैरेवोपपत्तेः इहेदानीं घटप्रागभाव इत्यादिप्रत्ययस्य च स्ववासनामात्रकल्पितत्वेन तदसाधकत्वा
त् इहेदानीं घटो भविष्यतीत्यादिप्रत्ययस्य चोत्पत्स्यते भविष्यतीत्यनयोः समानविषयकत्वेन भविष्यत्कालीनोत्पत्तिमत्त्व
विषयकत्वात् अभावत्वं विनाशिवृत्ति पदार्थविभाजकोपाधित्वात् भावत्ववदित्यनुमानस्य च पूर्ववन्निरसनीयत्वे
न प्रागभावासाधकत्वात् नन्वेकस्माद्वह्निसंयोगाद्रूपरसादेरुत्पत्तौ कार्यभेदार्थं प्रागभावोऽङ्गीकार्यः तत्र समवायिकारणद्र
व्यासमवायिकारणवह्निसंयोगयोरभेदेन तद्भेदस्य कार्यभेदानिर्वाहकत्वादिति चेन्न तत्र वह्निसंयोगानां भेदकल्पनेन ।

वर्त्तमानकालोत्तरकालोत्पत्तिको घट इति बोधः ४

तद्रूपासमवायिकारणभेदेनैव रूपरसादिकार्यभेदनिर्वाहात् आवश्यकं च रूपादीनां परस्परवैलक्षण्यप्रयोजकत-
यातद्भेदकल्पनम् अन्यथा सलक्षणानां बहूनां घटादीनां प्रागभावभेदेप्यवैलक्षण्येन प्रागभावभेदस्य वैलक्षण्यप्रयो-
जकतया रूपादीनां परस्परवैलक्षण्यानुपपत्तेः वस्तुतस्तु रूपादिमति भाविरूपादिप्रागभावसत्वेन तदापत्तिवारणाय
रूपादौ रूपत्वादिना प्रतिबन्धकतामुपेत्य रूपत्वाद्यवच्छिन्नं प्रति रूपत्वाद्यवच्छिन्नाभावस्य रूपादिसामग्रीनाश्यशक्ति-
विशेषस्य वा कारणत्वमवश्यमिति तत एव रूपादीनां परस्परं वैलक्षण्यस्य भेदस्य च निर्वाहे न प्रागभावसिद्धिः यत्तु-
घटत्रयादिविषयकापेक्षया बुद्ध्या द्वयोः त्रिचतुरादिषु च द्वित्वस्य वारणाय प्रागभावोवश्यमङ्गीकार्य्यः न च द्वयोरपेक्षा-
बुद्ध्या द्वित्वं त्रयाणां तया त्रित्वं जन्यत इत्याद्यभ्युपगमान्निर्वाह इति वाच्यम् द्वित्वत्रित्वाद्युत्पत्तेः प्राक् द्वयोः त्रया-
णामित्यस्यैवासम्भवादिति मतं तन्न एकत्वादिसमकालमेव द्वित्वाद्युत्पत्तेरङ्गीकारेण द्वित्वादेरपेक्षाबुद्धि-
व्यङ्ग्यत्वमात्रस्याङ्गीकारात् अन्यथा सर्वत्र व्यञ्जकानां व्यङ्ग्यजनकत्वापत्त्या व्यञ्जकत्वोच्छेदापत्तेः। प्रतिपुरुष-
तत्तदपेक्षाबुद्धिजन्यानन्तद्वित्वादिव्यक्तीनां कल्पने महागौरवेण द्वित्वादेरपेक्षाबुद्धिव्यङ्ग्यतायां लाघवाच्च अस्तु-
वा द्वित्वादेरपेक्षाबुद्धिजन्यत्वं तथापि न क्षतिः॥ द्वित्वादीनामुपलक्षणात् तया द्वित्वादिकारणतावच्छेदकत्वोपग-

ग्र० मेनद्वित्वेद्व्येकत्वस्यत्रित्वादौत्र्येकत्वादेरसमवायिकारणत्वोपगमेनद्वित्वाद्युत्पत्तिनिर्वाहात् नचद्व्येकत्वस्येत्यादावे-
२४ कत्वेगुणेकथंद्वित्वान्वयइतिवाच्यम् गुणेऽपिद्वित्वादेर्बुद्धिविशेषविषयत्वरूपस्यसर्वैरेवाङ्गीकारात् परेतु सह
स्रतन्तुकपटस्यतेष्वेवतन्तूत्पत्तिर्नान्यत्रेतिनिर्वाहायप्रागभावोवश्यमभ्युपेयः नचसमवायेनतत्पटोत्प
त्तौसहस्रतन्तूनांतत्तत्तन्तुत्वेनतादात्म्येनः तत्तत्संयोगव्यक्तीनांतत्तत्संयोगत्वेनसमवायेनवाहेतुतयानि-
र्वाह इतिवाच्यम् सहस्रतन्तुकपटस्यसमवायेनसहस्रतन्तुष्वेवोत्पत्त्यातत्रैकस्यापिसहस्रान्तर्गततन्तोस्ता
दात्म्येनप्रत्येकद्वित्वमात्रनिष्ठानांतत्तत्संयोगानांचसमवायेनासत्त्वाद्व्यभिचारापत्तेः तस्मात्तत्पटंप्रतितत्पटप्रा
गभावसिद्धिरित्याहुः तदसत् तत्पटम्प्रतितावत्तन्तुनिष्ठसहस्रत्वसङ्ख्यायाः तादृशसङ्ख्याविशिष्टतन्तुत्वे
नवाकारणतयैवानतिप्रसङ्गे नप्रागभावासिद्धेः॥ अत्रसहस्रतन्तुषुप्रत्येकंसहस्रतन्तुकपटस्यसमवायेनोत्प-
त्त्यातत्रपर्याप्तिसम्बन्धेनसहस्रत्वसङ्ख्यायाअसत्त्वेनव्यभिचारापत्तिः समवायसम्बन्धेनप्रत्येकंतन्तुषुसहस्र
त्वसङ्ख्याङ्गीकारेतुसहस्रान्तःपातिद्वित्रियादितन्तुष्वपितादृशपटोत्पादापत्तिः तत्रोक्तसङ्ख्यायाः प्रागभाव

स्यापि चसत्त्वादितिचिन्तनीयम् अन्येतु तत्त्वज्ञानीनामदृष्टोत्पत्तिवारणायानन्तानांमिथ्याज्ञानजन्यवासनानांहेतु
त्वापेक्षयाद्यतत्त्वज्ञानप्रागभावस्यैकस्यहेतुत्वकल्पनेलाघवात्प्रागभावसिद्धिरेवप्रमेकीत्याहुः तदप्यसत् मिथ्या
ज्ञानजन्य——तावच्छेदकजातिविशेषात्मकवासनात्वेनानुगतेनादृष्टम्प्रतिहेतुत्वेनैवोपपत्तेः सप्रतियोगिकप्रा
गभावकल्पनेमानाभावात् वस्तुतोनैयायिकानांघटस्येवस्वध्वंसप्रागभावत्ववत् मिथ्याज्ञानजन्यवासनानामे
वाद्यतत्त्वज्ञानप्रागभावत्वकल्पनसम्भवेनतद्धेतुत्वेपिनातिरिक्तप्रागभावसिद्धिः नचैवमपिकेवलनीलाद्यवय
वारब्धेपटादौचित्ररूपोत्पत्तिवारणायचित्रत्वावच्छिन्नम्प्रतिनीलादिषड्भावहेतुत्वापेक्षयाचित्रप्रागभावस्यैकहेतुताकल्प
नेलाघवात्तत्सिद्धिरितिवाच्यम् चित्ररूपानङ्गीकारात् अव्याप्यवृत्तिनीलपीतादिसमूहादेवचित्रव्यवहारोपपादनात् नी
लादेःस्वभिन्नरूपाजनकत्वनियमाच्च नचव्याप्यवृत्तिजातीयगुणानामव्याप्यवृत्तित्वेविरोधइतिवाच्यम्व्याप्यवृत्तीश्वरज्ञानादिजा
तीयस्यास्मदादिज्ञानादेरव्याप्यवृत्तित्वादिष्टेर्बाधासिद्धेरित्याहुः अत्रकेचित् प्रागभावानुपगमेघटादिसामग्रीसत्त्वेनोत्पन्नस्या
द्वितीयक्षणेपुनरुत्पादापत्तिरतस्तत्सिद्धिः नचद्वितीयघटारम्भकविशिष्यतत्कपालद्वयसंयोगक्षणविशेषव्यक्तेस्तदानीमसत्त्वा
न्नतदापत्तिरितिवाच्यम् यतोहिनद्वितीयघटाद्युत्पत्तिरापाद्यते येनतत्कपालसंयोगादिव्यक्त्यभावान्नतदापत्तिरितिप्राक्तनेव

अ क्तुम्॰ नापि पूर्वघटव्यक्तेरुत्पत्तिरापाद्यते येन तत्प्राक्क्षणाद्यभावान्न तदापत्तिरिति शक्यते वक्तुम्॰ अपितु घटत्वावच्छिन्नोत्प
४५ त्तिरेवापाद्यते तत्कारणीभूतानां सामान्यतः कालकपालादीनां सर्वेषां सत्त्वात् नच तदङ्गीकारेऽपि स्वप्रतियोगिनां तत्त्वांशोपग
मेऽप्रतियोग्युत्पत्तिर्द्वितीयक्षणे प्रागभावासत्त्वेऽपि प्रथमक्षणे तत्सम्भवादुक्तापत्तिरशक्यपरिहारैवेति वाच्यम् प्रागभावस्य
स्वप्रतियोगिसामग्रीनाश्यत्वेन प्रतियोगितत्प्रागभावध्वंसयोर्युगपदुत्पत्त्यापत्त्यसम्भवादित्याहुस्तदसत् प्रागभावस्याधि
करणारूपत्वेऽप्युक्तापत्तेर्वारणात्तस्यातिरिक्तत्वासिद्धेः। महापटानन्तरं यत्र खण्डपटोत्पत्तिर्भविष्यति तत्र महापटसत्त्वद
शायामपि तत्प्रागभावादीनां सत्त्वेनोक्तापत्तेर्वारणीयतया तत्पटाद्युत्पत्तेस्तत्पटाद्युत्पत्त्यभावस्य तत्पटादिध्वंसस्य वाधि
करणात्मकस्य हेतुत्वेनैव सकलापत्तिवारणसम्भवे तस्याधिकरणरूपताप्यसिद्धेश्चेति॰ एवमत्यन्ताभावान्योन्याभा
वयोरप्यधिकरणातिरिक्तयोर्मानाभावः। भूतले घटो नास्ति घटो न पट इत्यादिप्रतीतीनामधिकरणात्मकाभावविषय।
कत्वेनैव निर्वाहात् यत्तु उक्तं घटो नास्तीत्यादिप्रतीतीनामनन्ताधिकरणविषयकत्वे गौरवाल्लाघवेनातिरिक्तयोस्तयो
स्सिद्धिरिति तन्मन्दम् निरधिकरणकाभावप्रतीत्यभावेन यदधिकरणमन्तर्भाव्य यदभावप्रतीतिस्तस्यास्तदधिकरणा
त्मकतदभावविषयत्वोपगमे गौरवाभावात् नचेह घटो नास्तीत्यादिभ्रमस्थले प्रतीयमानघटाभावस्य घटवत्तदधिक

रणानात्मकत्वेना ——— धिकरणान्तरात्मकघटाभावविषयकत्वेविनिगमनाविरहेणानन्ताधिकरणविषयकत्वेन
गौरवंदुर्वारमितिवाच्यम् तत्रघटवत्तद्धिकरणेघटाभावानात्मकेसर्वसिद्धाधिकरणान्तरवृत्तिघटाभाववत्त्वस्यभ्रमस्वीका
रात्तस्मादभावचतुष्टयस्यापिनाधिकरणातिरिक्तत्वम् नचाभावस्याधिकरणात्मकत्वेऽभेदेनाधाराधेयभावानुपपत्तिरि
तिवाच्यम् अभावाधिकरणकाभावस्यानतिरिक्तत्ववादिनस्तवापिघटाभावेघटोनास्तीत्यादौ प्रमेयत्वेप्रमेयत्व
मित्यादौवाभेदेप्याधाराधेयभाववत्त्वक्लृप्तेपिनतत्सम्भवात् यदिचैवंघटवत्यपिभूतलेघटोनास्तीतिप्रतीत्यापत्तिः। तदधि
करणस्यघटाभावानात्मकत्वेतुघटानयनात्पूर्वंघटनयनोत्तरंचतत्प्रतीत्यनापत्तिः। अधिकरणस्यैकत्वात् नचतदा
नींघटवत्ताज्ञानसत्त्वेतस्यैवप्रतिबन्धकतयानोक्तापत्तिः तादृशज्ञानासत्त्वेचेष्टापत्तिरितिवाच्यम् तादृशज्ञानासत्त्वे।
जायमानायाः तादृशप्रतीतेर्निर्विषयाबाधेनप्रमात्वापत्तेरितिविभाव्यतेतदापिनक्षतिः। अभावस्याधिकरणात्मकत्वपरित्य
ज्याधिकरणविषयकज्ञानविशेषात्मकत्वोपगमेनघटकालीनाधिकरणज्ञानस्यघटाभावानात्मकतया तत्कालीनाधि
करणज्ञानस्यघटाभावात्मकत्वेनचोक्तापत्त्यनापत्त्योरनवकाशात् एवंचाभावाधिकरणयोराधाराधेयभावोमोत्तस्यसाध्य
त्वञ्चोपपद्यते नचज्ञानविशेषस्याभावत्वेनिर्जनेदेशेबन्धविच्छेदेनतडागादिभ्योजलनिःसरणानस्यात् एवमन्य

अ कारेविचरनकराटकैर्नविध्येत· तत्रकस्याप्यधिकरणज्ञानाभावेनज्ञानविशेषात्मकजनाभाव बन्धविच्छेद तेजो
२६ ऽभावात्मकान्धकाराणामसम्भवा——दितिवाच्यम् तत्रापिकीटादिजन्तूनामधिकरणज्ञानस्यतदानीमपि
सत्त्वेनोक्तदोषाभावात् वस्तुतस्तुतदधिकरणतत्कालसम्बन्धस्यैवाभावप्रतीतिव्यवहारनियामकत्वेनोपपत्तौ
नातिरिक्ताभावकल्पना· मानाभावात्· यथाह्येकेनैवभूतलादिना प्रतियोगि विशेषणं विशेष्य उद्देश्यइत्या
दिस्तत्रतत्रव्यवहारस्तथाधिकरणकालविशेषसम्बन्धेनैव घटोनास्तिघटोनेत्यादिव्यवहारस्याप्युपपत्तेः। एवञ्चाधा
राधेयभावादिकमपिसुघटमेव· कालसम्बन्धस्याधिकरणेसत्त्वात्· साध्यत्वाच्चतथाचयत्राधिकरणेकदापिनप्रतियोगी·य
थाह्रदादौवह्न्यादिकं वाय्वादौरूपादिकंतत्रतदधिकरणंतस्यकालसम्बन्धोवातदभावः। अन्यत्रतुतदधिकरणकालवि
शेषसम्बन्धएवसः। एवंभेदेप्यूह्यम्। एवंघटादिपूर्वकालकपालादिसम्बन्धोघटादिप्रागभावः। उत्तरकालविशेषक
पालादिसम्बन्धश्चघटादिध्वंसइतिबोध्यम् नचाधिकरणादीनांनिष्प्रतियोगिकत्वादभावत्वविनिर्वेच्यत्वाभावाच्चस
प्रतियोगिकत्वादिनियतोऽभावोऽतिरिक्तोवश्यमभ्युपेयइतिवाच्यम् घटादेर्घटत्वादिनासप्रतियोगिकत्वाभावात्त्ववि
निवेद्यत्वयोरभावेपिघटाभावाभावत्वादिनाप्रतीतौतदुभयसत्त्ववत्भूतलादेर्भूतलत्वादिनाप्रतीतौतदभावेपिघटा

भावत्वेन बुद्धौ तदङ्गीकारेणोपपत्तेः। इदन्त्वादिनाप्यभावप्रतीत्यनुरोधेन त्वयाप्येवं वाच्यत्वात् नचाभावस्यानतिरिक्तत्वे
ऽभावत्वेप्यनतिरिक्ते मानाभाव इति वाच्यम् अतिरिक्ताभाववादिनापि तदनुगमाद्यर्थमभावत्वस्यातिरिक्तस्याङ्गीकारात्
घटोभावो न वेत्यादिसंशयकोटितावच्छेदकत्वेनाभावत्वस्याखण्डस्यावश्यमुपेयत्वाच्च नचाभावस्याधिकरणादिरू
पत्वे ह्रदो वह्न्यभाव इत्यादि प्रतीत्यापत्तिर्दुर्वारेति वाच्यम् अतिरिक्ताभावाङ्गीकर्त्तृमतेप्यभावाधिकरणकाभावस्या
धिकरणरूपत्वाङ्गीकारेण पटाभावे घटो नास्तीत्यादिप्रतीतिवत्पटाभावो घटाभाव इत्यादिप्रतीतेर्दुर्वारत्वात् दृष्टा
पत्त्यादिसमाधानस्य ममापि सुवचत्वात्॰ यत्तु अभावस्याधिकरणरूपत्वे जलादिरूप गन्धाभा वादेर्घ्राणेन्द्रियेणा
प्रत्यक्षत्वानुपपत्तिः। जलादेर्घ्राणेन्द्रियायोग्यत्वात् ज्ञानरूपत्वे घटाद्यभावस्य चाक्षुषत्वानुपपत्तिः। ज्ञानस्याचाक्षुष
त्वात् कालसम्बन्धरूपत्वे घटाद्यभावस्यातीन्द्रियत्वापत्तिः। कालस्यातीन्द्रियत्वादिति मुक्तावलीकारोक्तं तन्न सत् जला
देर्जलत्वादिना घ्राणाद्ययोग्यत्वेपि गन्धाभावत्वादिना तदुपगमेन॰ ज्ञानस्य ज्ञानत्वेन चक्षुराद्ययोग्यत्वेपि घटाभावत्वा
दिना तदुपगमेन॰ कालस्य कालत्वेनातीन्द्रियत्वेपि घटाभावत्वादिनैन्द्रियकत्वस्योपगमेनास्माकं षडिन्द्रियवेद्यत्वोप
गमेन च दोषासंस्पर्शात् मानमनोहरकारास्तु चक्षुः चाक्षुषभावातिरिक्तग्राहकमिन्द्रियत्वात् घ्राणवदित्यनुमानेन

श्रः निरिक्ताभावसिद्धिः तथाह्यत्रातिरिक्तत्वमनधिकरणत्वम् एवंसतिचाक्षुषभावत्वानधिकरणत्वं चाक्षुषत्वानधिकरण
२१ त्वाद्भावत्वानधिकरणत्वाद्वाश्राद्यग्राहकत्वव्याहतमितिभावत्वानधिकरणमभावः तस्यचाक्षुषत्वंचेत्यभावसिद्धिः। दृष्टान्ते
चाक्षुषत्वानधिकरणंगन्धमादायसाध्यसिद्धिः अप्रसिद्धविशेषणतानिरस्त्यैचाक्षुषग्रहणमित्याहुः तन्नसत् च
क्षुःचाक्षुषभावग्राहकत्वेसत्यतिरिक्तग्राहकत्वानधिकरणं वाह्येन्द्रियत्वात् घ्राणवदित्यनेनोक्तानुमानस्यसत्प्र
तिपक्षत्वसम्भवात् ननुध्वंसप्रागभावानङ्गीकारेआद्यत्वचरमत्ववर्त्तमानत्वभविष्यत्वातीतत्वपूर्वत्वोत्तरत्वानामनुग
तनिर्वचनमशक्यम् तथाहिस्वाधिकरणध्वंसानधिकरणत्वेसतिस्वाधिकरणकालत्वमाद्यत्वम् उत्तरपूर्वयोर्वारणा
यदलद्वयम्·विषयतयास्वाधिकरणज्ञानादेर्वारणायकालत्वमितिस्वाधिकरणत्वप्रागभावानधिकरणत्वे
सतिस्वाधिकरणकालत्वञ्चरमत्वम्·उपान्त्यपर्यन्तस्यनाशोत्तरस्यचवारणायदलद्वयम्।स्वध्वंसप्रागभावानधिक
रणकालत्वंवर्त्तमानत्वम्। वर्त्तमानप्रागभावप्रतियोगित्वम्भविष्यत्वम्। वर्त्तमानध्वंसप्रतियोगित्वमतीतत्वम्।स्व
प्रागभावाधिकरणकालत्वंपूर्वत्वम्। स्वध्वंसाधिकरणकालत्वमुत्तरत्वमित्येतेषांध्वंसप्रागभावघटितत्वेनन्नकथ
मपिनिर्वाहइतिचेन्न एतेषांध्वंसत्वाभावत्वादिवदतिरिक्ताखण्डोपाधिरूपत्वाभ्युपगमात्· अन्यथासखण्डपक्षेध्वं

संशब्दादिकार्यम् २

गदा

सप्रागभावाङ्गीकारेऽपि प्रागभावादिसमये घटादेराश्रयस्यासत्त्वेन तत्प्रतियोगित्वस्य तत्रासम्भवेन भविष्यन् घट इतीतो
घट इत्यादिव्यवहारनिर्वाहो न स्यात् न च भविष्यत्त्वादेरतिरिक्तत्वेऽप्याश्रयासत्त्वात्कथं निर्वाह इति वाच्यम् तस्याति
रिक्तस्यापि विद्यमानाश्रयकस्यैवाङ्गीकारात् न चाखण्डोपाधित्वे तेषां सप्रतियोगिकत्वासम्भवेन कुतश्चिदाद्यत्वं कु
तश्चिच्चरमत्वमित्यादिव्यवस्थानुपपत्तिरिति वाच्यम् यथा तारत्वमन्दत्वादेर्जातिविशेषस्यापि कस्यचित्कुतश्चित्ता
र इति कुतश्चिन्मन्द इति व्यवहारजनकतया सप्रतियोगिकत्वं यथा वा प्रकारत्वादेरखण्डस्यापि रक्तदण्डवानित्यादौ दण्डे
पुरुषापेक्षया प्रकारत्वं रक्तापेक्षया विशेष्यत्वव्यवहारेण सप्रतियोगिकत्वं तथात्रापि सप्रतियोगिकत्वेन कस्यचित्का
लस्य कुतश्चिदाद्यत्वं कुतश्चिच्चरमत्वं कुतश्चिदतीतत्वमित्यादिव्यवस्थासम्भवादिति न चतुर्विधातिरिक्ताभावसिद्धि
रिति वदन्ति अत्रोच्यते भूतले घटो नास्तीत्याद्याकारकाया भूतलाद्यधिकरणकाभावप्रतीतेरपलपितुमशक्यतया तद्वि
षयो निरिक्तोऽभावोऽवश्यमुपेयः अन्यथोक्तरीत्या भूतले घटोऽस्तीत्यादिप्रतीतीनामपि परमाणुपुञ्जज्ञानकालादिरूपा
नाङ्गीकारादेवोपपत्त्या घटादिभावानामप्यसिद्धिप्रसङ्गः स्यात् परमाणुपुञ्जादेः परमाणुपुञ्जत्वेनातीन्द्रियत्वेऽपि घटत्वा
दिनेन्द्रिययोग्यत्वोपगमेन ज्ञानस्य ज्ञानत्वेनातीन्द्रिययोग्यत्वेऽपि घटत्वादिना तदुपगमेन कालादेः कालत्वादिनातीन्द्रि

श्रः पत्वेपि घटत्वादिना तद्योग्यत्वोपगमेन चादोषात् परमाणुपुञ्जवादापत्तेः। एवमननुगताधिकरणादीनामभाव
२९ त्वकल्पने घटो नास्ति पटो न पटो नष्टो घटप्रागभाव इत्याद्यधिकरणविषयकशाब्दादिविषयत्वस्यानन्ताधिकरणेष्वक
ल्पने महागौरवेणालाघवादतिरिक्ताभावसिद्धेश्च। एवं प्रागभावादीनां क्रमाद्धेतुमूलकतापि। असदेव सोम्येदमग्र आसीत्। भू
पश्चान्ते विश्वमायानिवृत्तिः। नेह नानास्ति किञ्चन। द्वे वाव ब्रह्मणो रूपे मूर्तं चैवामूर्तं च मर्त्यं चामृतं चेत्यादिश्रुतीनां सत्त्वात्। एते
न ध्वंसश्चरमक्षणवर्तीकश्चन भावविकारश्चरमक्षणसम्बन्ध एव वा न त्वतिरिक्तः। उत्पत्तिव्यवहारस्याद्यक्षणसम्बन्धेनैव ध्वं
सव्यवहारस्यापि चरमक्षणसम्बन्धेनैवोपपत्तौ प्रतिपदार्थमनन्तध्वंसादिशक्तिकल्पने गौरवात्। प्रमाणाभावाच्च। अत एव नि
रुक्ते ध्वंसो भावविकारेषु गणितः। जायतेऽस्ति वर्द्धते विपरिणमते अपक्षीयते नश्यतीति षड्भावविकारा इति निरुक्ता
नुसारिणां मतमप्यपास्तम्। उक्तरीत्या ध्वंसादेरतिरिक्तत्वस्यावश्यकत्वात्। एवं चाद्यत्वचरमत्वादिकं ध्वंसप्रागभावघटितं पूर्वोप
दर्शितसखण्डोपाधिरूपमेव न त्वखण्डोपाधिरूपं कॢप्तेनैवोपपन्नावखण्डोपाधिरूपत्वे मानाभावात्। न चाविद्यमानानां घटादी
नां कथमतीतत्वाद्याश्रयत्वं धर्मिणामभावादिति वाच्यम्। अतीतघटादीनां ज्ञातो घट इत्यादिव्यवहारप्रत्ययाभ्यां ज्ञानविषयताश्रयत्व
वदतीतादिव्यवहारप्रत्ययाभ्यामतीतत्वादिधर्माश्रयत्वस्याप्यगत्या स्वीकारात्। अथैवमपि प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्ता

वयवतर्कनिर्णय वाद जल्पवितण्डा हेत्वाभासछल जातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगम इति
गौतमसूत्रे· धर्मविशेषप्रसूताद् द्रव्य गुणकर्मसामान्यविशेष समवायानां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञा प
नान्निः श्रेयसमिति कणादसूत्रे चाविभजनान्नातिरिक्तोऽभावस्तत्सम्मत इति चेन्न तदभावश्चापवर्ग इत्यादिबहु
षु गौतमसूत्रेषु· क्रियागुणव्यपदेशाभावात्प्रागसदित्याद्यनेककाणादसूत्रेषु चाभावप्रणयनादेव तत्सम्मतिसूचना
त् अत्र तदभावः। शरीरेन्द्रियादीनामभावः। प्रागसत्· घटादिकार्यं स्वोत्पत्तेः प्रागसदित्यर्थ इति संक्षेपः·० इति पूर्व
खण्डः· एवं चोक्तातिरिक्ताभावस्य ज्ञानमिन्द्रियसन्निकर्षादिघटितप्रत्यक्षसामग्रीसत्त्वे प्रत्यक्षम्· अनुमित्यादि
सामग्रीसत्त्वे चानुमित्यादिरूपं भवति तथाहि घटाभाववद्भूतलमित्यादाविन्द्रियं करणम् स्वसम्बद्धविशेषण
तालक्षणसन्निकर्षो व्यापारः· अभावप्रत्यक्षं फलम्· अत्र सम्बद्धघटकसम्बन्धश्चाभावग्राहकपञ्चविधसंयोगा
दिमध्येऽन्यतमो ग्राह्यः· अन्यथा कालिकेनेन्द्रियसम्बद्धे व्यवहितघटादौ विशेषणतया पटाभावादेः प्रत्यक्षापत्तेः· ए
वं च भूतलादौ घटाद्यभावप्रत्यक्षे इन्द्रियसंयुक्तविशेषणता। रूपादिगुणे सङ्ख्याद्यभावप्रत्यक्षे स्वसंयुक्तसमवे
तविशेषणता· रूपत्वादिसामान्ये सङ्ख्याद्यभावप्रत्यक्षे स्वसंयुक्त—— समवेतसमवेतविशेषणता· श्रोत्र

अ न्ति शब्दाभावप्रत्यक्षे श्रोत्रावच्छिन्नविशेषणता · कादिशब्दे खाद्यभावप्रत्यक्षे स्वावच्छिन्नसमवेतविशेषणता · ए
२९ वमभावाधिकरणकाभावातिरिक्तमते भूतलवृत्तिघटाभावादौ पटाद्यभावप्रत्यक्षे स्वसंयुक्तविशेषणविशेषणता · क
काराभावादौ गकाराद्यभावप्रत्यक्षे श्रोत्रावच्छिन्नविशेषणविशेषणता · एवमन्यत्रापि फलानुरोधेनेन्द्रियसम्ब
द्धविशेषणतोह्या · एवमुक्तविधा विशेषणता यद्यपि नानाविधा तथापि संयोगव्यक्तिभेदेऽपि संयोगत्वेन संयोगव
त्विशेषणतात्वेनैकैव सा ज्ञेया अन्यथाभावाभावसाधारणप्रत्यक्षे षोढासन्निकर्ष इति प्राचाम्प्रवादो व्याहन्येत न
न्वेवं यावतां विशेषणतानां विशेषणतात्वेन यावतां संयोगव्यक्तीनां संयोगत्वेन विभागे संयुक्तसमवायादीनां चतु
र्णामपि समवायत्वेनानुगमसम्भवेन संयोगसमवायविशेषणताः त्रयः सन्निकर्षा इत्येवं कुतो नोक्तमिति चेन्न
षोढासन्निकर्ष इति शास्त्रकारीयपरिभाषाया अपर्य्यनुयोज्यत्वात् तदनङ्गीकारे तु त्रिधः संसर्गविभाग इष्ट एवे
ति हृदयम् अथ घटाभाववद्भूतलमित्यत्राभावस्योक्तविशेषणतावत्त्वेऽपीह भूतले घटो नास्तीत्यादिप्रतीतौ ए
तद्भूतलवृत्त्यभावप्रतियोगिघट इत्याकारकायां नाभावे उक्तविशेषणतावत्त्वमिति चेत् अत्र केचित् नानार्थक
श्वेतोधावतीत्यादिपदवत्तात्पर्य्यवशाद्घटाभाववद्भूतलमित्यादिवाक्यस्य सङ्ग्रहायेन्द्रियसम्बद्धविशेषणाभि

श्वेतनपदात् श्वेतरूपाश्रयः श्वाकुक्कुर इतो देशाद्धावतीति प्रकरणाद्बोधः १

त्वस्येन्द्रियसम्बद्धविशेषणामिति विग्रहः। भूतले घटो नास्तीत्यादिवाक्यस्य सङ्ग्रहाय चेन्द्रियसम्बद्धं भूतलादिविशेष
णं यत्रेति विग्रहः तथा चाभावे सर्वत्रोक्तविशेषणतालक्षणासन्निकर्षोपपत्तिरिति वदन्ति तन्न भूतले घटो नास्ति पटाभा
ववच्च भूतलमित्यादिसमूहालम्बने उभयसन्निकर्षभानानुपपत्तेः सकृदुच्चरितः शब्दः सकृदर्थं गमयतीति व्युत्पत्ति
विरोधात् अत्रार्थे त्वं वृत्तिमत्त्वं तथा च सकृत्त्यदस्यार्थेन दैकदेशे वृत्तौ वा विशेषणत्वे भवतूक्तविरोधो गम्यार्थबोधवि
शेषणत्वे तु न कोपि विरोध इति ध्येयम् अन्ये तु घटाभाववद्भूतलमित्यादौ स्वसम्बद्धविशेषणता भूतले घटो नास्तीत्यादौ
च स्वसम्बद्धविशेष्यता सन्निकर्षः न चैवं लौकिकविषयतानियामकानां सन्निकर्षाणां षोढात्वपरिभाषानुपप
त्तिरिति वाच्यम् अन्यथानुपपत्त्येष्टत्वात् न चोभयरूपेण तयोरभावप्रत्यक्षहेतुत्वे परस्परव्यभिचारात् कार्यकार
णभावद्वयापत्तिरिति वाच्यम् एकरूपानन्यतरत्वेनैव सन्निकर्षताभ्युपगमादित्याहुः तन्न लघ्वनतिप्रसक्तान्यत
रत्वस्य दुर्वचत्वात् न हि तावदुभयान्यान्यत्वमन्यतरत्वम् व्यासज्यवृत्त्युभयत्वावच्छिन्नभेदस्य प्रत्येकेपि स
त्त्वेन केवलान्वयितया तदवच्छिन्नभेदरूपस्य तस्याप्रसिद्धेः नापि प्रत्येकान्यान्यत्वं तत् तादृशविशेषणतान्यान्य
त्वस्येन्द्रियसम्बद्धविशेष्यत्वे तादृशविशेष्यतान्यान्यत्वस्य चेन्द्रियसम्बद्धविशेषणत्वे ऽसत्त्वेन तयोरेकरूपेण

अ सन्निकर्षतानुपपत्तेः यद्विचाभावीयविशेषणताघटितसामानाधिकरण्यसम्बन्धेन घटादिभेदविशिष्टपटादिभेदाव
३० च्छिन्नप्रतियोगिताकभेदवत्त्वमनुगतानतिप्रसक्तरूपं घटपटाद्योरन्यतरत्वमित्युच्यते तदाप्यन्यतरत्वघटकभेदयोः
परस्परविशेषणविशेष्यभावविनिगमनाविरहेणोभयरूपान्यतरत्वप्रसक्त्या एकरूपेण सन्निकर्षतानुपपत्तेस्तादवस्थ्यात्
अत्रसार्बभौमाचार्य्यास्तु इहभूतले घटो नास्तीत्यादिवाक्येन प्रत्यक्षविषयमात्रम्भूतलादिकं प्रदर्शितं न तु प्रतीतिस्वरूप
म् प्रतीतिस्तु सर्वत्राभावप्रकारा घटाभाववद्भूतलमित्याकारा ग्राह्येति न दोषः वस्तुतस्तूक्तसन्निकर्षघटिका विशेषणता
नज्ञानीयप्रकारतादिरूपा किन्त्वभावस्य वृत्तिनियामकः स्वरूपसम्बन्धविशेषः स च भूतलप्रकारकेऽभावप्रकारके वा बो
धेऽभावस्य भूतलवृत्तिता नियामक एक एव· न हि भूतलं घटवत् भूतलवृत्तिर्घट इति ज्ञानयोः सम्बन्धभेदो विषयः किं
तु प्रकारताविशेष्यतयोर्भेदस्तद्वत्रापि तथा चात्र विशेषणपदमाधेयपरं विशेष्यपदमाधारपरमित्यङ्गीकारात् स
मवायाभावयोः प्रत्यक्षे स्वसम्बद्धाधारनिरूपिताधेयतालक्षणसन्निकर्षसिद्धिरिति प्राहुः अधिकस्त्वग्रे वक्ष्यते ननूक्त
विशेषणतासन्निकर्षेणाभावप्रत्यक्षोपगमेपि भूतलादौ घटादिज्ञाने जाते घटाभावादिकं कथं न ज्ञायत इति चेन्न यय
देः प्रमारूपज्ञानदशायामभावप्रत्यक्षासम्भवात् घटसत्त्व एव तत्प्रमासम्भवेन तदानीमभावे विशेषणतासन्निकर्षस्य

वासम्भवात् नचैवमपि भूतलादौ घटादिभ्रमे जातेनत्र घटाभावादिकं ज्ञायतामा अधिकरणो संयोगस्याभावविशेषणता
रूपस्य च सन्निकर्षस्य सम्भवादिति वाच्यम् घटादिभ्रमजनकदोषस्य प्रतिबन्धक त्वकल्पनात् नच घटादिभ्रमस्यै
व प्रतिबन्धकत्वमस्तु लाघवादिति वाच्यम् भ्रमस्य स्वोत्पत्तेः प्रागसम्भवेन घटादिभ्रमकाल एव तदभावप्रत्यक्षापत्ते
रवारणात् यदि च दोषस्य प्रतिबन्धकत्वेपि पश्चाद्विनश्यदवस्थापन्नदोषाद्घटादिभ्रमस्तत्र भ्रमानन्तरं तदभावप्रत्यक्षा
पत्तिरित्युच्यते तदास्त्वभावप्रत्यक्षे प्रतियोग्युपलम्भस्यापि प्रतिबन्धकत्वं तदभावरूपस्यानुपलब्धेश्चेन्द्रियसहकारि
तया हेतुत्वम् न चैवं यद्यत्र घटः स्यात्तर्ह्युपलभ्येतेत्याहार्य्यभ्रमसत्त्वे तदभावप्रत्यक्षानुपपत्तिरिति वाच्यम् अनाहा
र्य्यभ्रमत्वेन प्रतिबन्धकत्वकल्पनात् तथा चात्र तदधिकरणनिष्ठतदिन्द्रियजन्यतत्सम्बन्धावच्छिन्नतदभावप्रत्य
क्षम्प्रति तदधिकरणकतदिन्द्रियजन्यानाहार्यप्रामाण्यज्ञानानास्कन्दिततत्संसर्गकतत्प्रकारकोपलम्भाभावः कार
णमित्यनुपलब्धिनिष्कर्षः अत्र कार्यतानवच्छेदकसम्बन्धः लौकिकविषयता कारणतावच्छेदकसम्बन्धः स्वा
भावीयविशेषणता अधिकरणे तत्पदद्वयम् यदधिकरणविषयकाभावप्रत्यक्षं जननीयं तत्परम् अभावप्रकार
योस्तत्पदद्वयं च यस्य पटादेरभावप्रत्यक्षं साधनीयं तत्परम् एवं च भूतलादिविशेष्यकपटादिप्रकारकोपलम्भदशा

अ॰ यामपि जलादिविशेष्यकघटाद्यभावप्रत्यक्षानुपपत्तिवारणायाधिकरणेनेत्यादद्रूपम्॰ इन्द्रियानन्तरजन्येऽनुमानिके च घटा
२९ द्यनुपलम्भे सत्यपि तदभावप्रत्यक्षात्तदिन्द्रियजन्येति॰ यद्यत्र घटः स्यात्तर्ह्युपलभ्येतेत्याकाराभावप्रत्यक्षहेतुप्रतियो
ग्यारोपसत्त्वेप्यभावप्रत्यक्षात्तदनाहार्येति अप्रामाण्यज्ञानानास्कन्दितघटवद्भूतलमितिज्ञाने सत्यपि तदभावप्रत्यक्षा
दप्रामाण्यज्ञानानास्कन्दितेति चोपलम्भविशेषणम्॰ संयोगेन भूतलं घटवदित्युपलम्भे सत्यपि समवायेन तदभाववद्भूतल
मिति प्रत्यक्षोदयात्तत्संसर्गकेत्यपि तद्विशेषणम्॰ भूतलम्पटवदित्युपलम्भे सत्यपि भूतलं घटाभाववदिति प्रत्यक्षात्त
त्प्रकारकेत्युपलम्भविशेषणम्॰ तल्लक्षणं च ज्ञानाकरणकाभावानुभवासाधारणकारणत्वरूपम्॰ अनुमानजन्यानी
न्द्रियाभावानुभवकारणेऽनुमानादावतिव्याप्तिवारणाय ज्ञानाकरणकेति पदम् अभावानुभवकरणे चक्षुरादावति
व्याप्तिवारणायाभावेति॰ अभावस्मृत्यसाधारणहेतुसंस्कारेऽतिव्याप्तिवारणायानुभवेति —— साधारणे कालादा
वतिव्याप्तिवारणायासाधारणेति॰ ज्ञानाकरणकाभावानुभवमात्रवृत्तितद्व्यक्तित्वेनातिव्याप्तिवारणाय कारणेति अखा
८ ण्डोपाधिर्वानुपलब्धित्वम् अत्रोक्तानुपलब्धौ योग्यताप्यपेक्षिता तेन वक्ष्यमाणयोग्यताघटितानुपलब्ध्यभावेन नायो
ग्ये जलपरमाण्वादौ पृथिवीत्वाभावादेर्योग्ये स्तम्भादौ पिशाचाभावादेश्च प्रत्यक्षम्॰ एवं चेदृश्यनुपलब्धिसहा

कारिणा चक्षुषा भूतलादौ पटतद्धर्मरूपादीनामभावो गृह्यते· त्वचा पटतद्धर्मस्पर्शादीनामभावो गृह्यते· एवं रसनया
रसतद्धर्मादीनामभावः· घ्राणेन गन्धगन्धत्वादीनामभावः· श्रोत्रेण शब्दशब्दत्वादीनामभावः· मनसा सुखसुख
त्वादीनामभावः इदानीमहं सुखरहितः सुखत्वरहितं दुःखमित्याद्यनुभवसिद्धो गृह्यत इति अथ केयं योग्यानुपल
ब्धिर्यदभावाज्जलपरमाण्वादौ न पृथिवीत्वाद्यभावप्रत्यक्षम् किं योग्यस्य प्रतियोगिनोनुपलब्धिः योग्येधिक
रणे प्रतियोगिनोनुपलब्धिर्वा योग्यानुपलब्धिर्वेद्या वा प्रत्यक्षयोग्या वा नाद्यः जलपरमाण्वादौ पृथिवीत्वाद्यभा
वप्रत्यक्षापत्तेः न द्वितीयः भूतलादौ पिशाचाद्यभावप्रत्यक्षापत्तेः न तृतीयः अनुपलब्धेः स्ववेद्यत्वे आत्माश्रयापत्तेः
अनुपलब्ध्यन्तरवेद्यत्वेऽन्योन्याश्रयचक्रकानवस्थापत्तेः नापि तुरीयः अयमुपलम्भाभाव इत्याकारप्रत्यक्षासत्त्वे
प्यनुपलब्धिघटितसामग्रीतोऽभावप्रत्यक्षदर्शनात् अज्ञानानुपलब्धेरेव प्रतिबन्धकाभावतयाऽभावग्राहकत्वा
दिति चेत्· अत्र गङ्गेशोपाध्यायाः यत्र यस्य सत्त्वमनुपलब्धिविरोधि तत्र तस्याभावो योग्यानुपलब्ध्यर्थः। अस्या
र्थः यस्याभावप्रतियोगिनो घटादेः। सत्त्वम् आश्रयत्वम्। यत्र· अधिकरणे। अनुपलब्धिविरोधि घटादिरूपप्र
तियोगिसत्त्वोपलम्भविषयत्वाभावप्रतियोगिनः प्रतियोग्युपलम्भविषयत्वस्य प्रसञ्जकमित्यर्थः प्रसक्तिरापत्तिः। यत्र

तादृशप्रतियोगिप्रसंजनरूप१

अ॰ तिसप्तम्यर्थविषयकत्वस्याविरोधिपदार्थघटकापत्तावन्वयः। तत्रेत्यनन्तरं प्रतियोगिनोऽनुपलब्ध्येति तस्याभाव इत्यनन्त
३२ रं च गृह्यत इतीति पूरणीयम्। योग्यानुपलब्ध्यर्थ इत्यस्य योग्यानुपलब्ध्याऽभावो गृह्यत इत्यर्थः। एवं च यत्राधिक
रणे यद्यंदेशः प्रतियोगिसत्त्ववान्स्यात्तदा प्रतियोगिसत्त्वप्रकारकोपलम्भविषयत्ववान्स्यादित्यापत्तिः सम्भ
वति तत्राधिकरणे प्रतियोग्यनुपलब्ध्या प्रतियोग्यभावो गृह्यत इति समुदितार्थः। अनेन चानुपलब्धौ उक्तापत्तियोग्यो
योयोग्यप्रतियोगिप्रकारकयोग्याधिकरणविशेष्यकोपलम्भस्तत्प्रतियोगिकत्वरूपा पारिभाषिकी योग्यता सूचिता।
योग्या चासावनुपलब्धिश्चेति समासः। भूतलादौ चक्षुरादिघटितसामग्र्यन्तरसत्त्वे आपादनं विनापि घटो नास्तीत्या
दिप्रतीतेरनुभवसिद्धतया विषयत्वं विहाय योग्यतानिवेशः। अत्र भूतलादिविशेष्यकपिशाचोपलम्भस्य जलपरमाण्वा
दिविशेष्यकपृथिवीत्वोपलम्भस्य च योग्यप्रकारकत्वयोग्यविशेष्यकत्वविरहेण भूतले पिशाचाद्यभावस्य तादृश
जले पृथिवीत्वाद्यभावस्य चाप्रत्यक्षत्वोपपादनं सम्भवतीति नोक्तापत्तिलेशोऽपीति अर्थोपलम्भेन तदापत्तियोग्यत्वं च
प्रतियोगिसत्त्वनिष्ठव्याप्तिनिरूपकत्वम्। तच्च न सम्भवति। घटादिसत्त्वे व्यालोकसंयोगाद्यभावे घटाद्युपलम्भानुदयात् न
च व्याप्त्यभावेऽपि का क्षतिरिति वाच्यम् आपाद्यापादकव्याप्तिमूलकतर्कस्यैवार्थसाधकत्वेन व्याप्त्यभावे शिथिलमूल

तथानेनाप्यसिद्धेः यदि च प्रतियोगिसत्त्वातिरिक्तप्रतियोग्युपलम्भककारणकूटविशिष्टप्रतियोगिसत्त्वव्यापकत्वेनोपल
लम्भे विवक्षितेत्युच्यते तदा तथाविधचैत्रमैत्रीयनानाचक्षुःसंयोगत्वकसंयोगादिव्यक्तीनामेकत्रासम्भवेन तादृश
प्रतियोगिसत्त्वं न कुत्रापि। यदि तु पृथिवीत्ववान्घटइत्यादि यत्किञ्चिदनुभवनिष्ठकार्य्यतानिरूपितकारणताव
च्छेदकाः यावन्तो रूपत्वमहत्त्वत्वादयः प्रतियोगिसत्त्वातिरिक्तास्तावद्धर्माणां प्रत्येकाश्रयविशिष्टप्रतियोगिस
त्वव्यापकत्वेनोपलम्भे विवक्षितेत्युच्यते तदा परमाण्वाद्यवृत्तित्वविशेषितपृथिवीत्वाद्यापत्त्यसम्भवेऽप्युक्तविधयावत्का
रणमहत्त्वादिविशिष्टपृथिवीत्वादिकं यद्यत्र स्यात्तदोपलभ्येतेत्याद्यापादनसम्भवेन स्थूलजलादाविव जलपरमाण्वादौ
पृथिवीत्वाद्यभावप्रत्यक्षापत्तिवारणमशक्यमेवेति चेन्न यदधिकरणविषयकाभावप्रत्यक्षत्वं तदधिकरणवृत्तिधर्मान
वच्छिन्नत्वे सत्युक्तविधकारणकूटविशिष्टप्रतियोगिसत्त्वनिष्ठव्याप्तिनिरूपकत्वस्योपलम्भे विवक्षितत्वात् तथा च
तदधिकरणपदेन जलपरमाणुरूपादानेन जलपरमाणुवृत्तिमहत्त्वरूपधर्मानवच्छिन्नत्वोक्तकारणकूटान्तःपातिमहत्त्वा
वच्छिन्नत्वयोर्वि--- रोधितया तदुभयावच्छिन्नप्रतियोगिसत्त्वाप्रसिद्ध्या तन्निष्ठव्याप्तिनिरूपकोपलम्भाप्रसिद्ध्या च
तदभावरूपानुप--- लब्धिविरहादेव न परमाण्वादौ पृथिवीत्वाद्यभावप्रत्यक्षापत्तिरिति चिन्तामणिकारस्वदानि

पत्रयत्रोक्तविधरूपादिकारणकूटविशिष्टसम्भवृत्तित्वंतत्रोपलम्भइतिव्याप्तिः१ आदिना पिशाचभेदादि

श्री ३३

ननु उक्तयोग्यानुपलब्धेरभावग्राहकत्वे पिशाचादौ स्तम्भत्वाद्यभावप्रत्यक्षापत्तेः पिशाचो यदि चक्षुरादिसन्निकृष्टत्वे
सति स्तम्भत्ववान्स्यात्तदा तद्वत्वेनोपलभ्येत स्तम्भवदित्यादिरीत्या तत्राप्यापादनसम्भवात् पिशाचत्वप्रकारतानिरूपित
लौकिकविशेष्यत्वाप्रसिद्ध्या तद्घटितयोग्यानुपलम्भाभावात्तत्र [illegible] पिशाचत्वाद्यभावप्रत्यक्षानुपपत्तेश्चेति य
तु योग्यघटाद्यभावप्रत्यक्षस्य एवमणिकारोक्तयोग्यानुपलब्धेर्हेतुत्वम् अयोग्यपिशाचत्वाद्यभावप्रत्यक्षे तु त
दधिकरणनिष्ठलौकिकविशेष्यतानिरूपिताभावनिष्ठप्रकारतानिरूपितप्रतियोगिकत्वसम्बन्धावच्छिन्न
प्रकारतावच्छेदकसम्बन्धेनायोग्यपिशाचत्वाद्यभावप्रत्यक्षे तदधिकरणीयत्वप्रसञ्जनप्रसञ्जितप्रतियोगिक
त्वदधिकरणीयत्वोपलम्भस्य विषयतासम्बन्धावच्छिन्नाभाव एव पिशाचत्वादिप्रतियोगिवृत्तिर्हेतुः अत्रोभ
यत्र तत्पदं यदधिकरणेऽभावप्रत्यक्षं जननीयं तत्परम् प्रत्यक्षाकारश्च पिशाचत्वाभाववान्स्तम्भइति आपन्नाकारस्तु
पिशाचत्वयदि स्तम्भवृत्तिः स्यात्तर्हि स्तम्भवृत्तित्वेनोपलभ्येत स्तम्भत्वादिवदिति पूर्वोक्तानुपलब्ध्याव्याभावाधिकरण
निष्ठकार्यकारणभावः अत्र तत्त्वभावप्रतियोगिपिशाचत्वादिनिष्ठ इति विवेकः अत्राप्युक्तयुक्त्या पादनस्य सर्वत्रास
म्भवेनोपलम्भस्य तदधिकरणीयत्वापत्तियोग्यत्वं तदधिकरणीयत्वनिष्ठव्याप्तिनिरूपकत्वं ग्राह्यम् तत्रोक्तविध

नन्वलम्भत्वस्यायोग्यत्वादियमनुपलब्धिस्त्वयोग्याभावप्रत्यक्षे हेतुः कृतं तेन प्रत्यक्षा हमनस्त्वेति ४

कारणकूटविशिष्टजातित्वविशिष्टप्रतियोग्यवृत्तिधर्मानवच्छिन्नत्वविशिष्टतदधिकरणीयत्वनिष्ठव्याप्तिनिरू
पकत्वं बोध्यम् एवं च सामानाधिकरण्यसम्बन्धेनोक्तकूटादिविशिष्टस्य स्तम्भवृत्तित्वस्योपलम्भव्याप्यत्वात्स्त
म्भे ऽतीन्द्रियपिशाचत्वाद्यभावप्रत्यक्षोपपत्तिः। जातित्वादिविशिष्टस्य पिशाचवृत्तित्वस्योपलम्भाव्याप्यत्वाच्च
न पिशाचे स्तम्भत्वमनैरूप्यादिजात्यभावप्रत्यक्षापत्तिः। उपलम्भाभाववति पिशाचे स्तम्भवृत्तित्वस्य त्वा व्यभिचारवा
रणाय जातित्वविशिष्टेति वृत्तित्वविशेषणम्· जातित्वविशिष्टस्तम्भवृत्तित्वप्रकारकोपलम्भस्य स्तम्भत्वादेप्र
सिद्धस्य पिशाचे ऽभावात्पिशाचरहितः स्तम्भइत्यत्यन्ताभावप्रत्यक्षवारणाय प्रतियोग्यवृत्तीत्यादि· तथा च पिशा
चादिप्रतियोग्यवृत्तिजातित्वादिधर्मानवच्छिन्नत्वाभावान्न दोषः। न चायोग्यपिशाचत्वाद्यभावप्रमत्वानुरोधेन
कूटमायास्तदधिकरणीयत्वेत्याद्यनुपलब्धेरेवायोग्यघटाद्यभावप्रत्यक्षे ऽपि हेतुतास्तु किं पूर्वोक्तयोग्यानुपलम्भस्य हेतु
तयेति वाच्यम् परमाण्वादौ महत्त्वाद्यभावप्रत्यक्षानुपपत्तेः उक्तरीत्या परमाणुवृत्तित्वप्रकारकोपलम्भस्य महत्त्वाव
त्तिजातित्वानवच्छिन्नत्वस्य चाप्रसिद्धत्वात् एवं च घटे ऽऽत्मत्वाद्यभावश्चाक्षुषः। स्पर्शे रूपत्वाद्यभावस्त्वाचः। र
से गन्धत्वाद्यभावो रासनः। गन्धे शब्दत्वाद्यभावो घ्राणजः। शब्दे सुखत्वाद्यभावः श्रावणः। सुखे गुरुत्वाद्यभा

श्री वोमानसः प्रत्यक्षस्य वा समवायेनात्मत्वं यदि घटवृत्तिः स्यात्तदा तत्त्वेनोपलभ्येत घटत्वादिवत् यन्न घटवृत्तित्व
३४ प्रकारकोपलम्भवत्तन्न घटवृत्तित्ववत् यथा पटत्वमित्येवं तत्र तत्रापादयितुं शक्यत्वादिति तत्तदिन्द्रियायोग्यपिशा
चत्वाद्यभावप्रत्यक्षस्य वादिमतं तेन न सम्यक् । स्तम्भेपि पिशाचभेदप्रत्यक्षस्यानुपपत्तेः तादात्म्येन पिशाचो यदि स्तम्भीयः
स्यात्तदा तत्त्वेनोपलभ्येत स्तम्भवदित्यापादयितुं शक्यत्वेपि पिशाचावृत्तिजातित्वानवच्छिन्नत्वाभावात् । उक्तजात्य
भावप्रत्यक्षोपपादनेप सिद्धान्तापत्तेश्च तत्तदिन्द्रियायोग्यात्मत्वाद्यभावप्रत्यक्षस्य दीधितिकाराद्यनभिमतत्वात् । भवतां चो
न्नतके ------ सहस्तताद्यत्र यत्रात्मादिभेदस्तत्रात्मत्वाद्यत्यन्ताभाव इति प्रसिद्धव्याप्तिस्मरणबलादेव घटश्चात्मत्वाभाव
वानित्यादावनुमितावेव प्रत्यक्षत्वभ्रमोदयात् । अगृहीतव्याप्तिकस्यात्मघटाभेदभ्रमवतश्चैतादृशप्रत्यक्षस्यानुदया
त् । एवं वह्निवृत्तितृणादिजन्यतावच्छेदकजातीनामप्रत्यक्षतया जातित्वादिविशिष्टवह्निवृत्तित्वस्योपलम्भामाप्यते
नैकेमूलव्याप्तेरसम्भवाच्च । भवता वह्नौ पिशाचत्वाद्यभावप्रत्यक्षाङ्गीकारेण जातित्वविशिष्टवह्न्यन्यवृत्तित्वस्यानि
वेशयितुमशक्यत्वात् एवं जन्यस्नेहादिजनकतावच्छेदके परमाणवृत्तिजलत्वादिजातौ जन्यजलादिजनकतावच्छे
दकपरमाणुसाधारणजलत्वादि ------------------

जातिभेदस्याप्रत्यक्षापत्तेः जन्यजलजनकतावच्छेदकजलत्वं यदि तादात्म्येन जन्यस्नेहजनकतावच्छेदकजलत्वं स्यात् तदा
तत्त्वेनोपलभ्येतेत्यापादयितुं शक्यत्वात् अत एव अथैवं रीत्या परमाणुव्यावृत्तं द्व्यणुकादौ जलत्वमेकं परमाणुसाधारणं द्वि
तीयमिति जलत्वयोर्भेदे भेदाग्रहः कुत इति चेत् समनियतयोरप्यक्किवृत्तित्वादिति मुक्तावलीप्रकाशकाराणां प्रति
बन्धकताकल्पनापि सङ्गच्छते उक्तभेदप्रत्यक्षानङ्गीकारात् न चैतत्प्रतिबन्धकस्यैव सत्त्वात्तदभावघटितकारणकूट
विशिष्टतदधिकरणीयत्वाप्रसिद्ध्यानोक्तापत्तिरिति वाच्यम् स्नेहजनकतावच्छेदकजातिमत्त्वन्यावयविनिकुम्भीयजले ज
लजनकतावच्छेदकजात्यसत्त्वादुक्तसमनियतवृत्तित्वसमाधानस्याविचारितरमणीयत्वात् न च जातित्वादिपदेन योग्य
तापि गृह्यते तथा च तृणादिजन्यतावच्छेदकजातीनामयोग्यतया न व्याप्तिभङ्गः इति वाच्यम् तथा सति भवदाशानुपप
त्तेः पिशाचत्वादेरप्ययोग्यतया तस्य स्तम्भवृत्तित्वेपि तत्त्वेनोपलम्भासम्भवेन पिशाचत्वाद्यभावप्रत्यक्षस्यैवासम्भवा
त् अथायोग्यत्वं स्वप्रत्यक्षे सामग्रीसत्त्वे तादात्म्येन प्रतिबन्धकत्वम् न च तादृशजातीनामेव कल्प्यत इति न तासु व्या
प्तिभङ्गः। पिशाचत्वं तु न प्रत्यक्षप्रतिबन्धकं तस्ययोग्यत्वेप्ययोग्यपिशाचवृत्तित्वेनैवाप्रत्यक्षत्वापादनसम्भवादिति चे
न्न उक्तरीत्या स्वप्रत्यक्षे तादात्म्येन कारणत्वस्यैव योग्यतापदार्थतया तद्घटकपिशाचत्वादिप्रकारकप्रत्यक्षस्याप्र

अ० सिद्धत्वेनपिशाचत्वेयोग्यतायाअपि — कल्पयितुमशक्यत्वात्· वस्तुतस्तुयोग्यायोग्यसाधारणजातिमात्रस्यैवाभावप्रत्या
३५ क्षंनसम्भवतीतितत्त्वम् नचबहुषुपुस्तकेषुयोग्यघटत्वाद्यभावप्रत्यक्षस्यापादनात्तद्विरोधापत्तिरितिवाच्यम् कश्चि
त्प्राचीनाभिप्रायोक्ततत्तद्ग्रन्थस्यापातरमणीयत्वेननिर्युक्तिकत्वेनाश्रद्धेयत्वात्· उक्तंचविवृतिकृता·घटत्वत्वादिना
घटत्वादेरभावस्यापिनप्रत्यक्षम्· घटत्वत्वस्यघटेतरावृत्तित्वघटितस्यघटेतरातीन्द्रियघटितत्वेनातीन्द्रियत्वात् एवं
जातित्वस्यापिनित्यानेकसमवेतत्वात्मकत्वेनातीन्द्रियत्वात्तद्रूपावच्छिन्नाभावोपिनप्रत्यक्षविषयइति॰ दीधितिकृता
प्युक्तम्· घटत्वादेश्चाभावोनघटत्वत्वादिनारूपेणप्रत्यक्षः तस्यातीन्द्रियत्वात् एवंजातित्वादिनारूपेणापीतिसर्वथैवा
प्रत्यक्षइति॰ तस्य· घटत्वस्य· सर्वथैवेति अतीन्द्रियसाधारणघटेतरावृत्तित्वेसतिघटनिष्ठान्योन्याभावप्रतियोगितानवच्छेद
करूपघटत्वस्यप्रतियोगिनोप्यतीन्द्रियत्वात्तदभावप्रत्यक्षोदुर्लभइत्यर्थः अत्ररघुदेवन्यायालङ्कारेणाप्युक्तम् घटत्वत्वस्यघटे
तरातीन्द्रियघटितत्वेन· जातित्वस्यचनित्यानेकसमवेतत्वरूपस्यातीन्द्रियसाधारणध्वंसप्रागभावान्यतरप्रतियोगित्वरूपनित्यत्वा
दिघटितत्वेनचातीन्द्रियत्वात्तत्तद्धर्मावच्छिन्नाभावोनप्रत्यक्षः अत्रतत्तद्व्यक्तित्वेनघटत्वाद्यभावलौकिकप्रत्यक्षवारणानुसु
धीभिश्चिन्त्यम् तत्तद्व्यक्तित्वञ्चातिरिक्तंघटत्वादिनाज्ञानपरस्वरूपंवेत्यन्यदेतदिति॰ अत्रचिन्त्यते तद्व्यक्तित्वेनघटत्वा

दिस्वरूपम् उक्तरीत्या घटत्वस्यातीन्द्रियघटितत्वेन तत्स्वरूपस्यापि तथात्वेन तदवच्छिन्नाभावप्रत्यक्षानुपपत्तेः नापि तस्यातिरिक्त
त्वपक्षम् उक्तरूपघटत्वस्यातीन्द्रियत्वेन तत्त्वस्याखण्डोपाधेरप्यतीन्द्रियतयोक्तदोषापत्तेः अतिरिक्तस्यापि योग्यवृत्तिधर्मस्यैव यो
ग्यत्वदर्शनात् पटादिवत्सर्वेषां घटत्वतद्व्यक्तिजातित्वादिधर्माणां योग्याखण्डोपाधिना कल्प्यत्वेन तदा नियतसप्तषोडशादिसख
ण्डपदार्थोपपादकशास्त्रविरुद्धतया बहुसिद्धान्तव्याकुलता घटत्वाद्यभावस्य प्रत्यक्षे च रूपाघटत्वत्वादेर्योग्योपाधिनाक
ल्पनेन तत्तदभावस्यापि योग्यप्रतियोगितया तत्तदुपाधीनां कल्पनयानवस्थास्यात् भवतु चेत् केनानन्तानियतपदार्थवादिनये
न घटत्वादियोग्याभाव एष ऊहः ननु पिशाचत्वाद्ययोग्याभावे सर्वमतेन चेति । एवमेव बहुषु पुस्तकेषु मूलमत्र विस्तरभिया
नोच्यते तथा च यत्र घटत्वाद्यभावप्रत्यक्षानवसरः कुतस्तत्र पिशाचत्वाद्ययोग्याभावप्रत्यक्षावसर इति सूक्ष्मदर्शिपरामर्शः
पुनरत्र तत्त्वम् अत्र तथाविधतदधिकरणीयत्वनिष्ठव्याप्तिनिरूपकत्वमुपलम्भस्य प्रमेयत्वादिसामान्यरूपेणोपलम्भत्वेन
वा विशेषरूपेण तद्व्यक्तित्वेन वा विवक्षितम् नाद्यः प्रतियोग्युपल—म्भे प्रमेयत्वादिना व्याप्तिनिरूपकतायाः सर्वत्रैव सम्भ
वात्तदधिकरणीयत्वे व्यभिचारवारकविशेषणादानवैयर्थ्यापत्तेः न द्वितीयः उपलम्भत्वेनेश्वरोपलम्भस्य विषयतया केवला
न्वयित्वे नोक्तदोषापत्तेः तदभावरूपानुपलब्धेरसिद्धेश्च न तृतीयः भवदाशानुपपत्तेः तथाहि चैत्रस्य घटवद्भूतलमिति ज्ञा

दीधित्यादिप्रमाणसत्त्वेऽपि मूढात्मत्वं न्यपरम्परया तत्प्रपत्तमङ्गीकुर्वन्त्यत आह हन्तेति ५

श्र नसत्त्वे मैत्रस्य पटवद्भूतलमिति ज्ञानेपि भूतलं घटाभाववदिति मैत्रस्य ज्ञानं जायत इत्याद्युपपन्नं ये यादृशाभावबुद्धौ यादृशप्र
१६ तियोग्युपलम्भाभावाद्यदिन्द्रियजन्यायद्यदधिकरणविशेष्यकायद्यत्प्रतियोगिप्रकारकाः प्रतिबन्धकत्वेनप्रसिद्धाःतत्तदिन्द्रि
यजन्यतत्तदधिकरणविशेष्यकतत्तत्प्रतियोगिप्रकारकोपलम्भत्वेनतथाविधतदधिकरणीयत्वनिष्ठव्याप्तिनिरूपकता
विवक्षणीया तथाचतत्तच्चक्षुरादीन्द्रियविषयभेदेनतत्तदभाववचाक्षुषत्वाद्यवच्छिन्नंप्रतितत्तत्प्रतियोगिचाक्षुषाद्य
भाववत्त्वेनविशिष्टैवानुपलब्धिर्हेतुतासिद्धा नचैवमिन्द्रियान्तरजन्योपलम्भसत्त्वेपीन्द्रियान्तरेणाभावप्रत्यक्षापत्तिरिति
वाच्यमिष्टत्वात् लौकिकसन्निकर्षजन्यबुद्धौसामान्येन्द्रियजन्यविरोधिनिश्चयस्यैवप्रतिबन्धकत्वात्· एवंचपिशा
चत्वादिप्रकारकलौकिकचाक्षुषत्वाद्यप्रसिद्ध्यातद्घटितानुपलब्धेरप्यसिद्धतयानस्तम्भादावयोग्यपिशाचत्वा
द्यभावप्रत्यक्षोपपत्तिरिति केचित्तु जातियोग्यव्यक्त्यन्यतरप्रतियोगिकत्वमभावमात्रस्यसाक्षाद्योग्यत्वम्· व्यक्तौ
योग्यत्वंचलौकिकविषयतावत्त्वम् तथाचनस्तम्भेपिशाचत्वंनास्ति· स्पर्शोरूपत्वंनास्तीत्यादितत्तदिन्द्रिययोग्य
जात्यभावप्रत्यक्षानुपपत्तिः नाप्ययोग्यपिशाचाद्यत्यन्ताभावप्रत्यक्षापत्तिः नचजलपरमाण्वादिषुपृथिवीत्वा
द्यभावस्यान्धकारेघटाद्यभावस्यचप्रत्यक्षापत्तिरितिवाच्यमप्रकृष्टमहत्त्वोद्भूतरूपावच्छिन्नालोकसंयोगावच्छि

चक्षुषा३ त्वचा३

त्रेन्द्रियसंयुक्तविशेषणतापरएवाभावग्राहकत्वेनाङ्गीकारात् यदितु घटवद्भूतलमित्यादिप्रत्यक्षसत्त्वेपिघटाभाववद्भू
तलमित्यादिप्रत्यक्षापत्तिः नचलौकिकसन्निकर्षाजन्यदोषविशेषाजन्यज्ञानस्यैवालौकिकबाधबुद्धिप्रतिबध्यतयात्रलौ
किकसन्निकर्षजन्याभावप्रत्यक्षस्येष्टापत्तिरितिवाच्यम् अव्याप्यवृत्तिप्रतियोगिकाभावयोरेकाधिकरणएवसत्त्वात्लौकिकसन्निकर्षेणा–
प्रतियोगिप्रमोत्तरक्षणेतत्रैवलौकिकसन्निकर्षेणाभावस्यापिप्रत्यक्षापत्तिरित्युक्तमतेतदप्यस्तुबाधमुद्रयोपलब्धाभावत्वेन
हेतुतेतिकिमुक्तगुरुतरयोग्यानुपलब्धिद्वयस्यकारणतयेतिवदन्ति तन्नतृणादिजन्यतावच्छेदकवह्नित्वनिवेश
न्यात्यन्ताभावस्यजन्यत्वेहजनकतावच्छेदकजलत्वाद्युक्तभेदस्यचप्रत्यक्षापत्तेः स्तम्भेभवदभिमतपिशाचभेदप्र
त्यक्षानुपपत्तेश्च अत्रबहवस्तु संसर्गाभावेयोग्यत्वं योग्यमात्रप्रतियोगिकत्वेसतियोग्यधर्ममात्रावच्छिन्नप्रतियो।
गिताकत्वम् अयोग्यगुरुत्वाद्यभावप्रत्यक्षवारणायसत्यन्तम् संयोगेनेहभूतलेद्रव्यंनास्तीतिद्रव्यसामान्याभाव।
प्रत्यक्षवारणायमात्रेति गुरुत्वावच्छिन्नघटनिष्ठप्रतियोगिताकात्यन्ताभावस्यात्रगुरुत्ववान्नास्तीतिप्रत्यक्षस्य
वारणायविशेष्यदलम् उद्भूतरूपगुरुत्वान्यतरावच्छिन्नाभावस्य— प्रत्यक्षवारणायविशेष्यदलेमात्रेति वस्तुतउ
द्भूतरूपवान्नास्तीतिप्रत्यक्षप्रतीतिनिरस्तत्वेनोक्तान्यतरवान्नास्तीतिप्रतीतेर्लाघवाच्च उद्भूतरूपमात्रस्यैवतादृशप्रतियोगितावच्छे

पिशाचत्वाद्यत्यन्ताभावप्रत्यक्षवादिनयेपिशाचभेदप्रत्यक्षाङ्गीकारात् ६

अ·
५०

दकत्वौचित्यम्· मात्रपदप्रयोजनं तु रूपावच्छिन्नाभावप्रत्यक्षवारणमेव· उद्भूतानुद्भूतरूपयोर्योग्यायोग्ययोर्द्वयोरेव घटाभा
वप्रतियोगितावच्छेदकत्वान्न प्रत्यक्षमिति मन्तव्यम्· परमाण्वादौ तद्व्यक्तित्वेन पृथिवीत्वाद्यभावप्रत्यक्षवारणाय तु महत्
त्वाद्यवच्छिन्नेन्द्रिय ---- सन्निकर्षाभावात् अन्योन्याभावे योग्यता तु जात्यवच्छिन्नप्रतियोगिताकत्वजात्यन्ययो
ग्यधर्ममात्रावच्छिन्नप्रतियोगिताकत्वान्यतररूपैव· तेन स्तम्भे पिशाचाद्यन्योन्याभावपिशाचवदन्योन्याभावयोः प्रत्य
क्षत्वाप्रत्यक्षत्वोपपत्तिः। मात्रपदेन च न पिशाच घटोभयवदन्योन्याभावप्रत्यक्षापत्तिः। एतन्मते योग्यत्वं नानुपलब्धि
विशेषणं किंतु प्रत्यक्षसंसर्गाभावान्योन्याभावयोः। अत्रैव मुक्तावलीकाराणां संसर्गाभावप्रत्यक्षे प्रतियोगिनो योग्यतान्यो
न्याभावप्रत्यक्षेऽधिकरणयोग्यतापेक्षितेति वदतां निर्भरो लभ्यते एवं च प्रतियोग्युपलम्भाभावसत्त्वेन तत्तदिन्द्रियेण
योग्यानामेवाभावानां प्रत्यक्षं न तु तत्तच्चक्षुराद्ययोग्यानामपीत्यङ्गीकुर्वन्ति तदस्मनोरमम्· अभावे समवायेन जाति
त्वावच्छिन्नं नास्ति· आत्मनि प्रतियोगितया ध्वंसत्वावच्छिन्नं नास्तीत्याद्यनन्तसंसर्गाभावानां मनस्त्वद्व्यणुकध्वंसाद्ययोग्य
साधारणप्रतियोगिकत्वेन प्रत्यक्षानुपपत्तेः अत एव प्रतियोगितावच्छेदकविशिष्टस्यैव यस्य कस्यचित्प्रतियोगिनो योग्यत्वम
न्यनाभावग्रहे तन्त्रं न तु योग्यमात्रप्रतियोगिकत्वम् अन्यथा गुणेऽपि संयोगसामान्याभावस्य तादृशप्रत्यक्षं न स्यादित्यादि जगदीशो

५२

ननु विश्वनाथादिना प्रतियोग्यनुयोगिनोर्योग्यतोक्ता कथमत्र तद्विरुद्धाभावयोग्यतोच्यत इत्यत आह· अत्रेति ६

क्तिरपि संगच्छते तत्र योग्यमात्रप्रतियोगिकत्वानभ्युपगमात् ननूक्ताभावेऽयोग्यजातिशङ्कयानाभावे जातिर्नास्तीत्यादिरूपसामा
न्याभावप्रत्यक्षमिति चेन्न यत्र यत्रायोग्यजातिस्तत्र योग्यायाविनिव्याप्तेर्योग्यजातीनामपि कल्पनापत्तेः एवं सर्वत्र क्वाचित्कातीन्द्रिय
पटत्वादिजातिशङ्कया घटे पटत्वं नास्तीति भवदनुभवसिद्धप्रत्यक्षस्याप्यपलापापत्तेः आत्मन्यप्ययोग्यध्वंसशङ्कया तदापत्तेश्च
सम्भवात् एवं वह्नौ तृणफूत्कारसंयोगमणितरणिकिरणसंयोगारणिनिर्मन्थनादिजन्यतावच्छेदकनानाजात्यवच्छिन्ना
न्योन्याभावस्य योग्येजन्यस्नेहजनकतावच्छेदके जलत्वादिजातौ जन्यजलजनकतावच्छेदकजलत्वादिजात्यन्योन्याभावस्य
च प्रत्यक्षापत्तेश्चावारणात् जलत्वजातेर्योग्यतया तद्वृत्तिप्रतियोगितावच्छेदकतद्व्यक्तित्वात्मकजातित्वस्यापि योग्यधर्मत्वात् ए
तेन स्तम्भादौ पिशाचत्वाद्यन्यतमाभावस्यापि पिशाचादिभेदसमनियततया तदभिन्नत्वात् उक्तान्योन्याभावयोग्यतायास्तत्र सत्त्वा
त्तदभावप्रत्यक्षानुपपत्तिः यद्विसमनियताभावानामनैक्यमते पिशाचत्वाद्यभावप्रत्यक्षानुपपत्तिरिति विभाव्यते तदास्तु पि
शाचत्वं नास्तीति प्रतीतावपि पिशाचादिभेद एव विषयः मणिकारमते भेदस्याव्याप्यवृत्तित्वात् मूले महीरुहे न विहङ्गम
संयोगीति प्रतीतेर्विहङ्गमसंयोगान्यतमाभावविषयकत्ववदिति न योग्येऽधिकरणे तत्तदिन्द्रियायोग्यजात्यभावप्रत्यक्षानुपप
त्तिरित्यपि निरस्तम् उक्तरीत्याऽभावग्राहकयोग्यतायाश्च निर्वचनात् पिशाचत्वाद्यन्यतमाभावप्रत्यक्षानिर्वाहाच्च इदं पुनरिहा

पिशाचत्वाद्यन्यतमाभाव४ भेदस्यापि१

अ वधेयम्ः केयंनामयोग्यता ——— नतावज्जातिरूपेतिशक्यतेवक्तुम्ः अभावादावनित्यप्रसङ्गात् नापिप्रत्यक्षप्रयोजकोपाधिरूपाः स
१९ प्रातिरिक्तपदार्थस्यासिद्धान्तेनुपगमात् नचाभावरूपैवसेतिवाच्यम् कस्याभावरूपासेत्यादिपस्यतथाप्यनुद्धारादित्यगत्याप्रति
बन्धकत्वाभावस्यैवयोग्यतारूपत्वंवक्तव्यम् प्रतिबन्धकत्वंचात्रविषयतासम्बन्धेनस्वप्रत्यक्षंप्रतितादात्म्यसम्बन्धेनाजनक
त्वम्ः येषांपिशाचादीनांसामग्रीसत्वेपिनप्रत्यक्षंतेषांस्वप्रत्यक्षेऽयोग्यत्वंयेषांचघटादीनांनैवंतेषांयोग्यत्वमितियावत्ः
तथाचप्रतिबन्धकत्वाभावाश्रयस्ययोग्यस्यकार्यमात्रेसाधारणकारणत्वेनक्लृप्तस्यनपृथक्कारणत्वविचारावकाशः वस्तु
तोविषयतयालौकिकप्रत्यक्षत्वावच्छिन्नंप्रतितादात्म्येनविषयत्वावच्छिन्नस्यनिमित्तकारणत्वरूपयोग्यत्वंप्रत्यक्षरूपफ
लानुरोधात्घटतदभावादीनामेवकल्प्यते नतुगुरुत्वतदभावादीनामितिनपृथग्विचारावकाशः एवंघटाभाववद्भूतलमित्या
द्यभावप्रत्यक्षेबाधमुद्रयाघटवद्भूतलमित्यादिप्रत्यक्षस्यप्रतिबन्धकत्वेपितदभावरूपानुपलब्धेरपिनपृथक्कारणताविचा
रावसरः अत्रप्रतिबन्धकत्वंतु तादात्म्यातिरिक्तसम्बन्धावच्छिन्नकारणताश्रयीभूतात्यन्ताभावप्रतियोगित्वरूपमपटा
द्यत्यन्ताभावप्रत्यक्षेपटादेः प्रतिबन्धकत्वापत्तिवारणायतादात्म्यातिरिक्तसम्बन्धावच्छिन्नेतिकारणताविशेषणम्
विषयस्यचपटाभावादेः स्वप्रत्यक्षेतादात्म्यावच्छिन्नकारणतावत्त्वान्नदोषः पटादेः प्रतिबन्धकत्वंतुनेष्टंतत्स्वेतद

अभावाघटितयोग्यतामाह॰

भावरूपविषयस्यैवासत्त्वादप्रत्यक्षत्वोपपत्तेः। दाहादिकार्यं प्रति वह्न्यभावाभाववह्निस्वरूपकारणमादाय तत्प्रतियोगिनि
वह्न्यभावे प्रतिबन्धकत्वापत्तिवारणायाभाववदितिपदम्· अत्रापि कारणाभावे प्रतिबन्धकताव्यवहाराभावात्कारणसत्त्वे का
र्यानुत्पत्तिप्रयोजकस्यैव प्रतिबन्धकत्वेन व्यवह्रियमाणत्वान्नेष्टापत्तिसम्भवः। पटादिप्रागभावमादाय तस्मिन्स्वप्रतिबन्ध
कत्वापत्तिवारणायात्यन्तेतिपदम्· प्रागभावानङ्गीकर्तृमते तु न देयमेव· यत्तु वह्न्यभावाभावस्याप्यत्यन्ताभावरूपतयोक्ताप
त्तिवारणासम्भव इति तद्वारणाय भावभिन्नत्वमप्यत्यन्ताभावविशेषणमिति मतं तन्न वह्न्यादेर्नित्यत्वाभावेन नित्य
त्वे सति संसर्गाभावत्वरूपात्यन्ताभावत्वस्यैवासत्त्वात्· भावव्यावृत्तानुयोगिताविशेषरूपस्याखण्डोपाधिरूपस्य
वाऽभावत्वस्याप्यसत्त्वाच्च यत्तूक्तापत्तिवारणाय तादात्म्येत्यादिस्थाने दैशिकविशेषणतासम्बन्धावच्छिन्नत्व
मेव कारणताविशेषणमस्तु तथा च वह्न्यादिभावानां दैशिकविशेषणतासम्बन्धेनाकारणत्वादेव तद्वारणमिति
मतं तन्न स्वसंयुक्तविशेषणतादिरूपदैशिकविशेषणतया तथाविधचक्षुरादिभावानामपि कारणत्वेनोक्तापत्त्यवार
णात् ननु प्रतिबन्धकमण्यादिसत्त्वेऽप्युत्तेजकमण्यादिसहकृतसामग्रीसत्त्वे दाहादिकार्योदयात्कथं मण्यादेः सामग्री
सत्त्वेऽपि कार्यानुत्पादप्रयोजकत्वरूपप्रतिबन्धकत्वसम्भव इति चेन्न केवलमण्यादीनामप्रतिबन्धकत्वेऽप्युत्तेजका।

अ० भावविशिष्टानामेवतेषांप्रतिबन्धकतयातद्विशिष्टप्रतिबन्धकाभावस्यैवकार्य्यमात्रेहेतुत्वात् अत्रसूर्य्यमण्यौषध्यादि
३९ द्रव्याणांदैशिकविशेषणतयोत्तेजकत्वंचन्द्रमण्यौषध्यादिद्रव्याणांदैशिकविशेषणतयाप्रतिबन्धकत्वंचबोध्यंनतुसंयो
गेनतथात्वंसंयोगस्याव्याप्यवृत्तितयातेनतदधिकरणेपितत्तदभावसम्भवेनातिप्रसङ्गापत्तेः। उत्तेजकत्वंच प्रतिबन्ध
कतावच्छेदकीभूताभावप्रतियोगित्वम् एवंचोत्तेजकतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकोत्तेजकाभावविशिष्टानांप्रतिबन्धकानामुक्तप्रतिबन्धकतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकाभाववत्त्वेनकार्यमात्रेहेतुतेति। फलितम् एवंयन्त्रमन्त्राणामुत्तेजकत्वंप्रतिबन्धकत्वंचोद्देश्यतयाबोध्यम् शेषंदर्शितदिशावसेयम् एवंघटाभाववद्भूतलमित्यादिप्रत्यक्षस्यघटवद्भूतलमित्यादिप्रत्यक्षस्यप्रतिबन्धकत्वम् इदंज्ञानमप्रमेत्यादिज्ञानस्योत्तेजकत्वंविषयतासम्बन्धेनविषयनिष्ठंसमवायेनात्मनिष्ठंवाबोध्यम् शेषंपूर्ववत् तथाचयत्रप्रतिबन्धकंनास्तितत्रोत्तेजकस्यसत्त्वेउभयाभावप्रयुक्तस्यासत्त्वेविशेष्याभावमात्रप्रयुक्तस्योक्तविशिष्टाभावस्यसत्त्वात् यत्रचोत्तेजकमस्तितत्रप्रतिबन्धकस्यसत्त्वेविशेषणाभावमात्रप्रयुक्तस्यासत्त्वेतूभयाभावप्रयुक्तस्यविशिष्टाभावस्यसत्त्वाच्चनकार्यानुपपत्तिः। यत्रप्रतिबन्धकमस्तुत्तेजकंचनास्तितत्रोक्तविशिष्टाभावरूपकारणाभावान्नकार्योत्पत्तिरित्येवमनुपलब्धेः क्लृप्तप्रतिब

न्धकाभाववत्त्वेवाभावप्रत्यक्षेहेतुत्वमितिसिद्धम्· यथाचास्याः प्रतिबन्धकाभाववत्तयापिनहेतुतान्यापविद्धिरङ्गीकृतातथा
न्यव्यक्तिभविष्यति· प्राभाकरास्तु कार्यानुकूलधर्मविघटकत्वंप्रतिबन्धकत्वम्· तच्चमणिमन्त्रादीनांवह्न्यादिनिष्ठदाह
दिकार्यानुकूलशक्तिरूपधर्मविनाशकतया· व्यभिचारादिहेत्वाभासज्ञानानामनुमित्यनुकूलपरामर्शादिनिष्ठशक्तिना
शकतया· घटवद्भूतलमित्यादिरूपप्रतियोग्युपलम्भानांघटाभाववद्भूतलमित्यादिप्रत्यक्षानुकूलचक्षुःसन्निकर्षादि
घटितसामग्रीनिष्ठशक्तिनाशकतयाचनिर्वहतीतिप्रतियोग्युपलम्भस्यप्रतिबन्धकत्वेपिनतदभावरूपानुपलब्धेः प्र
तिबन्धकाभाववत्तयापिहेतुतासम्भवतीतिवदन्ति तन्न साक्षात्कार्यविघटकबाधज्ञानस्यानुमितिप्रतिबन्धकत्वाभावाप
त्तेः तथाहियत्रपरामर्शानन्तरंलौकिकप्रत्यक्षरूपोबाधनिश्चयस्तत्रबाधनिश्चयोत्पत्तिद्वितीयक्षणेपरामर्शनिष्ठशक्ति
नाशोवक्तव्यः एवंचबाधोत्पत्तितृतीयक्षणेबाधेनानुमितिप्रतिबन्धोवाच्यः सचनसम्भवति तत्पूर्वंपरामर्शाभावादेवानु
मित्यनुत्पादसम्भवात्· बाधद्वितीयक्षणेनुमित्यापत्तेश्च· तत्पूर्वंशक्तिविशिष्टपरामर्शसत्त्वात्· उक्तविधयोत्तेजकाभावविशिष्ट
प्रतिबन्धकाभावेनैवसामञ्जस्येनतच्छक्तितत्प्रागभावध्वंसादिकल्पनागौरवाच्च अथमन्मतेकार्यत्वावच्छिन्नेऽनन्तव्यक्तिका
रणानामेकशक्तिमत्त्वेनहेतुतयानन्तव्यक्तिप्रतिबन्धकाभावानामहेतुतयाचातिलाघवम्· भवन्मतेत्वनन्तकारणानामन

श्र न्तवह्नित्वादिरूपेणाहेतुताकल्पनेगौरवमितिचेन्नकारणतावच्छेदकशक्त्यवच्छिन्नयावत्कारणसत्त्वेकार्योत्पत्त्यङ्गी-
५५ कारेविरुद्धवह्निजलादिकारणानामेकत्रमेलनासम्भवेनकार्यमात्रस्यैवविलयप्रसङ्गात्· तादृशशक्त्यवच्छिन्नकिञ्चि
त्कारणसत्त्वेकार्योत्पत्त्यङ्गीकारेतुघटादिकारणकलापात्पटाद्युत्पत्त्यापत्तेः नचघटत्वावच्छिन्नेपृथक्शक्तिमत्त्वेनका
रणतापटत्वावच्छिन्नेपृथक्शक्तिमत्त्वेनकारणतेत्यादिरीत्याकार्यतावच्छेदकसमसङ्ख्याकशक्तिकल्पनेपिनोक्त
दोषद्वयावकाशः एवमपिमन्मते एकैककार्यतावच्छेदकधर्मावच्छिन्ननिरूपितैकैककारणतावच्छेदकशक्तिकल्प
नेपिभवदभिमतैकघटत्वावच्छिन्ननिरूपितानेककारणतावच्छेदकदण्डत्वचक्रत्वादिकल्पनापेक्षलाघवमस्ती
तिवाच्यम् एकत्रभूतभाविघटीययावत्कारणसत्त्वेघटोत्पत्त्यसम्भवेनतादृशशक्त्यवच्छिन्नकिञ्चिन्नीलकपालादि
कारणसत्त्वेपीतघटाद्युत्पत्त्यापत्तिसम्भवेनचोक्तदोषद्वयानुद्धारात्नच्न्यायनयेप्युक्तदोषापत्तिः तादृशकारणतावच्छे
दककपालत्वाद्यवच्छिन्नानायावत्कपालादीनामपिमेलनासम्भवादितिवाच्यम् घटत्वादितत्तत्कार्यतावच्छेदकध
र्मावच्छिन्ननिरूपितकारणतावच्छेदककपालत्वादीनियावन्तितावद्धर्माश्रयतत्तद्व्यक्तिसत्त्वस्यैवकार्योत्पत्तिप्रयोज
कत्वात् एवंशक्तेरप्युत्पादविनाशशालित्वेनकार्यरूपतयातांप्रत्यपिवह्न्यादिकारणानांशक्तिमत्त्वेनहेतुत्वंवाच्यमेवंतां

वक्ष्यमाणनवीनमुक्त्याऽऽचार्याद्यभिमतयोग्यताखण्डनायेतन्मतमाह ।

तां शङ्किं प्रत्यपि शक्तिमत्त्वेनैव हेतुतयानवस्थापत्तेरित्यन्यत्र विस्तरः । उदयनाचार्यास्तु पापिनस्तु अभावप्रत्यक्षे योग्यानु
पलब्धिर्योग्यतासहितानुपलब्धिः कारणम् । तत्र योग्यता च प्रतियोगिनत्सन्निकर्षभिन्नप्रतियोगिग्राहकयावत्कारण
सत्त्वम् । तत्तदिन्द्रियजन्यज्ञानीयतत्तत्प्रतियोगिप्रकारतानिरूपिततत्तदधिकरणनिष्ठलौकिकविषयताप्रयोजकसामग्री
सत्त्वमिति यावत् । परमाण्वादौ महत्त्वादिरूपस्य महत्त्वाद्युपलम्भकस्य महत्त्वादिग्राहकसन्निकर्षस्य चाभावेन कार
णाकूटविशिष्टा नुपलब्धेरप्रसिध्या महत्त्वाद्यभावप्रत्यक्षानुपपत्तेरतः प्रतियोगिनग्राहकसन्निकर्षभिन्नत्वनिवे
शः । जलपरमाण्वादौ पिशाचादौ च प्रतियोग्युपलम्भकमहत्त्वोद्भूतरूपाद्यभावात् प्रतियोगिग्राहकसकलहेतुस
मवधानमिति न तत्र पृथिवीत्वाद्यभावस्तम्भत्वाद्यभावप्रत्यक्षापत्तिः । एवं च वायावुद्भूतरूपाभावः परमाणौ महत्त्वा
भावस्त्वात्तुषः । गगने स्पर्शाभावः स्पार्शनः । गुडे तिक्ताभावो रासनः । जले गन्धाभावो घ्राणजः । आकाशे शब्दाभावः श्राव
णः । कालादौ सुखाद्यभावो मानसः सम्भवति न तु तदधिकरणो ऽपरीदं स्यात् तदोपलभ्येतेत्यापादयितुं शक्यत्वात् । न चैवम
पि पिशाचत्वादेरनी— न्द्रियतयोक्ततदुपलम्भाप्रसिध्या स्तम्भादौ तदभावग्रहानुपपत्तिर्निरुक्तयोग्यानुपलब्धेरभावादि
ति वाच्यम् । अतीन्द्रियप्रतियोगिकाभावानां प्रत्यक्षतानुपगमादिति वदन्ति । अत्र यदि तत्सन्निकर्षव्यतिरिक्तयावद्दृष्टवाक्सुखा

नतु सन्निधानानिसुखादिप्रत्यक्षकारणापत्तेस्तन्मते निमत्यहेतु स्वानुयोगिकमनःसंयोगस्यवि
प्रियहेतुतया कथं कालादौ प्रत्यक्षापादनमित आत्मार्थं कादिपदं ज्ञेयम् ।

संसर्गाभावप्रत्यक्षे प्रतियोगिनो योग्यते निमुक्तावलीवचनस्या
वेवतात्पर्यम् अधिकरणस्य योग्यत्वात्

वहत्प्रमाणयोग्यतानुपलब्ध्योर्विशेष्यविशेषणभावे विनिगमनाविरहेण गुरुभूतकारणताद्वयापत्तेश्चेति प

अ॰ दिकारणसत्त्वं योग्यत्वमिति वदतो गौरीकान्तसार्वभौमस्य मते· विषयविषयाविनाभूतव्यतिरिक्तोपलब्धिकारणस
४९ म्पत्तिर्योग्यतेति वदतो भट्टपादस्य मते चानुपलब्धौ सामग्रीसत्त्वमेव योग्यत्वमिति मन्तव्यम्· नवीनास्तूक्तरीत्या योग्या
नुपलब्धिरपि नाभावप्रत्यक्षे हेतुः तथा सति प्रतियोगितत्सन्निकर्षव्यतिरिक्तस्य ककारादिव्यञ्जकविजातीयवाय्वसं
योगस्य ककाराद्यभावप्रत्यक्षकालेऽसत्त्वात्तद्घटितकारणकूटात्मकयोग्यत्वाप्रसिद्ध्या तत्सहितानुपलब्ध्या ककाराद्य
भावप्रत्यक्षानिर्वाहात्· किन्तु योग्यानुपलब्धिरित्यत्र योग्यपदस्याभावप्रधाननिर्देशतया योग्यतानुपलब्धिश्चेत्यर्थो
वसेयः· सा च योग्यताऽभावग्राहकसन्निकर्षविषये चापेक्षिता तथा च दण्डचक्रादिन्यायेनाभावप्रत्यक्षे योग्यतावत्सा-
न्निकर्ष योग्यतावद्विषयकेवलानुपलब्धीनां त्रयाणां स्वातन्त्र्येण हेतुताज्ञेया· सन्निकर्षयोग्यता च· महत्त्वाभावरूपा
भावेतराभावचाक्षुषे वस्तुः सन्निकृष्टमहत्त्वोद्भूतरूपवद्विशेषणता· महत्त्वाभावचाक्षुषे महत्त्वाघटिता· उद्भूतरूपा
भावचाक्षुषे रूपाघटितैव ग्राह्या· एवं महत्त्वाभावस्पर्शाभावेतराभावस्पार्शने त्वक्सन्निकृष्टप्रकृष्टमहत्त्वोद्भूतस्पर्श
वद्विशेषणता· प्रकृष्टमहत्त्वाभावस्पार्शने महत्त्वाघटिता· उद्भूतस्पर्शाभावस्पार्शने स्पर्शाघटिता बोध्या· एवं गन्धा
द्यभावघ्राणजादौ घ्राणादिसन्निकृष्टमहत्त्ववद्विशेषणता· शब्दाभावप्रत्यक्षे इन्द्रियविशेषणतेत्यादिका बहुतरा ते

अपिनाजलपरमाणौ ५

या॰ विषयेयोग्यताच लौकिकविषयतावत्त्वरूपा नचैवंयोग्यतायाअननुगमइतिवाच्यम् अगत्येष्टत्वात् अनुपलब्धिश्च तत्त
दिन्द्रियजन्यतत्तदधिकरणवैशिष्ट्यावगाहितत्तद्धर्मावच्छिन्नाभावलौकिकप्रत्यक्षेतत्तदिन्द्रियजन्यतत्तदधिकरणविशेष्य
कतत्तद्धर्मावच्छिन्नलौकिकप्रत्यक्षाभावरूपा॰ तेननजलपरमाण्वादौपृथिवीत्वाद्यभावप्रत्यक्षमनवचक्षुःसन्निकृष्टमह
त्त्वोद्भूतरूपवद्विशेषणतात्मकयोग्यसन्निकर्षाभावादेवजलपरमाण्वादौपृथिवीत्वाद्यभावप्रत्यक्षवारणसम्भवेनिरुक्ता
नुपलब्धेरभावप्रत्यक्षहेतुत्वेमानाभावइतिवाच्यम् यत्रस्थूलजलादावेपिचक्षुःसंयोगोविद्यते तदापृथिवीत्वाभावेतादृ
शयोग्यसन्निकर्षस्यापिसत्त्वेनोपनीतजलपरमाण्वादिविशेषणकस्यजलपरमाणौपृथिवीत्वन्नास्तीत्याकारकप्रत्यक्ष
स्यापत्तिवारणायघटवद्भूतलमित्यादिज्ञानसत्त्वेपिघटाभाववद्भूतलमित्यादिप्रत्यक्षापत्तिवारणायचतद्धेतुतायाआवश्य
कत्वादितिवदन्तिसौत्रान्तिकास्तुअयंघटइत्यादिसंवेदनगतोविषयाकारप्रतिबिम्बः तथाविधबिम्बपुरःसरःप्रतिबिम्बत्वात्
दर्पणादिगतमुखादिप्रतिबिम्बवदितिनित्यानुमेयाःसर्वेपिविषयाःसन्तीत्यनुपलब्धिसहकारेणाभावप्रत्यक्षकथनन्तु
क्तमित्याहुः तन्न घटमहम्पश्यामीतिविषयापरोक्षत्वस्यानुभवसिद्धत्वात्॰ उक्तलिङ्गाद्यप्रतिसन्धानेपिघटाद्यनुभवदर्शना
च्च किंचघटादिविषयमात्रस्यननित्यानुमेयत्वम् तथासत्यन्वयव्यतिरेकावगतज्ञानहेतुभावयोरिन्द्रियतत्सन्निकर्षयोर्वै

अ० यर्थ्यप्रसङ्गात्वन्मते व्याप्तिज्ञानादेरप्यनुमितिरूपत्वेन तत्राऽनुपयोगात् तस्मात्सिद्धं घटादिविषयानामपरोक्षत्वमिति· अत्र भट्टाः
४२ योग्यानुपलब्धिकरणकमर्थाभावज्ञानमनुपलब्धिप्रमाणम्· तथाहि तत्र घटाभावाकारवृत्तिज्ञानं मुख्यं प्रमाणम्· तज्जनकत्वा
दनुपलब्धेस्त्वौपचारिकः प्रमाणत्वव्यवहारः। ज्ञानात्मकप्रमाणस्य फलं चाभावगतज्ञानताख्यप्राकट्यमथवात्र घटाभावो
ज्ञात इति प्रत्ययसिद्धम् एवं प्रत्यक्षादिप्रमाणेऽपि अयं घट इत्यादिविषयाकारवृत्तिज्ञानं मुख्यं प्रमाणम्· घटादिप्राकट्यं
फलम्· एवमग्रेऽपि· इन्द्रियव्यापारादेस्त्वौपचारिकः प्रमाणत्वव्यवहारस्तज्जनकत्वात्· शाब्दानुमानिकाभावज्ञानव्यवच्छेदा
यानुपलब्धिकरणकमित्युक्तम्· अयोग्यस्यापि पिशाचादेरनुपलब्धिमात्रात्तदभावज्ञानवारणाय योग्यपदम्· अत्र वन्ध्यापुत्रो
नासीत्याकारविकल्पवृत्तौ प्रमाणत्वशङ्कानिरासायाभावोऽर्थेति विशेषणम्· प्रतियोगितासम्बन्धेनार्थे विशिष्ट इति याव
त्· विकल्पवृत्तिस्तु नार्थविशिष्टा· योगशास्त्रकारैः शब्दज्ञानानुपाती वस्तुशून्यो विकल्प इति तल्लक्षणप्रणयनात् करण
त्वं चात्र फलायोगव्यवच्छिन्नत्वे सति कारणत्वं लक्षणं बोध्यम्· अस्य चाभावप्रमादिरूपफलस्यायोगोऽयोगः कारणेऽस्मा
न्मादेयोगस्य सम्बन्धस्य प्रागभावः यद्वा योगेऽन्यत्राशीघ्रत्वकल्पनाद्योगाश्च यप्रमादिरूपफलस्यैव प्रागभावो ग्राह्यः त
स्य व्यवच्छेदः फलसम्पादनद्वारा यया नुपलब्ध्या तत्र यानुपलब्ध्यादिरित्यर्थः एवं चानुपलम्भस्यावान्तरव्यापारा

भावेनतद्बुद्धिजनकत्वासम्भवेपिनक्षतिः नचभूतलेघटोनास्तीतिज्ञानंप्र त्यक्षप्रमाणमेवेतिवाच्यम् इन्द्रियसन्निक
र्षाजन्यत्वात् नह्यभावेनेन्द्रियसन्निकर्षः संयोगः समवायोवासंभवति तयोर्भावधर्मत्वात् नापिविषयविशेषणीभावः अभावे
न्द्रिययोः सविषयत्वानभ्युपगमात् नापिकालिकः एकदेशस्थस्याप्यभावस्यप्रत्यक्षापत्तेः अतत्त्वात् नापिविशेषणविशे
ष्यभावः तस्यापिमूलभूतसम्बन्धगर्भतयातन्निवृत्तौनिवृत्तेः तथाहिमूलभूतसंयोगेनसमवायेनवासम्बद्धयोर्हिदण्डदेवदत्तयोः
पटशौक्ल्ययोर्वा विशेषणविशेष्यभावोदृष्टः नह्येवमिन्द्रियाभावयोः सम्बन्धोदृष्टचरइति अथाधिकरणीभावा
भावसाधारणसमवायः कल्प्यताम् स्वसंयुक्तसमवायादिलाघवबहुविधसन्निकर्षादेवाभावप्रत्यक्षोपपत्तेरभावस्थलेपिस्वरू
पसम्बन्धकल्पनामपेक्ष्यसमवायकल्पनेलाघवादितिचेन्न तथासतिप्रतियोगितयातत्समवेतनाशंप्रतिस्वप्रतियोगिस
मवेतत्वसम्बन्धेनतन्नाशस्यहेतुतयाभावस्यापिनाशापत्तेः नचसामान्यतोनाशत्वावच्छिन्नंप्रतिजन्यसत्त्वेनप्रतियो
गिनोहेतुतयातादृशसामान्यसामग्र्यभावात्कथमभावस्यनाशापत्तिरितिवाच्यम् तत्तन्नाशत्वावच्छिन्नंप्रतितत्तद्व्यक्तित्वे
नप्रतियोगिनोहेतुत्वस्यावश्यकत्वेनादृशसामान्यकार्यकारणभावेमानाभावात् नचैवंमहाप्रलयकालीननाशत्वाव
च्छिन्नानुत्पादेनतत्तद्व्यक्तित्वावच्छिन्नाभावकूटस्यप्रयोजकत्वेगौरवमितिवाच्यम् अदृष्टत्वावच्छिन्नाभावस्यैवतत्प्रयो

तत्पदद्रव्यंसमवायिकारणपरं ४

जन्यसत्त्वेन ५

अ॰ जकत्वात्समवायासिद्धेः यत्तु यथा भावस्थले समवायसिद्धिस्तथाऽभावस्थलेपि साइर्वोरा· उक्तापत्तिवारणाय सामान्यत
४३ उक्तकार्यकारणभावाङ्गीकारात् न चैतद्वगौरवमिति वाच्यम् अभावस्थले ननुस्वरूपाणां सम्बन्धत्वकल्पनामपेक्ष्य
चक्षुस्संयुक्तविशेषणता· चक्षुःसंयुक्तसमवेतविशेषणता· चक्षुःसंयुक्तसमवेतसमवेतविशेषणतादीनामिन्द्रियभे
देन स्वातन्त्र्येण हेतुताकल्पनामपेक्ष्य चतादृशहेतुतायामेव लाघवात्· भावाभावसाधारणसमवायाङ्गीकारे चक्षुः संयु
क्तसमवायादिहेतुतयैवाभावस्थलेपि निर्वाहेण चक्षुःसंयुक्तविशेषणतादीनामहेतुत्वात् न चैवं नित्याभावे जाति
त्वापत्तिर्नित्यानेकसमवेतत्वादिति वाच्यम् भावत्वस्यापि जातिलक्षणे निवेशात् अथाभावप्रत्यक्षं प्रति चक्षुस्संयुक्तस
मवायस्य हेतुत्वे प्रतियोगिज्ञानशून्यकालेप्यभावप्रत्यक्षापत्तिः न चाभावप्रत्यक्षे प्रतियोगिज्ञानस्य हेतुतया तदभावा
न्नापत्तिरिति वाच्यम् प्रतियोगिज्ञानं विनापि चक्षुः संयुक्तसमवायेन घटत्वादिप्रत्यक्षोत्पादेन तदभावस्याकिञ्चित्कर
त्वात्· मन्मते चक्षुःसंयुक्तविशेषणतया प्रतियोगिज्ञानं विना क्वापि फलाजननेन· तया फलजनने प्रतियोगिज्ञानस्य स
हकारित्वसम्भवेनोक्तापत्त्यभावादिति चेन्न त्वन्मतेपि विशेषणता विशेषेण वृत्तिमत्साक्षात्कारं प्रति चक्षुः संयुक्तविशे
षणतायाः अभावसमवायोभयप्रत्यक्षसाधारण्येनैकहेतुतया तादृशविशेषणतया समवायस्य प्रतियोगिज्ञानं विनापि घ

अभावीयसमवायानङ्गीकर्तृमते २

टः समवायत्वानितिमत्यक्षेत्यादेस्तत्था फलजनने प्रतियोगिज्ञानविरहस्याकिञ्चित्करत्वेनोक्तापत्तेर्दुर्वारत्वात् ननु सम्बन्धप्रत्यक्षे सम्बन्धि
ज्ञानस्य हेतुतया सम्बन्धस्य सम्बन्धिन एव प्रतियोगितया समवायप्रतियोगिरूपादिज्ञानं विना घटादौ रूपादिसमवायप्रत्यक्षस्याप्य
नुभवविरुद्धतया प्रतियोगिज्ञाने उक्तव्यभिचाराप्रसक्त्या नप्रतियोगिज्ञानं विना चक्षुःसंयुक्तविशेषणतया काप्यभावप्रत्यक्षोत्पत्तिरिति चे
न्नैतद्भिन्नवृत्तिविषयतासम्बन्धेन ज्ञानं प्रति तद्भेदस्य हेतुतया घटो घट इत्यादौ शाब्दबोधवारणायावश्यकतया प्रतियोगिमिश्रिताभावप्र
त्यक्षस्याभावभिन्नेऽवश्यमुत्पत्त्यात तत्तद्भिन्नवृत्तिविषयतासम्बन्धेन ज्ञानोत्पत्तिनियामकतद्भेदस्याभावेऽसत्त्वादेव प्रतियोग्यविशेषिताभावप्रत्य
क्षापत्तेर्निराकृतत्वान्नाभावीयसमवायासिद्धिरित्याहुः तन्न पूर्वोक्तनाशत्वेन जन्यसत्त्वेन सामान्यकार्यकारणभावस्य जन्यसत्त्वशून्ये प्रागभावे
नाशोत्पत्त्या व्यभिचारेण तत्वेन स्वीकर्तुमशक्यतयोक्तकपालादिनाशाद्धटादिध्वंसनाशापत्तेर्वारणात् समवायसाधकरूपसमवायी घट इत्यादि
प्रत्ययवत् ध्वंससमवायी घट अभावसमवायी भूतलमित्यादिप्रत्ययाभावाच्च प्रत्युत प्रतियोगित्वादिरूपनानाविशेषणतासाधकध्वं
सप्रतियोगी घट अभावानुयोगी भूतलमित्यादिप्रत्ययसम्भवात् प्रत्ययस्यैव पदार्थसाधकत्वात् अन्यथाऽनन्ताज्ञातपदार्थाभ्युपा
गमापत्तेः ननूक्तरीत्याऽभावेन्द्रिययोः साक्षात्सम्बन्धासत्त्वेऽप्यधिकरणद्वारा परम्परासम्बद्धविशेषणतालक्षणातिरिक्तसन्नि
कर्षस्वीकारान्नाभावप्रत्यक्षानुपपत्तिः। घटाभाववद्भूतलमित्यादाविन्द्रियसंयुक्ते भूतले स्वरूपेणाभावस्य ——

गगने स्पर्शाभाववत्स्पर्शोऽन्यस्पर्शग्राहकयावत्कारणसत्त्वेऽपि स्पर्शानुपलम्भादात्मवदित्यनुमानात्। शब्दाद्वेत्यादिरूपम् ५ गुरोरनुमानान्तर्भूतम् ५

अ विशेषणत्वादिति चेन्न अतिरिक्तव्यापारस्य तन्निष्ठकारणत्वस्य च कल्पने गौरवात् न चासम्बद्धस्याप्यभावस्य प्रत्यक्षत्वे
४४ को दोष इति वाच्यम् चक्षुःसंयुक्ते घटेऽसम्बद्धस्यापि घटत्वाभावादेः प्रत्यक्षापत्तेः न च तत्परिहारिका दृश्यानुपलब्धिर्भ
विष्यतीति वाच्यम् तथा सति तावन्मात्रस्यैव करणत्वेनेन्द्रियस्य वैयर्थ्यात् न चान्यस्यापि कर्षो घटे शौक्ल्याभावप्रमि
तिप्रसङ्गः। प्रतियोगिग्राहकेन्द्रियेणैवाश्रयग्रहणस्यापेक्षत्वात् न च व्योम्नि स्पर्शाभावाद्यग्रहणप्रसङ्गः इति वा
च्यम् इष्टापत्तेः तद्ग्रहणस्य प्रमाणान्तरनिबन्धनत्वात् नाप्यनुपलब्ध्यधीनाभावज्ञानमनुमित्यन्तर्भूतम् ज्ञापमा
नस्यैव गौणानुमानस्य करणत्वेन च धूमादिवदनुपलब्धेस्त्वज्ञायमानाया एव करणत्वात् अन्यथानुपलब्धेरप्यभावव
त्ता केवलप्रत्यक्षानुमानयोरगोचरतयानुपलब्ध्येव ज्ञानं वाच्यमेवं तस्यास्तस्या अपीत्यनवस्थापत्तेः नापि शाब्दान्तर्भूतम् श
ब्दाश्रवणेऽपि सामग्रीसत्त्वेऽभावोपलम्भादित्यभावग्रहार्थमनुपलब्धिरूपप्रमाणान्तरमङ्गीकर्तव्यम् अत्रासुरार्थविद्याद्रत्या
दाविव नञस्तत्त्वविरोधिलक्षणाया उपलब्धिविरोध्यनुपलब्धिरित्यर्थोऽन्वेषः न तूपलब्धेरभावोऽनुपलब्धिरित्यव्ययीभावप्र
मासः तथा सत्यव्ययत्वापत्तेरित्याहुः अत्राभावस्य प्रत्यक्षप्रमानुपलब्धिप्रमा वेति विप्रतिपत्तिः आद्यकोटिर्नैयायिकाना
मन्त्यकोटिर्भट्टवेदान्तिनोः। नैयायिकानामयमाशयः। घटाभाववद्भूतलमिति ज्ञानस्य प्रत्यक्षत्वे एकस्य प्रत्यक्षप्रमाण

मतभेदेन सहकारितया स्वतन्त्रप्रमाणतया वा ५

स्यकरणत्वेन लाघवम् मद्वादिमते तूक्तज्ञाने भूतलांशे प्रत्यक्षप्रमाणस्याभावांशेऽनुपलब्धिप्रमाणस्य च करणत्वेनानुपलब्धि
प्रमान्यकल्पनेन च गौरवम् प्रमान्याभावेऽनुपलब्धेः प्रमाणान्तरत्वानुपपत्तेः तस्य तन्निपतत्वात् प्रमाविभाजकोपाध्यवच्छिन्नप्र
मानिष्ठकार्य्यतानिरूपितव्यापारसम्बन्धावच्छिन्नकारणतावत्त्वस्य प्रमाणपदार्थत्वात् अन्यथैकप्रत्यक्षस्यापि चक्षुरादिषट्प्रमा
णतापत्तेः न च न्यायनये घटवद्भूतलमित्युपलम्भसत्त्वेपीन्द्रियसन्निकर्षवशाद्घटाभाववद्भूतलमिति प्रत्यक्षापत्तिरिति वाच्य
म् तादृशोपलम्भाभावस्य सहकारिकारणतया कल्पनात् न च लाघवान् काशङ्केति वाच्यम् अनुपलब्धौ मतभेदेन व्या
पारवत्त्वे सति फलायोगव्यवच्छिन्नत्वे सति वा कारणत्वरूपकरणत्वस्य प्रमान्यस्य च कल्पनायेत पाकारणत्वमा
त्रकल्पने लाघवात् न चैवमपि न्यायनये घटाभाववद्भूतलमित्यत्राभावेनेन्द्रियाणां स्वसम्बद्धविशेषणतारूपव्यापारस्याधि
कस्य कल्पनाद्गौरवमिति वाच्यम् उक्तप्रत्ययेऽधिकरणप्रत्यक्षानुरोधेन भूतलादाविन्द्रियसंयोगस्य· तत्सम्बन्धघटितत्वस्य का
रकत्वलक्षणप्रमात्वानुरोधेन विशेष्ये भूतलादौ विशेषणतालक्षणाभावसम्बन्धस्य च नव्यमते व्यङ्गीकारात् अन्यथा विशे
षणतानङ्गीकारे संयोगादीनां तत्र बाधेनाभावप्रत्ययस्य प्रमात्वं न स्यात् । न स्यात्को दोष इति चेन्· भवदभिमतानुपलब्धेः प्र
माकरणत्वलक्षणप्रमाणत्वस्यासिद्धिप्रसङ्ग एव न चैवमपि मन्मतेः खण्डस्येन्द्रियसम्बद्धविशेषणतालक्षणसम्ब

श्र न्यस्यासिद्धिः अभावप्रत्यक्षानङ्गीकारादितिवाच्यम् तथापितस्यघटसमवायवत्कपालमितिसमवायप्रत्यक्षानुरोधेनतत्प्रत्वा
४५ त् नचसमवायोपिनप्रत्यक्षः सम्बन्धप्रत्यक्षेयावदाश्रयप्रत्यक्षस्यहेतुत्वात् अन्यथाघटभूतलसंयोगवत्घटाकाशसं
योगस्यापिप्रत्यक्षापत्तेरितिवाच्यम्घटसमवायवत्कपालमित्यबाधितप्रतीत्योक्तनियमघटितसम्बन्धपदस्यसंयो
गपरत्वाभ्युपगमात् उक्तनियमस्यतत्तत्प्रत्यक्षीयविशेष्यताश्रयानुयोगिकत्वविशिष्ट तत्तत्प्रत्यक्षीयप्रकारताश्र
यप्रतियोगिकत्वविशिष्टसंसर्गत्वावच्छिन्नसम्बन्धस्यप्रत्यक्षेयावत्तथाविधविशिष्टसम्बन्धाश्रयप्रत्यक्षस्यहेतु
त्वमित्यर्थकत्वेनोक्तस्थलेसमवायसाधारणप्रत्यक्षेपिनियमाविरोधाच्च अतएवयथाश्रुतसम्बन्धप्रत्यक्षमात्रेसम्ब
न्धिज्ञानस्यहेतुत्वेनिर्विकल्पकेसमवायभानानुपपत्तिरतःसांसर्गिकविषयतयासम्बन्धप्रत्यक्षएवसम्बन्धिप्रत्यक्ष
स्यहेतुत्वमितिकौस्तुभोक्तिरपिसङ्गच्छतेतेनचवैशेषिकमतेसमवायस्यातीन्द्रियत्वेनतत्प्रत्यक्षत्वेऽपसिद्धान्तइतिवाच्य
म्तत्प्रत्यक्षस्यतद्ग्राहकविशेषणतासन्निकर्षस्यचतत्रतत्रनवीनैः स्वीकारात् नचसमवायोतीन्द्रियोनित्यत्वेसतिचे
तनान्यभावत्वात्कालादिवदितिवैशेषिकानुमानमतीन्द्रियत्वसाधकम् घटत्वादौव्यभिचारात् वस्तुतोतीन्द्रियसाधार
णैकसमवायानङ्गीकर्तृनवीनमते समवायोपिसंयोगवन्नानैवयथाजसंयोगोनित्योऽन्यस्त्वनित्यः तथानित्यमात्र

द्रव्यगुणसामान्यविशेषेषु समवायो नित्यो ऽन्यस्त्वनित्य इत्येतन्मते ऽनायासेनैव घटसमवायवत्कपालमिति समवायप्रत्यक्षानुरोधे।
नाखण्डस्यैन्द्रियसम्बद्धविशेषणत्वस्य सिद्धिः नन्वेवमपि नित्यः सम्बन्धः समवाय इति तल्लक्षणं व्याघात इति चेत् अत्र संयोगो ऽन्य
नाभावीयस्वरूपसम्बन्धे चातिप्रसक्तत्वेनेष्टत्वात् संयोगान्यत्वे सति मुख्यसम्बन्धत्वस्यैव तल्लक्षणत्वात् अत्र मुख्यत्वं च विभा
जकधर्मवत्त्वे सति सम्बन्धानन्तराघटितत्वे सति सम्बन्धत्वम् कालिकादिसम्बन्धे ऽतिव्याप्तिवारणाय प्रथमं सत्यन्तम् षड्वि
धेन्द्रियसन्निकर्षविभाजकधर्मवति संयुक्तसमवायादावतिव्याप्तिवारणाय द्वितीयं सत्यन्तम् द्रव्यादावतिव्याप्तिवारणा
य सम्बन्धत्वम् संसर्गविभाजकधर्मवत्त्वे सति स्वेतराघटितत्वं तु फलितमिति महादीनां त्वयमाशयः न्यायरीत्यास्त्वा
खण्डसम्बन्धसिद्धिः न तु मन्मते मानाभावेन समवायस्यैवानङ्गीकारात् न च गुणवान् घट इति विशिष्टबुद्धिः विशेषण
विशेष्यसम्बन्धविषया विशिष्टबुद्धित्वात् दण्डीति विशिष्टबुद्धिवदित्यनुमानमिति वाच्यम् संयोगादीनां बाधेना
स्मदभिमतस्वरूपस्यैव साधकत्वात् समवायासिद्धेः न चैवं यत्समवेतं कार्यमुत्पद्यते तत्समवायिकारणमिति समवा
यिकारणव्यवस्थानं स्यात् भवताप्युपादानत्वेन स्वीकारादिति वाच्यम् तत्स्थाने यत्सम्बद्धं कार्यमुत्पद्यत इत्यस्यै
व निवेशात् न च कपालसम्बद्धघटध्वंसं प्रति कपालस्य समवायिकारणत्वापत्तिरिति वाच्यम् तथात्वे क्षतिविरहात् न च

अः कपालादिनाशे घटध्वंसादिनाशस्यावश्यकतया पुनर्घटाद्युन्मज्जनापत्तिरिति वाच्यम् यत्सम्बद्धं भावकार्यमुत्पद्यते इत्येवं
४६ लक्षणे भावत्वस्यापि निवेशात् तद्ध्वंसानीकपालादिकारणस्यासत्त्वादेवायत्नभावाच्च न च गौरवम्· समवायाकल्पनस्यैव लाघ
वादिति न तदनुरोधेन विशेषणतासन्निकर्षसिद्धिरिति· अत्रोच्यते· अस्तु समवायानङ्गीकारेणोक्तसन्निकर्षासिद्धिः त
थापि घटादेर्धर्मिणो ज्ञेयत्वप्रमेयत्वाभिधेयत्वप्रतियोगित्वानुयोगित्वाधारत्वाधेयत्वाद्यनन्तधर्माणां प्रत्यक्षानुरोधेन
तत्सिद्धिरूहनीया· न ह्यत्रापि विवादः भवतापि मया घटो ज्ञात इत्यादिप्रतीत्या ज्ञाततादीनां प्रत्यक्षताभ्युपगमात् त
दुक्तमस्त्वयं घट इत्यादिज्ञानमतीन्द्रियं ज्ञानजन्या ज्ञातता तु प्रत्यक्षा तया च ज्ञानमनुमीयत इति· अनुमानाकारस्तु म
या घटो ज्ञात इति ज्ञानीयज्ञातता· घटविशेष्यकघटत्वप्रकारकज्ञानजन्या घटवृत्तिघटत्वप्रकारकज्ञाततात्वात्
या यद्वृत्तिर्यत्प्रकारकज्ञातता· सा तद्विशेष्यकतत्प्रकारकज्ञानजन्या· यथा पटे पटत्वप्रकारकज्ञाततेति भट्टमते ज्ञात
तापि सविषया तथा च नाभावग्राहकसन्निकर्षासिद्धिरिति इदमत्र तत्त्वम् इन्द्रियसम्बद्धविशेषणतालक्षणस्वरूपस
म्बन्धस्यासत्त्वेपि नाभावप्रत्यक्षानुपपत्तिः तद्घटकानां संयोगादीनां विशेष्यविशेषणभावापन्नानामेव सम्बन्धत्वोपप
त्तेः· अत एवानुमानखण्डे जगदीशतर्कालङ्कारैरुक्तम्· घटो नास्तीत्यत्राभावे घटस्य सम्बन्धो घटत्वावच्छिन्नप्रतियोगि

ताकत्वरूपः सचनाखण्डात्मकः अपितु घटत्वावच्छिन्नत्वं प्रतियोगित्वं चेति त्रितयमेव विशेष्यविशेषणाभावापन्नं संसर्ग इ
ति· एवमेव रघुनाथशिरोमणिना दीधितिग्रन्थे· वह्निर्नास्तीत्यत्राभावे वह्नित्वेन तदवच्छिन्नत्वं प्रतियोगित्वं च संसर्गमर्याद
याभासते प्रतियोगिन इत्युक्तम् तथा च न संसर्गासिद्ध्याऽभावाप्रत्यक्षमिति सिद्धम् वस्तुतो भूतले घटो नास्तीति मया दृष्टमित्य
नुभवात्· इन्द्रियस्यानन्यथासिद्धान्वयव्यतिरेकवशाच्चेन्द्रियजन्यं प्रत्यक्षमेवाभावस्य युक्तम्· दृशेश्चाक्षुषज्ञानवाचकतया
ऽनुमित्यादाविवानुपलब्ध्येप्यसंभवात् न चेन्द्रियस्याधिकरणप्रतियोगिनोर्ग्रहे एवोपयोग इति वाच्यम् अधिकरणादिज्ञा
नस्यानुमितिस्मरणाद्यात्मकस्यान्यथा तादृशायामपि सत्त्वेनोपयोगानुपपत्तेः नचानुपलब्ध्याऽभावज्ञाने प्रतियोगिग्राह
केन्द्रियजन्याधिकरणादिज्ञानं हेतुरिति वाच्यम् परमते स्तम्भे पिशाचत्वाद्यभावग्रहे प्रतियोगिग्राहकेन्द्रियाप्रसिद्धेः वा
य्वादावुद्भूतरूपाभावस्य परमाणौ महत्त्वाभावस्याप्रत्यक्षापत्तेश्चेति ध्येयम् यत्तु प्रतियोग्यनुपलम्भमात्रस्य न प्रतियोग्य
भावज्ञानजनकत्वम् तत्सत्त्वेपि सुषुप्त्यादावभावज्ञानानुत्पत्त्या व्यभिचारात् तद्धारणाय पूर्वोक्तप्रतियोगितत्सन्निकर्षेत
रप्रतियोगिग्राहकसामग्रीरूपयोग्यतासहितानुपलब्धिरभावग्राहिका वाच्या तथा च यत्र यत्र घटादीनां योग्यतासहितानु
पलब्धिस्तत्र तत्र घटादीनामभाव इत्येवं योग्यानुपलब्धेर्धूमादिवदव्यभिचारितयाऽभावानुमितिजनकत्वोपपन्नोक्तः प्र

अ॰ माणान्तरता। अनुमानप्रयोगस्तु भूतलं घटाभाववत् तादृशयोग्यताव त्वे सति घटानुपलम्भात् स्थलान्तरवदित्यादिरूपमिति
५७ सौगतमतं तन्न सम्यक् अनुपलब्धेर्व्यापाराभावेनानुमितिकरणत्वासम्भवात् न च प्रतियोगिस्मरणमधिकरणग्रहणं वास्तु तद्व्या
पार इति वाच्यम् तयोर्विषयेन्द्रियादिसामग्रीजन्यत्वेप्यनुपलम्भरूपकरणाजन्यत्वात् करणजन्यत्वे सति करणजन्यफलज
नकस्यैव करणव्यापारत्वात् न च केवलानुपलम्भस्य तदजनकत्वेप्युक्तसामग्रीरूपयोग्यताविशिष्टस्यास्येव तज्जनकता
शिखीध्वस्त इत्यादौक्त विहितिशेषणाद्वृत्तिधर्मस्य विशिष्टवृत्तित्वदर्शनादिति वाच्यम् तथा सति घटादिभावप्रत्यक्षत्वानु
बेक्षणे सर्वत्रैव प्रागभावात्मकघटाद्यनुपलम्भसम्भवेन भावप्रमितौ नामपीन्द्रियादिसहितभावानुपलम्भकरणजन्यतयाता
सुतासु प्रत्यक्षत्वादिप्रमास्विन्द्रियादीनां करणत्वप्रवादः प्रत्यस्तमियात् न च विषयसत्त्वैवानुमित्यादौ प्रतिबन्धकास्त्विति वाच्य
म् प्रत्युत स्वप्रत्यक्षे केषांचिद् दुरुत्वादीनां प्रतिबन्धकत्वदर्शनेपि स्वानुमित्यादौ विषयाणां प्रतिबन्धकत्वादर्शनात्· सत
त्त्वकल्पने गौरवाच्च किंचानुमितिकरणमनुमानं तच्च ज्ञायमानं लिङ्गं लिङ्गज्ञानं वा नैयं तथा सम्भवति· चक्षुरादिवद
नुपलब्धेरज्ञायमानाया एव करणत्वात् न चाज्ञात लिङ्गस्याप्यनुमानत्वे को दोष इति वाच्यम् लिङ्गज्ञानाभावे व्याप्तिस्मरणपक्ष
धर्मत्वज्ञानानुपपत्तेरेव ——दोषत्वात् ननु वस्तु ज्ञानानुपलब्धिरेवाभावप्रमायां प्रमाणमिति चेन्न तज्ज्ञानासम्भवात्· अनुपल

थितिलिङ्गस्याप्यभावत्वेनभवतेन्द्रियवेद्यत्वानङ्गीकारान्नित्यानुमेयत्वाङ्गीकाराच्चानुपलब्धिप्रमाणमेवानुपलब्धिज्ञानेपिप्र
रणमेवमप्येतन्न तत्रापीत्यनवस्थापत्तेरु‾क्तत्वात् किञ्चोक्तप्रतियोग्युपलम्भस्यप्रतियोग्यभावप्रत्ययम्प्रतिप्रतिबन्धकत्वेना
भावप्रत्ययेक्तप्रतिबन्धकाभावविधयैवनस्यहेतुत्वमित्यस्मिन्मतेनानुपलब्धेः स्वातन्त्र्येणसहकारिता प्रमाणान्तापिवा सौगतम
तेऽतिरिक्तप्रमाणत्वेन भट्टपादवेदान्तिमतेत्वभावस्यातिरिक्तानुपलब्धप्रमाङ्गीकारेणानुमितिसामग्र्याइवभिन्नविषयकप्रत्यक्षा
दिकंप्रत्यनुपलब्ध्यादिघटितापाश्चनुपलब्धप्रमासामग्र्या अपिप्रतिबन्धकत्वकल्पनेनगौरवंपरमतिरिच्यतइतिस्यादन्यत्रविस्त
रः चित्सुखाचार्य्यास्तु भवतुवाभिन्नैवानुपलब्धिरनुमानात्तथापिनाभावः प्रमितिकारणम् विकल्पासहत्वात् तथाहि
किमुप‾लब्धेः प्रागभावोनुपलब्धिरुतप्रध्वंसः किंवान्योन्याभावोत्यन्ताभावोवा नाद्यः दृष्टनष्टेघटेतदुपलब्धिप्रागभावाभा
वेपिघटाद्युपलब्धिप्रध्वंसेनैवाभावप्रमितिदर्शनात् नापिद्वितीयः घटादिप्रागभावात्यन्ताभावप्रमित्यनुत्पत्तिप्रसङ्गात् ।
घटाद्युत्पत्तेः प्राग्घटादिनेन्द्रियसन्निकर्षाभावेनप्रतियोग्युपलब्धेरसंजातत्वादेवतत्प्रतियोगिकप्रध्वंसाभावात् उत्त
रकालेचघटादिप्रागभावस्यैवनाशात्तत्प्रत्यक्षानुपपत्तेः नापितृतीयः घटादीनामुपलब्धिसमयेप्यात्मनितदन्योन्याभाव
सम्भवेनतदभावप्रतीतिप्रसङ्गात् नापिचतुर्थः दृष्टनष्टघटाद्यभावदृश्यमानानुत्पन्नघटाद्यभावप्रमित्यनुदयापत्तेः । अ

स्या· तीतयदाद्युपलम्भध्वंसवतिभावियदाद्युपलम्भप्रागभाववतिचात्मनियदाद्युपलम्भात्यन्ताभावासम्भवात्· ध्वंसप्रागभावा
५८ भ्यामत्यन्ताभावस्याविरोधात्· एतेनोपलम्भसंसर्गाभावःकारणमित्यपिनिरस्तम् तत्राप्युक्तप्रागभावादिविकल्पानामप्रा
तिबहुप्रसरत्वादित्यनुपलब्धेःकारणत्वनैवनास्तिकुतः प्रमाणत्वसहकारित्वशङ्कापीतिप्रत्यक्षतत्त्वप्रदीपिकायामाहुः तद
व्यमनोरमम् उपलम्भादिप्रतिबन्धकसंसर्गाभावस्यैवकार्यजनकत्वात्नचप्रतिबन्धकसंसर्गाभावस्यप्रागभावत्वादि
नाहेतुत्वेउक्तव्यभिचारापत्तिरितिवाच्यम् एकधर्मावच्छिन्नकार्यतानिरूपितानानाप्रागभावत्वादिनाहेतुतास्वीकारेव्य
भिचारसम्भवेयैनादृशकार्यतानिरूपितैकसंसर्गाभावत्वादिरूपेणाहेतुतायांव्यभिचारानवकाशात्· अनन्यथासिद्धका
र्योव्यवहितपूर्ववृत्तिताद्यत्यन्ताभावप्रतियोगितानवच्छेदकधर्मवत्त्वस्यैवकारणतापदार्थत्वेनात्रानुगतप्रतिबन्ध
कसंसर्गाभावत्वरूपतादृशधर्मवत्त्वयोक्तप्रागभावादीनांत्रयाणांकारणत्वसम्भवात् नन्वेवमपिप्रतिबन्धकप्रागभा
वादीनांत्रयाणांयदिप्रतिबन्धकनिष्ठप्रतियोगिताकसंसर्गाभावत्वेनहेतुता· तदायत्किंचित्प्रतिबन्धकसत्त्वेपिप्रति
बन्धकान्तरप्रतियोगिकसंसर्गाभावस्यसत्त्वेनकार्योत्पत्तिः यदितुप्रतिबन्धकप्रतियोगिकसंसर्गाभावकूटत्वेनहेतुता
तदाक्वापिकार्यंनस्यात्· ध्वंसप्रागभावादीनामेकदैकत्रासत्त्वेनतत्कूटाधिकरणत्वस्यकुत्रापिकदाप्यसम्भवात्यदिच

प्रतिबन्धकत्वावच्छिन्नप्रतियोगिताकसंसर्गाभावत्वेनसामान्यरूपेणाहेतुता· तदाविध्वंसप्रागभावयोर्हेतुतानस्यात्· तयोः
सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वानङ्गीकारादितिचेन्नध्वंसप्रागभावयोरपिसामान्यधर्मावच्छिन्नप्रतियोगिता
कत्वाङ्गीकारात् नतुनीलघटाधिकरणेकपालादौपीतघटोनास्तीतिप्रत्ययः नतुघटोनीलघटोवानास्तीति· एवंपीतघटा
धिकरणेनीलघटोनास्तीतिप्रत्ययः नतुपीतघटोनास्तीत्यादिःपीतितत्तत्प्रत्ययोपपत्तयेहितत्तद्विषयभूताभावानांभेदस्याव
नायात्यन्ताभावप्रतियोगितायांतत्तद्धर्मावच्छिन्नत्वमङ्गीक्रियते· एवमन्योन्याभावेपि· घटादिध्वंसप्रागभाववतिकपाले
चकेनापिरूपेणघटादीनांतदानीमसत्त्वादुक्तयुक्त्यसम्भवेनतयोःकिञ्चिद्धर्मावच्छिन्नप्रतियोगिताकत्वमप्रामाणिक
मेवेतिचेन्नप्रतिबन्धकत्वेतरधर्मानवच्छिन्नप्रतिबन्धकनिष्ठप्रतियोगिताकसंसर्गाभावत्वेनध्वंसादीनांत्रयाणांकारण
त्वसम्भवात् एतेनप्रतिबन्धकसत्त्वेप्युभयत्वादिनातदत्यन्ताभावसत्त्वात्कार्योदयापत्तिरितिनिरस्तम् उभयत्वादीनांप्र
तिबन्धकत्वेतरत्वात् नचैवमप्युक्तदोषाप्रतिकारः प्रतिबन्धकसत्त्वेपिकिञ्चित्प्रतिबन्धकप्रतियोगिकतादृशसंसर्गा
भावसम्भवादितिवाच्यम् प्रतिबन्धकत्वेतरधर्मानवच्छिन्नतत्तत्कार्याधिकरणवृत्तियावत्प्रतिबन्धकनिष्ठप्रतियोगिता
कत्वेनसंसर्गाभावस्यहेतुताभ्युपगमात् नचैकसम्बन्धेनप्रतिबन्धकसत्त्वेप्यन्यसम्बन्धेनतत्सामान्याभावस्यापिसम्भवा

अत्रपक्षद्वितीयगगनेनप्रतिबन्धकाभावमादायदोषपुञ्जाभ्येततदेदंधमपदंदेयम्॥

अ त्वाद्यनुपपत्तिर्दुर्वारा· यदिचप्रतिबन्धकतावच्छेदकसम्बन्धावच्छिन्नत्वंतादृशप्रतियोगिताविशेषणमित्युच्यते· तदाध्वंसप्राग
४९ भावयोरसङ्ग्रहः तत्प्रतियोगितायांसम्बन्धावच्छिन्नत्वाभावादितिवाच्यम्प्राचीनैर्ध्वंसादिप्रतियोगितायामपिसम्बन्धावच्छि
न्नत्वोपगमात्· तदुक्तंजगदीशेः प्रागभावध्वंसयोरप्युत्तरकालपूर्वकालावेवप्रतियोगितावच्छेदकसम्बन्धावितिताभ्यामेव
सम्बन्धाभ्यांप्रतियोग्यारोपः प्रागभावध्वंसयोःप्रत्यक्षेहेतुरतस्तयोर्नासङ्ग्रहइतिप्राचामाशयइति· यदिचसमवायेनघटाधि
करणेसंयोगेनघटोनास्ति· संयोगेनघटाधिकरणेसमवायेनघटोनास्तीतिप्रतीतेःसर्वसम्मततयाघटतदभाववत्ताबु
द्धोःप्रतिबद्धप्रतिबन्धकभावसंरक्षणायात्यन्ताभावीयप्रतियोगितायांनतत्सम्बन्धावच्छिन्नत्वाङ्गीकारेऽपिघटध्वंसादि
मतिकपालेचतदानींकेनापिसम्बन्धेनघटादेरसत्त्वात्तादृशप्रत्यक्षसम्भवेनध्वंसादिप्रतियोगितायांसंसर्गावच्छिन्नत्वमप्रा
माणिकमेवेत्युच्यते· तदास्मदुक्तप्रतिबन्धकनिष्ठप्रतियोगितायांप्रतिबन्धकतावच्छेदकसम्बन्धेतरसम्बन्धानवच्छिन्न
त्वविशेषणंतेनाप्युक्तदोषवारणादितिप्रतिबन्धकप्रागभावादीनामुक्तैकरूपेणसंसर्गाभावत्वेनहेतुताहनीया· अथैवम
प्येकदाहादिकार्यप्रतिबन्धकमण्यादिमतिअन्यघटाभावप्रत्यक्षादिकार्यविघटकयावत्प्रतिबन्धकाभाववतिचभूतलादौ
घटाद्यभावप्रत्यक्षानुपपत्तिः तत्रतत्कार्याश्रयेयावत्प्रतिबन्धकाभावासत्त्वात्· यदिचतत्तत्कार्यम्प्रतितत्तत्कार्यविघटकत

त्स्थलीययावत्प्रतिबन्धकाभावत्वेनविशिष्यैवहेतुतास्वीक्रियते· तदासामान्यकार्यकारणभावेमानाभावेनकथंध्वंसादीना
मेकरूपेणहेतुता नचयद्विशेषयोःकार्यकारणभावोऽसतिबाधकेतत्सामान्ययोरपीतिनियमएवतत्रमानमितिवाच्यम् तस्या
प्यप्रयोजकत्वात् नचकार्यसामान्याभावेकारणानांप्रतिबन्धकाभावानांतत्तद्व्यक्त्यभावकूटस्यप्रतिबन्धकस्यप्रयोजक
त्वेगौरवम् कारणतावच्छेदकप्रतिबन्धकाभावत्वावच्छिन्नाभावस्यैकस्यतथात्वेलाघवम् तच्चप्रतिबन्धकसंसर्गाभा
वत्वस्यकारणतावच्छेदकत्वमन्तरेणनसम्भवति· कारणतावच्छेदकधर्मावच्छिन्नाभावस्यैवकार्यतावच्छेदकधर्मावच्छि
न्नाभावप्रयोजकत्वात् तथाचलाघवमूलकएवयद्विशेषयोरित्यादिन्यायइतिवाच्यम् यतःकारणतावच्छेदकधर्माव
च्छिन्नाभावएवकार्याभावेप्रयोजकइतिननियमः किंतुस्वरूपसम्बन्धरूपप्रयोजकत्वम्प्रतीत्यनुरोधेनलघ्वनतिप्रसक्त
धर्मावच्छेदेनकल्प्यतइतिनियमः तथाचलाघवादेवकारणतानवच्छेदकप्रतिबन्धकसंसर्गाभावत्वावच्छिन्नप्रति
योगिताकैकाभावस्यप्रतिबन्धकरूपस्यकार्यसामान्याभावप्रयोजकत्वम्प्रतिबन्धकाभावत्वेनकार्यत्वेनकार्यकारणभा
वमन्तरेणापिसूपपादनमेवेतिसामान्यकार्यकारणभावेप्रमाणाभावएवेतिचेन्नमास्तूक्तसंसर्गाभावत्वेनसामान्यरूपेणहेतुता
अस्तुचविशिष्यैवतत्तद्व्यक्तित्वेनप्रतिबन्धकध्वंसादीनांहेतुता· तथाप्यभावप्रत्यक्षेप्रतियोग्युपलम्भाभावानांतत्तद्व्यक्तित्वे

अ॰ न्ताविकारणतायानिराबाधतयानचित्सुखाशासिद्धिरितिप्राचामाशयः॰ अत्रनव्यनैयायिकास्तु प्रतिबन्धकसंसर्गाभावत्वेनात्य
५० न्ताभावस्यैवहेतुतानतुध्वंसप्रागभावयोरपिनचान्योन्याभावभिन्नाभावत्वलक्षणसंसर्गाभावत्वस्यध्वंसादिसाधारणत्वेना
तिप्रसक्ततयानकारणतावच्छेदकत्वसम्भवइतिवाच्यम्प्रतिबन्धकानामेकसम्बन्धेनसत्त्वेऽप्यन्यसम्बन्धेनतदभावमादा
यकार्य्योत्पत्तिवारणाय यद्यद्रूपेणयद्यत्संसर्गेणप्रतिबन्धकानांकार्यविघटकत्वं तत्तद्रूपावच्छिन्नतत्तत्संसर्गाव
च्छिन्नप्रतियोगिताकाभावत्वलक्षणसंसर्गाभावत्वेनात्यन्ताभावस्यैवहेतुत्वात् ध्वंसप्रागभावयोश्चप्रतियोगितायांतत्तद्रू
पतत्तत्संसर्गावच्छिन्नत्वानुपगमेनासङ्ग्रहादेवानतिप्रसङ्गात् नचैवमत्यन्ताभावत्वेनैवात्यन्ताभावस्यकारणतास्तुकिंसं
सर्गाभावत्वेनेतिवाच्यम्नित्यत्वाघटितनिरुक्तसंसर्गाभावत्वापेक्षयातद्घटितनित्यत्वेसतिसंसर्गाभावत्वरूपात्यन्ता
भावत्वस्यगुरुतयाकारणतानवच्छेदकत्वात् नचैवंप्रतिबन्धकध्वंसप्रागभावाधिकरणेकार्य्यानुत्पत्तिप्रसङ्गः अत्यन्ताभा
वस्यध्वंसप्रागभावाभ्यांविरोधादेवतत्रासत्त्वादितिवाच्यम्विरोधिबीजाभावेनतत्राप्यत्यन्ताभावसम्भवात् नचप्रतियो
गिसत्त्वकालेपितदत्यन्ताभावस्यनित्यत्वेनसत्त्वात्तत्रकार्योत्पत्तिस्तदवस्थेतिवाच्यम् प्रतियोगिविशिष्टाधिकरणेप्रतियो
ग्यभावीयविशेषस्वरूपसम्बन्धतानुपगमात् एवमेवोत्तेजकाभावेऽप्यत्रापिबोध्यम् तेननप्रागभावादिविकल्पेनोक्त

प्रतियोगिवृत्त्यभावत्वरूपात्यन्ताभावत्वेनविशिष्टायत्तिरितिसूचितंरूपपदेन५

दोषावकाशः तथा चेन्द्रियेणाभावप्रत्यक्षे प्रतियोग्युपलम्भात्यन्ताभावस्यैकस्यैव कारणत्वेनोक्तप्रागभावादिविकल्पासम्भवादित्यक्तौ मैनाप्यनुपलब्धिरङ्गीकार्य्येति प्राहुः। अत्राऽतिनव्यास्तु अभावप्रत्यक्षे निरुक्तयोग्यानुपलब्धेर्हेतुत्वे मानाभावः। जलपरमाणावेव पृथिवीत्वाद्यभावग्रहस्याप्रसिद्ध्यापादनासम्भवात् न च प्रसिद्धस्य पृथिवीत्वाद्यभावग्रहस्याभावविषयतानिरूपितविषयतासम्बन्धेन जलपरमाणावेवापत्तिः सम्भवतीति वाच्यम् अत्रापादकाभावात् न च विशेष्यतासम्बन्धावच्छिन्नप्रतियोगिताकप्रतियोग्युपलम्भाभावस्य बाधाभावमुद्रयोक्तसम्बन्धेनाभावप्रत्यक्षे हेतुतया तस्यैव जलपरमाणावेतेन सम्बन्धेनाभावप्रत्यक्षापादकत्वमिति वाच्यम् प्रतियोग्युपलम्भस्यात्मनिष्ठप्रत्यासत्त्यैव प्रतिबन्धकत्वोपगमेनात्मनिष्ठप्रत्यासत्त्यैव तदभावस्य हेतुतया विषयनिष्ठप्रत्यासत्त्या तदभावप्रत्यक्षापादकत्वविरहात् न चात्मनिष्ठप्रत्यासत्त्या प्रतिबन्धकत्वोपगमेऽधिकरणविशेषान्तर्भाव आवश्यकः अन्यथाधिकरणान्तरविशेष्यकप्रतियोग्युपलम्भस्याप्यधिकरणान्तरावगाह्यभावप्रत्यक्षं प्रति प्रतिबन्धकत्वापत्तेः तथा चानन्ताधिकरणभेदेन प्रतिबन्धकताबाहुल्यापत्तिरिति तदपेक्षयाधिकरणनिष्ठप्रत्यासत्त्या प्रतिबन्धकतायां लाघवमिति वाच्यम् समानविशेष्यकयोरपि विभिन्नधर्मितावच्छेदककाभावप्रत्यक्षप्रतियोग्युपलम्भयोः प्रतिबध्यप्रतिबन्धकभावविरहेण समानविशेष्यताप्रत्यासत्तिवत्स्यापि धर्मितावच्छेदकविशेषनिवेशस्यावश्यकतया धर्मितावच्छेदकधर्मान्निवेश्याधिकरण

अनु० न्यनिवेशस्यात्मनिष्ठप्रत्यासत्त्यैवप्रतिबन्धकत्वोपगमेनभिन्नविशेष्यकयोरपिसमानधर्मितावच्छेदकज्ञानयोः प्रतिबध्यप्रतिबन्धकभावोप-
५१ गमेक्षतिविरहात् अन्यधर्मितावच्छेदकभेदेनप्रतिबन्धकताकल्पनमपेक्ष्यसमानधर्मितावच्छेदकत्वप्रत्यासत्त्यैवतत्कल्पनमुचि
तम्. एवंचप्रतियोग्युपलम्भाभावस्यधर्मितावच्छेदकनिष्ठप्रत्यासत्त्यैवहेतुतयाजलपरमाणुत्वादिनादृष्टाकारणबलात्पृथिवी
त्वाद्यभावप्रत्यक्षापत्तिवारणाययोग्यताविशिष्टधर्मितावच्छेदकतासम्बन्धावच्छिन्नप्रतियोगिताकप्रतियोग्युपलम्भाभावस्य
हेतुत्वमावश्यकम्. योग्यत्वंचप्रतियोगितद्व्याप्येतरप्रतियोग्युपलम्भककारणासमानाधिकरणावृत्तित्वम्. जलपरमाणुत्वादौ
चतद्विशिष्टानुपलम्भाभावान्नातिप्रसङ्गः इतिचेन्नधर्मितावच्छेदकघटितनिश्चयत्वानाहार्यत्वादिनिवेशानुरोधेनप्रतिबन्धक
तावच्छेदककोटौधर्मितावच्छेदकनिवेशस्यावश्यकतयात्मनिष्ठप्रत्यासत्त्यैवप्रतियोग्युपलम्भस्यप्रतिबन्धकत्वात् वस्तुतस्तु
त्वयुक्तयानुमितिपरामर्शयोर्हेतुत्वमपिसमानधर्मितावच्छेदकत्वप्रत्यासत्त्यैववाच्यम् तथाचघटोघटभेदव्याप्यवानित्याद्याकारक
परामर्शाद्ध्रदोघटभिन्नइत्याद्यनुमितिवारणायतद्धर्मावृत्तित्वविषयतासम्बन्धेनज्ञानंप्रतितद्धर्मभेदस्यावश्यंकारणताकल्पनीया
एवंचतत्रघटभेदाद्यनुमितेर्धर्मितावच्छेदकतासम्बन्धेनोत्पत्तौघटत्वादिभेदस्यापेक्षणीयतयानोक्तापत्तिः तथाचपरमाणुत्वादि
भेदस्यापितदवृत्तित्वविषयतासम्बन्धेनज्ञानंप्रतिहेतुतयापृथिवीत्वाद्युपलम्भाभावस्यतादृशभेदकूटसहकृतस्यैवधर्मितावच्छे

दकतासम्बन्धेन पृथिवीत्वाद्यभावप्रत्यक्षोत्पादप्रयोजकतयाधर्मितावच्छेदकनिष्ठप्रत्यासत्त्याप्रतियोग्युपलम्भाभावहेतुत्वेपिनो
क्ताभावप्रत्यक्षापत्तिः अथैवमप्यभावप्रत्यक्षेधर्मिभानेनियामकाभावेनजलत्वादिनाप्रत्यक्षजलादेरिवजलपरमाण्वादेरपिपृ
थिवीत्वाद्यभावधर्मितयाभानंकिंनस्यादितिचेन्नपृथिवीत्वाद्यभावप्रत्यक्षस्यधर्म्यंशेलौकिकत्वनियमेनतत्प्रलौकिकप्रत्यक्ष
हेतुमहत्त्वादिघटितलौकिकप्रत्यक्षसामग्र्याएवतन्नियामकतयाजलपरमाण्वादेः पृथिवीत्वाद्यभावधर्मितयाऽभानादिति
प्राहुः पुनरुच्यते· पूर्वोक्तरीत्याविशिष्यैवतत्तद्व्यक्तित्वेनकार्यकारणभावस्यसिद्धान्ततयोत्तेजकाभावविशिष्टप्रतिबन्धकाभाव
त्वरूपगुरुधर्मेणतत्तद्व्यक्तित्वेनापिहेतुतानिर्युक्तिका तथाहियत्रचक्षुरादिघटितासामग्री· घटवद्भूतलमित्यादिप्रतिबन्ध
३६ कज्ञानम्· इदंज्ञानमप्रमेत्याद्युत्तेजकज्ञानंचवर्त्तते तत्रघटाभावादीनांचाक्षुषंजायते तंप्रत्युक्तसामग्र्या उक्तोत्तेजकस्य
चतत्तद्व्यक्तित्वेनहेतुता। एवंयत्रोक्तोत्तेजकंप्रतिबन्धकंचनास्तिचक्षुरादिघटितासामग्रीचवर्त्तते तत्रापिघटाभावादिचाक्षुषंजा
यते तंप्रत्युक्तसामग्रीमात्रस्योक्तरूपेणहेतुता· एवंयत्रप्रतिबन्धकंनास्तिउक्तोत्तेजकंसामग्रीचवर्त्ततेतत्राप्यभावचाक्षुषंजाय
तेतंप्रत्युक्तोत्तेजकसामग्र्योः तत्तद्व्यक्तित्वेनहेतुता· एवंयत्रोत्तेजकंनास्तिप्रतिबन्धकंचक्षुरादिघटितासामग्रीचवर्त्ततेतत्रघ
टाभाववद्भूतलमित्यादिचाक्षुषस्यानुदयात्तंप्रतिघट वद्भूतलमित्यादिज्ञानमात्रेकारणसत्त्वेकार्यानुत्पत्तिप्रयोजकत्व

श्रं० ५२ लक्षणप्रतिबन्धकताङ्गीकार्य्या नतुकारणीभूताभावप्रतियोगित्वरूपा· उक्तरीत्या प्रतिबन्धकाभावानामकारणत्वात् य
द्वा विशिष्य कार्यकारणभावस्य तत्तत्कार्यबलकल्प्यत्वात्तत्र च तत्तच्चाक्षुषादिकार्ये सैवानुदयात्तन्निरूपितकारणतापि त
च्चक्षुरादौ न कल्प्यते· एवं त्वाचादावपि· न चैवं सामान्यकार्यकारणभावो न स्यात्· तस्यानियुक्तिकत्वात् न च प्रति ब
न्धकाधिकरणावृत्तिकार्यसामान्याभावे तत्तत्कारणाभावकूटस्य प्रयोजकत्वकल्पनापेक्षया तत्र प्रतिबन्धकाभावरूपकार
णसामान्याभावस्य प्रयोजकत्वमेव युक्तमिति वाच्यम् उक्तोत्तरत्वात्· सृष्टिकाले कार्यसामान्याभावासिद्धेश्च न च महाप्रल
ये तदस्तीति वाच्यम् महाप्रलय एव दृढतरप्रमाणाभावात् तत्सत्त्वेपि तदानीं भावकारणानामप्यदृष्टादीनां सत्त्वादेव का
र्य्यसामान्याभावोपपत्तेश्च· न हि तत्रादृष्टमस्ति· कार्य्यमात्रध्वंसस्यैव महाप्रलयत्वात् न चानन्तरसर्गानुपपत्तिः। अदृष्टादि
साधकाभावेनेष्टत्वात् अन्यथा मुक्तानामपि वामदेवादीनां संसारापत्तेः· न चैतत्कल्पे सर्वत्र तत्तद्व्यक्तित्वेन कारणतायां
गौरवमिति वाच्यम् लाघवसम्भवे हि गौरवस्य दोषत्वात्· अनन्ततत्तत्कार्यप्रत्यनन्ततत्तद्व्यक्तीनां प्रतिबन्धकता तद
भावानां कारणता च कल्पनापेक्षया प्रतिबन्धकस्थले कार्यापत्तिवारणाय तदल्पतरव्यक्तीनां कार्यानुत्पादकत्वादिमात्र
कल्पन एव लाघवाच्च न च स्वाभावानामकारणत्वे मण्यादीनां प्रतिबन्धकतानुपपत्तिरिति वाच्यम् स्वप्रत्यहेयुरुत्वा

भावादीनामकारणत्वेपिगुरुत्वादीनांस्वातन्त्र्येणप्रतिबन्धकतावदुपपत्तेः।उत्तेजकाभावप्रतिबन्धकयोरेकत्रैवविशेष्य
त्वसम्भवादेकयुक्त्याभावेनोत्तेजकाभावविशिष्टप्रतिबन्धकानामभावत्वेन प्रतिबन्धकविशिष्टोत्तेजकाभावानामभाव
त्वेनवेतिकारणताद्वयकल्पनापत्तेश्च नचापसिद्धान्तः प्रतिबन्धकानांकारणत्वेकार्यानुत्पत्तिप्रयोजकत्वरूपलक्ष
णासिद्धिश्च कार्यानुत्पत्तेःकार्यप्रागभावतयानादित्वेनप्रयोज्यत्वासम्भवादितिवाच्यम्योगक्षेमात्मकप्रयोजकता
यावद्गुर्वादिसम्मतत्वात् अतएवप्रत्यवायानुत्पत्तेरनादितयातदर्थंनित्येकर्मणिकथंप्रवृत्तिरितिप्रभाकरशङ्कापात्
त्रतत्रयोगक्षेमसाधारणकारणत्वकल्पनंग्रन्थकृतांसाधुसंगच्छते तदुक्तंमुक्तावल्याम् ननुप्रत्यवायानुत्पत्तौकथं
प्रवृत्तिरितिचेत् इत्थम् यथाहिनित्येकृतेप्रत्यवायाभावस्तिष्ठति तदभावेतदभावः।एवंप्रत्यवायाभावसत्त्वेदुःखप्रा
गभावसत्त्वं तदभावेतदभावइतियोगक्षेमसाधारणकारणतायादुःखप्रागभावंप्रत्यपिसुवचत्वात् एवमेवप्रायश्चि
त्तस्यापिदुःखप्रागभावहेतुत्वमिति अस्यायमर्थः अनुत्पन्नावित्यत्रोद्देश्यत्वंसप्तम्यर्थः।कथमित्यादौनित्येकर्मणि
तिपूरणीयम् प्रत्यवायाभावः पापप्रागभावः।तदभावेसन्ध्यावन्दनादिनित्यकर्माभावे।तदभावः प्रत्यवायाभाव
स्याभावः प्रत्यवायरूपः।अग्रे तदभावे प्रत्यवायाभावस्याभावेप्रत्यवायेसति।तदभावः दुःखप्रागभावाभावोदुःखरूपः।

ग्रं० ५२ योगोऽप्राप्तस्य प्राप्तिः। क्षेमः सिद्धस्य संरक्षणम्। एवमेव योगक्षेमसाधारणमेवेति अत्र नव्यास्तु प्रागभावस्य प्रतियो
गिविकल्पग्रासेन फलत्वासम्भवात् अन्यथा यावत्तत्ताभाव एव नित्यस्य फलं स्वरूपसम्बन्धविशेषात्मकक्षेमसाधारणा
जन्यतायाश्च अत्यन्ताभावे सत्त्वादिति प्राहुः। अत्र प्रतियोगिविकल्पेति अस्तु कश्चिदतिरिक्तः पदार्थः प्रागभावः तथा
पि तस्य प्रतियोगिकत्वे प्रमाणाभाव इति सूचनार्थः नचैतन्मते कार्यमात्रे दिक्कालज्ञानेच्छाकृत्यदृष्टप्रागभावप्रति
बन्धकाभावाद्यष्टकारणानीत्यादिप्राचां सिद्धान्तभङ्गः एवमभिनवदोष इति वाच्यम् अस्माकं सिद्धान्तभङ्गभीत्यप्र
सक्तेः। प्रागेव भगवदक्षपादकणादप्रभृतिमहर्षिप्रोक्तसिद्धान्तानां प्रभाकरमहादेवरघुनाथशिरोमण्यादिभिरार्चोर्य्यै
र्ध्वस्तानामेवमर्द्दनात् उक्तञ्च रघुनाथेन न्यायखण्डनान्ते। अर्थानां युक्तिसिद्धानां मदुक्तानां प्रयत्नतः। सर्वदर्शनसिद्धा
न्तविरोधो नैव दूषणम्। अर्थानिरुक्ताः सिद्धान्तविरोधेनापि पण्डिताः। विना विचारं न त्याज्या विचार्य्यतप्रयत्नतः। सर्वशा
स्त्रार्थतत्त्वज्ञान् नत्वा नत्वा भवादृशान्। इदं याचे मदुक्तानि विचारयत सादरमिति तथा चाभावप्रत्यक्षे उपलम्भाभावस्य
न हेतुता एवमनुमितौ सिसाधयिषाविरहविशिष्टसिद्ध्यभावस्याप्रामाण्यज्ञानानास्कन्दितव्यभिचारज्ञानाभावादेः दाहादि
कार्ये उत्तेजकाभावविशिष्टमण्याभावादेश्च न हेतुता एवमन्यत्रापि युक्त्या र्थसिद्धौ च बहुतरसिद्धान्तभङ्गो न क्षतिकृ

इतिविदुषांपरामर्शः इदमत्रसारम् उक्तरीत्याविशिष्यतत्तद्व्यक्तित्वेनकार्यकारणभावेनमहास्त्रेणादुःसहमभि
चारणवनतद्दोषविध्वंसनेपिनतेनप्रेरणादिमवहारसिद्धिः नहिदृष्टचरंदुष्करपर्वतादिविध्वंसकेनापिवज्रास्त्रेणस्ती
रवेध्यहीरकवेधनम् तथाहियादृशजलेन्धनादिसामग्रीवतश्चैत्रस्यपाकः तत्कृतिसाध्योदृष्टः तत्सुतस्तनापनिवर्त्ते
केश्चतादृशजलेन्धनादिसामग्रीवत्तयातादृशत्वंस्वस्यप्रतिसन्धायप्रायशोमैत्रोपितत्रप्रवर्त्तते एवंयादृशाश्वादिसा
मग्रीवतश्चैत्रस्ययागः तत्कृतिसाध्योदृष्टः तद्वत्तयातादृशत्वंस्वस्यप्रतिसन्धायमैत्रोपितत्रप्रवर्त्तते एवंयादृशशमदमा
दिसाधनवतोमोक्षकाङ्क्षिणश्चैत्रस्यशान्तिरवगता शास्त्रात्तद्दीयमोक्षप्रदापकाचतादृशत्वंस्वस्यप्रतिसन्धायस्वमपि
तत्रप्रवर्त्तते इदंचसामान्यप्रत्यासत्त्यासामान्यकार्यकारणभावाङ्गीकारेहिसम्भवति।यद्विशेषयोरितिन्यायोप्येतन्मूल
कएवान्नहीदंविशिष्यकार्यकारणभावेपिसम्भवति।परसामग्र्याः परस्यैवकार्यजनकत्वंनस्वस्य॰ स्वसामग्र्याःस्वस्यैव
कार्य्यजनकत्वंनपरस्येत्यनुसन्धानवतःअंशेऽगृहीतव्याप्तिकापूर्वेतत्साधनव्यक्तिदर्शनेपिकिमनयामदिष्टंसाध्यतेऽनि
ष्टंवेतिसन्देहात्प्रवृत्त्यनुपपत्तेः।नहिप्रवृत्त्यनुपपत्तिरकिंचित्करीयतोमोक्षसाधनेशमदमादौमुमुक्षूणांप्रवर्त्तनायहिसर्वे
षांमहर्षीणांतत्तच्छास्त्रेषुप्रवृत्तिः।नहिसाकाकदन्तसङ्ख्यानवन्निरर्थकेतिकेनापिवक्तुमर्हति॰ अन्यथामुख्यप्रयोजना

श्र॰ भावेविशिष्यकार्यकारणभावसम्पालनमपिहीरणशयाइुलीसम्पालनवन्निरर्थकतामियात् तथाचदृढतरमभिचारादिनि
५४ रसनायविशिष्यकार्य्यकारणभावसत्वेपिमुख्यफलानुत्पत्यातदर्थंसामान्यकार्य्यकारणभावोप्यावश्यकश्रतःसिद्धान्तभङ्ग
कलङ्कापिनात्रेतिमत्संरविहायविद्वद्भिरूहनीयमिति॰ तत्त्वर्थानामनन्तत्वात्॰ स्वल्पत्वान्मेविदोमम॰ मयानोक्तंत्रमेयंपद्बोद्धमत
त्सुधीवरैः॥१॥ नानायन्थान्समालोक्य॰ विभाव्यचपुनःपुनः मयात्रलिखितंयद्यत्॰ तेनतुष्यन्तुतार्किकाः॥२॥न्यायाम्भोधिंसमु
न्मथ्य॰ गुरोः कारुण्यपोतमया॰ भिक्षुणोद्धवसिंहेन॰ यन्थः काश्यांमधाप्ययम्॥३॥यदत्रस्खलितंकिञ्चित्॰ प्रमादेनभ्रमेण
वा॰ मान्यामपिदयावन्तः सन्तःसंशोधयन्तुतत्॥४॥ इतिश्रीमन्निर्मलसम्प्रदायाक्रमहापुरुषश्रीमद्गुलाबसिंहशिष्येणोद्धव
सिंहेनविरचितोऽभावरहस्याख्योयन्थःसमाप्तः

अ·
५५

१४।·४ अभाववृत्तेप्रतियोगिज्ञानहेतुत्वमतखं·तत्रेति
१४।·९ अत्रप्रतियोगिरूपविशेषणज्ञानहेतुत्वमतखं·
विशेषणज्ञानेकारणतास्या·चतदपीति
१४।६ घटत्वेनपटोनास्तीत्यादौसर्वत्रसामान्याभाव
१५।·२ मानसंबाधेछ्यप्रत्यक्षानांतथाप्रयोगः स्या·
१५।५ प्रतियोग्यवृत्तिश्चधर्मेणप्रतियोगितावछेदकइ तथापीति
तिमणिग्रंथस्यशब्दविधयाप्रमाणत
१५।·९ तस्यानुमानतयापिप्रमाणत्वखं· खं·नापइति
नापरइति
१५।१० तस्यानुमानविधयाप्रमाणत्वस्या·नासथेति
१६।·४ पुनर्अधिकरणाभावसाधनं·इदंपुनरिहेति
१७।·७ अभाववृत्तेप्रतियोगिनिरोपाधेर्हेतुत्वखं·वस्तुत
१७।·९ तस्याहेतुत्वेऽभावनिर्विकल्पकेइष्टा पत्तिति
पत्तिकइदंत्वेति

१७।१० प्रकारांतरेणाभावनिर्विकल्पकखं·किंचेति
१८।·४ मतद्वयेप्यपूर्वंगदाधरोक्तदोषकः अत्रेति
१८।२ अधिकरणाभावानंगीकर्तृमिश्रमतखं·
१८।१· अधिकरणधर्मसंबंधावछिन्नभेद सोपिनेति
१९।·८ अत्रदीधितिकारसंमतिकः स्या·एतदिति
प्रतियोगिताकः· च· एवमिति
१९।७ अभावेप्रतियोगिनःसंबंधकथनं·पटोनेति
२·।·१ संयोगेनपटोनास्तीत्यादौतत्तौपार्थविचारःसं
२·।९ पटत्वेनपटोनास्तीतिवाक्यान्वशाब्द योगेनेति
२·।८ तत्रशाब्दस्थापनायजगदीश इत्याह·गदाधरेति
२·।११ पीतःशंखोनास्तीत्यादौसंबं मतमाहप्रेत्विति
२१।·६ अत्रकौस्तुभकारःकेचित्तुकार धस·पीतइति
मतनि·

२१।७ अत्यंतान्योन्याभावेवैलक्षण्यप्रदर्शनं·ननन्विति
२१।१० अत्रैवखंडनापकस्यचिन्मतमाह·नन्विति
२२।६ नञर्थोनाभावइतिवैयाकरणाह्निमतखं·नतुभ पेति
२३।·१ अधिकरणस्वरूपाभाववादिप्रभाकरमत
२३।·६ ध्वंसातिरिक्तवादिप्रभुकारमतखं· नि·अत्रेति
२३।६ प्रागभावखंडनारंभः।एवमित्यादि· तुच्छमिति
२४।·८ प्रागभावातिरिक्तवादिप्रभुकारमतखं·तत्रेति
२४।७ सहत्वंतत्तुणुक्त्यानत्साधकमतखं·तदसदिति
२४।८ मतद्वयेपिदोषमाह·अत्रेति
२५।·२ विद्वेषेइदृष्टानुसतित्रुक्त्यानसाधकमखं·तदपीति
२५।·५ प्रागभावसाधकचित्ररूपापत्तिखंडनं·नचेति
२५।४ उत्पन्नस्यपुनरुत्पत्तिभिपानत्तिद्विमतखं·तद
सदिति

	अशुद्धं	शुद्धं
३।०७	नगाहि	नवगाहि
४। ५	सत्त्वे	सत्त्वत्वे
४।७	जिच्च	जिवाच्च
६।०३	त्वदि	त्वादि
९।३	यागिता	योगिता
५।०३	पक्ति	व्यक्ति
२२।१	इत्तर	इतर
२२।९	द्रावय	द्रावय
२५।०२	वश्मकी	वश्यकी

अ· शु·

३२।६ नास्तीत्यादि· नास्तीत्यादि ३३।१९ वाभावा· वभावा ३४।·३ पिशाव· पिशाच ३९।·३
प्रागमाव· प्रागभाव ३९।१३ तन्नद्भाव· तदभाव ४१।·१ योग्योनुप· योग्यानुप ४१।·५ प्रति
ध्या· प्रतिद्ध्या ४३।·२ प्रत्यक्षापत्तेः· प्रत्यक्षापत्तेः ४६।१४ धेयेत्व· धेयत्व ५१।·८ ग्राह्या
भाव· ग्राह्यभाव ५३।६ चोर्य्यै· चार्य्यै॥ श्रीकाशीविश्वनाथपुरीमहल्ला बूलानाला
श्रीरामकुमारमिश्र के सुधानिवासछापाखानेमे निर्मलसन्तमहाराजगंगासिंहजीने अ
भावरहस्यन्यायग्रन्थछपाया· जिस्कोलेनाहोयचाननीचौकमे कुंजगलीकेपास कन्हैयामि
स्त्रकेदुकानपरमीलैगा· संवत्१९४२ ज्येष्ठशु· तिथि ५ ता·१७म·जून॥

अभावरहस्यग्रन्थःपरिसमाप्तः